शि
१

श्रीगणपतये नमः ॥ ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते ॥ अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥१॥ अध्ययनभावनाभ्यां प्रा
रं निर्णीय निखिलतन्त्रार्थं ॥ दीधितिमयं चिन्तामणिमनुतनुते तार्किकशिरोमणिः श्रीमान् ॥२॥ यस्तुष्टनयान्त्रिवर्त्मानामननात्स्वाद
रसाविष्कृद्बोधे ॥ रघुनाथकवेरयं दोषान्हन्ति रेषा विदुषां तनोतु मोदं ॥३॥ न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ॥ अस्य
तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः ॥४॥ मान्यान्प्रणम्य विहिताञ्जलिरेष भूयो भूयो विधाय विनयं विनिवेदयामि ॥ दूष्यं वचो
मम परं निपुणं विभाव्य भावावबोधविहितो न धुनोति दोषः ॥५॥ पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्याणामवधानाय च संग
तिं प्रदर्शयन् अनुमाननिरूपणं प्रतिजानीते प्रत्यक्षेत्यादि अत्रोपजीव्योपजीवकभावः फलतः स्वरूपतश्च प्रत्यक्षफल
स्यानुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेपि न सर्वाप्रत्यक्षप्रमितिस्तथा अनुमितयस्तु सर्वाः साक्षात्परम्परया वा व्या
प्त्यादिप्रत्यक्षोपजीविकाः पुरस्कृतश्चायमुपजीवकतोत्कर्षः यद्यपि सकलमेव प्रत्यक्षफलमुपजीवत्यदृष्टजनकमीश्वरप्रमत्व
तेव्यत्तापरिच्छेदिकामनुमितिं ईश्वरप्रत्यक्षं तु न फलं तथापि दृष्टद्वारकमिहत्तथात्वमादरणीयं इतस्याविनिगमकत्वात् सर्वथानुमिति १

कारणमिति द्विधापेक्षोपस्थितिकं अनुमितिभावयतोपीश्वरज्ञानस्यतत्कारणतानिर्वाहकप्रत्यासत्तिविरहेणानत्वात् सर्वं पुनरिति द्वि
ष्ठं नानुमानाधीनत्वम् मनःश्रवणयोरजन्यत्वात् दृष्टद्वारावात्तत्वमाहरणीयं नचोपस्थितिप्रदर्शीद्वियं दृष्टद्वारकमनुमानमपेक्ष
ते कार्योपजीव्यं निरूप्यैवोपजीवकं निरूप्यत इति न नियमः क्वचित्कार्यं निरूप्यापि कारणनिरूपणादिति चेत्किं ततः । नहि
संगतिरनंतराभिधानव्याप्ता आनंतर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः संगतिः आपतेच कार्ये कारणे वा सा
ते कारणत्वस्य कार्यत्वस्य च ज्ञानात् किमस्य कारणं कार्यं चेति जिज्ञासा अतस्तयोर्द्वयोरेव संगतित्वं इत्थं चोपजीवकतायास्तु
त्वत्वेपि न क्षतिरिति मंतव्यं लाघवायत्रैवोपमानस्य संगतिं दर्शयति बहुवादीति सुप्रसिद्धत्वया निरसनीयात्ववादिविप्र
तिपत्तिकत्वेन सुप्रतिपदत्वाच्चानुमान एव व्युत्पित्सोः प्रथमं जिज्ञासा नोपमाने अप्रसिद्धत्वात् निरसनीयबहुवादिविप्र
तिपत्तिकत्वेनातिदुरूहत्वाच्च औत्सर्गिकीरीतिमनुसृत्य चेदं तेन प्रथमं कस्यचित् दुरूहे जिज्ञासोदयेपि न क्षतिः तथा चाव
सरसंगत्योपमाननिरूपणमिति भावः यथा चावसरस्य संगतित्वं तथोक्तमाकरे शास्त्रांतरसमयग्राहकं सप्रवृत्तिनिमित्त

शि
२

त्वबोधकं सामान्यतो दृष्टमंततोऽप्यदृष्टजनकप्रवृत्त्यौपयिकं चानुमानमपेक्षते निखिलमेवोपमानमिति तावदुपजीवकत्वमेव सं
गतिरित्यपि केचित् संभवति चेह निरूपणयोरपि कार्यकारणभावः अथ तत्पूर्वकमित्यादिसूत्रे तत्पूर्वकत्वेनानुमाननिरूप
णानंतरमुक्तत्वेन व्याप्त्यादिप्रत्यक्षपरामर्शादत्रापि सहचारप्रत्यक्षजन्यत्वादिना तन्निरूपणात्तस्य प्रत्यक्षनिरूपणाधीनत्वात्
एवमनुमानभिन्नत्वेनोपमाननिरूपणमप्यनुमाननिरूपणापेक्षमिति संक्षेपः॥ ॥तत्र लक्षणस्वरूपप्रामाण्यादि
भिरनुमाने निरूपणीये करणस्वक्रियाभेदभिन्नमूर्तिकतया क्रियालक्षणपूर्वकं तल्लक्षणमाह व्याप्तीत्यादिना अत्र व्या
प्तिविशिष्टत्वपक्षधर्मतोभयसामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदक
द्वयसामानाधिकरण्यवचनत्वात् ज्ञानपदोपसंदानेन च बाधिताबाधितसाधारणतत्त्वज्ञानत्वाभावाच्च भ्रांतानुमित्यव्याप्तिरि
त्याहुः तन्न परामर्शे नियमतो व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रहे मानाभावात् गौरवेण तद्विषयकत्वेनाहेतुत्वात् संबं
धसंबंधाग्रहेपि विशिष्टज्ञानत्वस्योपपादितत्वात् भ्रमस्थले तादृशसामानाधिकरण्यस्याप्रसिध्या तत्त्वज्ञानस्याप्यभावाच् २

असत्ख्यातिनिरासात् अवांतरवाक्यार्थायोग्यत्वनिर्णये महावाक्यार्थज्ञानानुदयात् विषाणे शशसंबंधाभावनिश्चयदशायां
शशविषाणजन्यमिदं कार्मुकमिति शाब्दबुद्धेरसत्वापि दुरुपपादत्वात् नन्वावप्रमाणप्रस्तावात्प्रमैव लक्ष्या यदि च सल्लिंगकप
रामर्शादपि भ्रांतानुमितिस्तदा चरमज्ञानपदं प्रमापरमिति वाच्यं अव्याप्यापक्षधर्मयोस्तत्वावगाहिना परामर्शेन जनितायां
वस्तुतः साध्यवत्पक्षावगाहित्वात्प्रमायामव्याप्तेः लिंगोपहितत्वैलिंगिकभाननिरासेनांशिकभ्रमत्वस्याप्यनुपयोगात् ईश्वरतादृशज्ञा
नजन्यत्वस्य चातिप्रसंजकत्वात् अतएव व्याप्तिविशिष्टपक्षधर्मतातत्त्वज्ञानं वेत्यादिकमपास्तं यदपि व्याप्तिविशिष्टं च पक्षध
र्मश्चेति द्वंद्वगर्भत्वात् व्याप्तिविशिष्टपक्षधर्मत्वावगाहिज्ञानजन्यत्वं लभ्यते पदार्थयोरभेदेपि पदार्थतावच्छेदकभेदे नैव प्रमाण
प्रमेयेत्यादिसूत्रे अन्यत्र च द्वंद्वस्य दर्शनात् पदार्थद्वयाभेदबोधकपदकर्मधारयात् अभेदाभेदोदासीनपदार्थद्वयबोधजनकत्वेनैव द्वंद्व
स्याभेदात् व्याप्तिविशिष्टपक्षस्य धर्मपरतया वा व्याप्तिविशिष्टत्वपक्षधर्मत्वयोर्लाभात् न चैवमालोको वह्निव्याप्यो धूमवान् पर्व
त इति ज्ञानजन्येऽतिव्याप्तिः एकत्र तदुभयावगाहित्वस्योक्तत्वादिति केचित् तदप्यसत् एवमपि धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्ति
तीतिज्ञानजन्येऽतिप्रसंगात् एकरूपेण तदुभयावगाहित्वस्योक्तौ मीमांसकमतानुप्रवेशात् भिन्नस्तदुभयोपश्लेषावगाहित्व

त्रि

३. स्यच परामर्शाव्यापकत्वात् नचतदुभयविशिष्टत्वनियतधर्मावच्छिन्नकारणताप्रतियोगिककारणताशालित्वमर्थः पक्षधर्मता
प्राहानवैयर्थ्यात् व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यमितित्वात् यद्यप्यत्रापि धूमसमानाधिकरणात्यंताभा
वप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणं धूमवानित्याद्विपरामर्शजन्ये च व्याप्तिः अखंडव्याप्तेरप्रसिद्धेः
अप्रमानुमितेर्लक्ष्यत्वे चात्राकाशमात्मन इत्यादौनित्तरां तथा तथापि तावत्स्वहार्थानां तथाविधपरस्परोपश्लेषावगाहित्वमात्रं विवक्षि
तं नच व्यतिरेकिण्येव्याप्तिः व्यभिचारधीविरोधिधीविषयत्वेनान्वयव्यतिरेकव्याप्त्योरनुगमात् भवति हि धूमसमानाधिकरणात्यं
ताभावाप्रतियोगिवह्निसमानाधिकरणावृत्तिधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियोगित्वे वा गृहीते नियमतो व्यभिचारधीप्र
तिरोधः तथाविधधूमसमानाधिकरणत्वादिकं तु न तथा रासभादौ तद्ग्रहेपि व्यभिचारग्रहात् व्यतिरेकसहचारेण अन्वयव्याप्तिग्र
हणाभ्युपगमाच्च नचैवं भ्रमसंशयोत्तरप्रत्यक्षप्रतिविशेषदर्शनस्य हेतुतामते तत्रातिव्याप्तिः तथाविधनिश्चयत्वेन हेतुतायाविव
क्षितत्वात् विशेषदर्शनस्य भ्रमादिविरोधित्वेन तत्वमित्युक्तत्वात् अतएव लिंगत्वादिलक्षणातिदेशवाक्यार्थज्ञानजन्योपमितौ
नातिप्रसंगः तथाविधवाक्यार्थप्रतिसंधानत्वेन तस्य हेतुत्वात् न चोपनयार्थज्ञानजन्यन्यायार्थज्ञाने तद्धेतुत्वेन संकेतितशब्दांतरेण २

वाच्यात्वादिविशिष्टोपस्थितिद्वाराजनितेशाब्दबोधेऽतिव्याप्तिः व्युत्पादयिष्यते हि महावाक्यार्थज्ञानस्यावांतरवाक्यार्थधीजन्यत्वं तद्वादे
ऽप्यविशेषणरूपेणोपस्थापकत्वमिति वाच्यं तत्रातिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽननुप्रवेशात् निश्चयत्वस्य चाप्रवेशाच्च न च तत्
कापि तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषणतावच्छेदकनिश्चयत्वेन हेतुत्वात् तादृशाप्रसक्तेशाब्दबोधे चातिव्याप्तिः रक्तो दंडो न वे
ति संशये रक्तं दंडवानिति ज्ञानानुदयादिति वाच्यं ज्ञानोपरमेपि विशिष्टविषयोपधानेन द्वाद्वेभयोः कृतेऽप्यसाक्षात्कारात् विशेषण
विषयकानुशिष्टसंस्कारादेव विशिष्टस्मरणाच्च तद्विषयकगुणगौतत्र हेतुत्वेन न्यूनवृत्तिज्ञानत्वस्याप्रवेशादिक्षादिनः संस्कारा
च्चानुमितेरनुदयात् संस्कारायन्यत्वस्य गुरुत्वया ज्ञानत्वेनैव तत्र हेतुत्वात् न च परामर्शानुव्यवसायेऽतिव्याप्तिः सामान्यतः प्रत्य
क्षे विषयत्वेन तद्विषयकप्रत्यक्षेत्तत्वेन कदाचित् ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना तं हेतुत्वेन तु ग्यावानेव तत्तद्‌दितरत्वादिविषयनिष्ठो
धर्मः तेन तद्विषयकत्वेन च कार्यकार्यकारणभावः मैत्रावलोकितचैत्रनिर्मितनीलेतरघटत्तद्विषयत्वादिनात्तत्वेऽनंतकार्यका क
रणभावप्रसंगात् मानाभावात् अन्यथोपपत्तेश्च अथ विशिष्टस्मरणेऽतिव्याप्तिः नचोपेक्षान्यत्वेन तत्र हेतुत्वं उपेक्षात्वं हि
न जातिः चाक्षुषत्वादिना जातिसंकरात् आंशिकत्वोपगमाच्च नापि प्रवृत्तिनिवृत्त्यजनकत्वं अजिज्ञासितविषयत्वं वा तादृशादपि

शि
४

स्मृत्युत्पादात् नापि संस्कारजनकत्वं तज्जनकतावच्छेदकरूपान्तरापरिचयात् अन्योन्याश्रयप्रसंगाच्च संस्कारानुत्पत्तौ वा स्मरणासंभवे
स्मृतिजनकतायां तद्प्रवेशाच्च नाप्यनुभवत्वेन तथात्वं संस्कारस्य फलनाश्यतया सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसंगात्
समानाकारस्यैव फलनाश्यत्वात् समूहालंबनादितो नैकैकगोचरक्रमिकस्मरणानुपपत्तिः आयते च पुनः पुनः स्मरणात् दृढतरसंस्का
रः परित्यज्य च तन्निष्ठताव्यभिचारकरूपं गुरुत्वमाराव्यभिचारकेणाकारणत्वकल्पनानुदयात् इदमेव चान्यत्र सामान्यस्य हेतुतावच्छे
दकत्वे बीजं अभिहितं च तात्पर्यटीकायां प्रथमसूत्रे अवयवविवेचने वाचस्पतिमिश्रैः स्मृतीनां स्वकार्यविरोधिनीनां सहभावादिति
चेन्न चरमज्ञानपादस्यानुभवपरत्वात् साक्षात्तज्जन्यत्वस्य विवक्षितत्वादित्यपि कश्चित् किं च व्याप्यविशेष्यकात्पक्षविशेष्यकाच्च
परामर्शादनुमितिदर्शनात् उभयवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वं लक्षणघटकमपि तदेव एकतरविशेष्यकज्ञानादन्यतरवि
शेष्यकस्मरणाभावात् अन्यथानियमेन स्मृतेरुभयविशेष्यकतापत्तेः समानप्रकारकत्वेनैव ज्ञानस्मरणयोः कार्यकारणभावाच्च तत्र वि
शिष्यैव कार्यकारणभावः नन्वैकरूप्येण गौरवमानाभावाच्च एवं च विशिष्टवैशिष्ट्यबोधादौ क्वापि नातिप्रसक्तिः धं क्वापि वन्ह्याद्यनुमि
तौ वन्ह्यादिव्यभिचारधीविरोधिधीविषयधर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतामतेपि नितरां तस्यैव लक्षणेपि निवेशात् अनौ ४

१ एवं व्याप्यवत्पक्षाद्यभावग्रहं प्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेपि न क्षतिः १

मानस्य तर्थैव हेतुहेतुमद्भावग्रहणात्तस्यैव व्याप्तिपरिच्छेदकत्वात् विपर्ययेण कोटिमात्रपर्यवसायिनश्च तर्कस्य तद्भाव
कोटिकशंकानिवर्तकत्वं अन्यथा धूमो यदि वह्निशून्यजन्यान्यतरो न स्यात्तज्जन्यो न स्यादित्यादेरपि तथा सापत्तेः तथापर्यव
सायित्वाच्च क्वचित् विशेषतो व्याप्त्या सामान्यतो व्याप्त्या क्वचित् पक्षधर्मताबलात्तत्संपत्तये अत्र वह्न्यसमवहितान्यत्वेन पक्षो
विशेषणीयः विशेषणलोपस्थिते विशिष्टाभावबुद्धेः विशेष्याभावमात्रावलंबनात् तत्रोपस्थितिविरोधित्वाच्च वह्नेरित्यादिशंका
दूषणमत्रे निरसनीयं वस्तुतो वह्न्यजन्यमपि वह्निसमवहितजन्यं वह्न्यसमवहितजन्यं संभवतीति वह्निजन्यत्वं पर्यवसितं वह्निसमव
हितजन्यत्वं वाच्यं तथा च घटादौ व्यभिचारवारणाय आपाद्यकोटिप्रतियोगिविशेषणार्पकं सत्यंतं अजन्ये जन्ये च नान्तरीयकवह्नि
के व्यभिचारवारणाय जन्य इति तदर्थस्तु वह्न्यसमवधानकालीनवह्नितत्समवधानेतरयावत्कारणजन्यत्वं तथाविधयाव
त्कारणकत्वमिति यावत् तथा च वह्न्यसमवहिताजन्यत्वेऽपि वह्न्यसमवधानकालीनवह्नितत्समवधानेतरयावत्कारण
कोऽन स्यादिति पर्यवसितोऽर्थः यत्तु नान्तरीयकवह्निके व्यभिचारवारणायापादककोटावेव विशेषणं सत्यंतार्थः स च वह्न्यघटि
तसामग्र्यजन्यत्वमिति तन्न प्रागुक्तदसिद्धेः अत्र चाद्या द्वयी शंका इष्टापत्तिपर्यवसिता तृतीया पुनरापादकाप्रसिद्धिपर्यव
सायिनी अवक्रेः वह्निशून्यात् तदुपादानमिति करणाद्युत्पत्त्यात्तदीयकार्यप्रयोजकताज्ञानपरं तादृशान्वयव्यतिरेकानुवि

श्रि

१ श्रीगणेशाय नमः॥ ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते॥ अखंडानंदबोधाय पूर्णाय परमात्मने ॥१॥ अध्ययनभाव
नाभ्यां सारं निर्णीय निखिलतंत्रयोः॥ दीधितिमधि चिंतामणितंत्रे तार्किकशिरोमणिः श्रीमान् ॥२॥ परकृष्टनयान्निवर्त
मानान्मननान्सावसाथ विमुग्धबोधैः॥ रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां तनोतु मोदं ॥३॥ न्यायमधीते सर्वस्त
नुते कुतुकान्निबंधमप्यत्र॥ अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः ॥४॥ मान्यान्प्रणम्य विहितांजलिरेष
भूयो भूयो विधाय विनयं विनिवेदयामि॥ दूष्यं वचो मम परं निपुणं विभाव्य भावावबोधविहितो न धुनोति दोष ॥५॥
पूर्वापरग्रंथैकवाक्यताप्रतिपत्तये शिष्याणामवधानाय च संगतिं प्रदर्शयन् अनुमाननिरूपणं प्रतिजानीते प्रत्यक्षवि
त्यादि अत्रोपजीव्योपजीवकभावः फलतः स्वरूपतश्च प्रत्यक्षफलस्यानुमित्यनुव्यवसायादेः अनुमितेरुपजीवकत्वे
पि न सर्वा प्रत्यक्षप्रमितिस्तथा अनुमितयस्तु सर्वाः साक्षात्परंपरया वा व्याप्त्यादिप्रत्यक्षोपजीविकाः पुरस्कृतश्चाय
मुपजीवकतोत्कर्षः यद्यपि सकलमेव प्रत्यक्षफलमुपजीव्यस्य दृष्टजननीसमयमकर्तव्यतापरिच्छेदिकामनुमितिं
ईश्वरप्रत्यक्षं तु न फलं तथापि दृष्टद्वारक :मिहत्तपात्वमादरणीयं इतरस्यापि चिनिर्ग[redacted]त्वात् सर्वदैवानुमितिक १

ष्ठ

रणमिन्द्रियापेक्षोत्पत्तिकं अनुमितिभावयन्तोपि ईश्वरज्ञानस्य तत्करणानां निर्वाहकप्रत्यासत्तिविरहेणात्तत्वात् सर्वे
पुनरिन्द्रियं नानुमानाधीनजन्म मनःश्रवणयोरजन्यत्वात् दृष्टद्वारा वा तत्त्वमादरणीयं नचोत्पत्तिमदपीन्द्रियं दृष्टद्वार
कमनुमानमपेक्षते अतो उपजीव्यं निरूप्यैवोपजीवकं निरूप्यत इति न नियमः क्वचित्कार्यनिरूप्यापि कारणनिरूपणा
दितिचेत् किंचातः नहि संगतिरनन्तराभिधानव्याप्या आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः
संगतिः जायते च कार्ये कारणे वा ज्ञाते कारणत्वस्य कार्यत्वस्य च ज्ञानात् किमस्य कारणं कार्यं चेति जिज्ञासा अनयोस्त
योर्द्वयोरेव संगतित्वं इत्थं चोपजीवकतायास्तन्त्रत्वेन क्षतिरिति मन्तव्यं लाघवायात्रैवोपमानस्य संगतिं दर्शय
ति बहुवादीति स्वप्रसिद्धतया निरसनीयान्यवादिविप्रतिपत्तिकत्वेन स्वप्रतिपादनतया चानुमानएव व्युत्पित्सोः प्र
थमं जिज्ञासा नोपमाने अप्रसिद्धत्वात् निरसनीयबहुवादिविप्रतिपत्तिकत्वेनातिदुरूहत्वाच्च औत्सर्गिकीरी
तिमनुसृत्य चेदं तेन प्रथमं कस्यचित् दुरूहे जिज्ञासोदयेपि न क्षतिः तथा चावसरसंगत्योपमाननिरूपणमिति भावः
यथा चावसरस्य संगतित्वं तथोक्तमाकरे शब्दान्तरसमभ्यग्राहकं सप्रवृत्तिनिमित्तत्वबोधकसामान्यतो दृष्टं अन्ततो
अदृष्टजनकप्रवृत्त्यौपयिकं चानुमानमपेक्षते निखिलमेवोपमानमितिद्वारोपजीवकत्वमेव संगतिरित्यपि केचित् ॥

शि
२

संभवतिचेह निरूपणयोरपि कार्यकारणभावः अथ तत्पूर्वकमित्यादिसूत्रे तत्पूर्वकत्वेनानुमाननिरूपणात् तत्र च तेन व्या
प्त्यादिप्रत्यक्षपरामर्शाद्यपि सहचारप्रत्यक्षजन्यत्वादिना तन्निरूपणात् तस्य प्रत्यक्षनिरूपणाधीनत्वात् एवमनुमान
भिन्नत्वेनोपमाननिरूपणमपि अनुमाननिरूपणापेक्षमिति संक्षेपः तत्र लक्षणस्वरूपप्रामाण्यादिभिरनुमानेनि
रूपणीये करणस्य क्रियाभेदभिन्नमूर्तिकतया क्रियालक्षणपूर्वकं तल्लक्षणमाह व्याप्तीत्यादिना अत्र व्याप्तिविशि
ष्टत्वपक्षधर्मत्वोभयसामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदक
द्वयसामानाधिकरण्यवचनत्वात् ज्ञानपदोपस [illegible] धेनाबाधितसाधारणतज्ज्ञानलाभात् न भ्रान्तानुमित्यव्या
प्तिरित्याहुः तन्न परामर्शेन नियमतो व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रहमानाभावात् गौरवेण तद्विषयकत्वे
नाहेतुत्वात् संबंधसंबंधाग्रहेपि विशिष्टज्ञानत्वस्योपपादितत्वात् भ्रमस्थले तादृशसामानाधिकरण्यस्याप्रसिध्या
तज्ज्ञानस्याप्यभावात् आसत्त्याप्तिनिरासात् अवान्तरवाक्यार्थायोग्यत्वनिर्णये महावाक्यार्थज्ञानानुदयात् विषाणेश
शसंबंधाभावनिश्चयदशायां शशविषाणजन्यमिदं कार्मुकमिति शाब्दबुद्धेरेतेनापि दुरुपपादत्वात् तथात्र प्रमाण
या प्रवृत्तौ प्रमेव लक्ष्या यदि च सल्लिंगकपरामर्शादपि भ्रान्तानुमितिस्तदा चरमज्ञानपदं प्रमा परमिति वाच्यं अव्याप्त्या २

पक्षधर्मयोस्तत्वावगाहिना परामर्शेन जनितायां वस्तुतः साध्यवत्पक्षावगाहिन्यां प्रमायामव्याप्तेः लिंगोपहितलैंगिकभान
निरासेनांशिकभ्रमत्वस्याप्ययोगात् ईश्वरवादेशज्ञानजन्यत्वस्यातिप्रसंजकत्वात् अतएव व्याप्तिविशिष्टपक्षधर्मतात
ज्ज्ञानं वेत्यादिकमपास्तं यदपि व्याप्तिविशिष्टंच पक्षधर्मश्चेति द्वयाश्रयणात् व्याप्तिविशिष्टत्वपक्षधर्मत्वावगाहिज्ञानजन्यत्वं
लभ्यते पदार्थयोरभेदेपि पदार्थतावच्छेदकभेदेनैव प्रमाणप्रमेयेत्यादिसूत्रे अन्यत्र च द्वंद्वस्य दर्शनात् पदार्थद्वयाभेदबो
धकात्वकर्मधारयाद्भेदाभेदोदासीनपदार्थद्वयबोधजनकत्वेनैव द्वंद्वस्याभेदात् व्याप्तिविशिष्टपदस्य धर्मपरतया वा व्या
प्तिविशिष्टत्वपक्षधर्मत्वयोर्लाभात् न चैवमालोकोवह्निव्याप्यो धूमवांश्च पर्वत इति ज्ञानजन्ये अनुमितिव्याप्तिः एकत्र तदुभया
वगाहित्वस्योक्तत्वादिति केचित् तदप्यसत् एवमपि धूमो वह्निव्याप्यो द्रव्यं पर्वत इति ज्ञानजन्येति प्रसंगात् एकरूपेण
तदुभयावगाहित्वस्योक्तौ मीमांसकमतानुप्रवेशात् मिथस्तदुभयोपश्लेषावगाहितस्य च परामर्शाव्यापकत्वात् न च तदु
भयविशिष्टत्वनियतधर्मावच्छिन्नकारणताप्रतियोगिककार्यताशालित्वमर्थः पक्षधर्मतोपादानवैयर्थ्यात् व्याप्तिवि
शिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यमितिस्तु स्यात् यद्यप्यत्रापि धूमसमानाधिकरणात्यन्ताभावप्रतियो
गितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणधूमवानित्यादिपरामर्शजन्येऽव्याप्तिः अखंडव्याप्तेरप्रसिद्धेः

शि
२

श्रमानुमितेर्लक्ष्यत्वे चात्राकाशमात्मन इत्यादौ नितरां तथा तथापि तावत्पदार्थानां तथाविध परस्परोपश्लेषावगाहित्व
मात्रं विवक्षितं न च व्यतिरेकिण्यव्याप्तिः व्यभिचारधीविरोधिधीविषयत्वेनान्वयव्यतिरेकव्याप्त्योरनुगमात् भवति
हि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणवृत्तिधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियो
गित्वे वा गृहीते नियमतो व्यभिचारधीप्रतिरोधः तथाविधधूमसमानाधिकरणत्वादिकं तु न तथा रासभादौ तद्ग्रहेऽपि व्य
भिचारग्रहात् व्यतिरेकसहचारेणान्वयव्याप्तिग्रहणाश्रयेणाद्य न च भ्रमसंशयोत्तरप्रत्यक्षं प्रति विशेषदर्शनं हे स्य
तुतामतं तत्रातिव्याप्तिः तथाविधनिश्चयत्वेन हेतुतायाः विवक्षितत्वात्तदुपमितौ नातिव्याप्तिः तथाविधवाक्यार्थप्रति
संधानत्वेन तस्य हेतुत्वात् न चोपनयार्थज्ञानजन्यन्यायार्थज्ञाने [redacted] तदवच्छेदकत्वं केति तच्छब्दान्तरेण वाक्यार्थादिविशि
ष्टोपस्थितिद्वाराजनितशाब्दबोधे अतिव्याप्तिः व्युत्पादयिष्यते हि महावाक्यार्थज्ञानस्यावान्तरवाक्यार्थधीजन्यत्वं तदा
देश्च विशेषरूपेणोपस्थापकत्वमिति वाच्यं तत्राति [redacted] टीकस्य पदजन्यत्वस्य कारणतावच्छेदके नु प्रवेशान्निश्चयत्व
स्य चाप्रवेशाच्च न च तथापि तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात्

६ विशेषदर्शनस्यव्याप्तावविरोधित्वेन तत्त्वमित्युक्तं स्यात् अत एव
दि

तादृशप्रत्यक्षे शाब्दबोधे चातिव्याप्तिः रक्तो दण्डो न वेति संशये रक्तदण्डवानयमिति ज्ञानानुदयादिति वाच्यं ज्ञानोपरमे
पि विशिष्टविषयोपधानेनेच्छाद्विषयोः वृत्तेश्च साक्षात्कारात् विशेषणविषयकाद्विशिष्टसंस्कारादेव विशिष्टस्मरणा
च्च तद्विषयकगुणानां तत्र हेतुत्वेन न्यूनवृत्तिज्ञानत्वस्याप्रवेशादितिः संस्कारस्य चानुमितेरनुदयात् संस्काराद्यन्यत्व कादि
स्य गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात् न च परामर्शानुव्यवसायेऽतिव्याप्तिः सामान्यतः प्रत्यक्षे विषयत्वेन तद्वि
षयकप्रत्यक्षत्वेन कदाचिज्ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना तद्धेतुत्वं ननु [illegible] दितरत्वादिविषयनिरोधभेः
तेन तद्विषयकत्वेन च कार्यकारणभावः मैत्रावलोकितचैत्रनिमित्तनीलेतरघटतद्विषयकत्वादिना तत्त्वे अनन्तका
र्यकारणभावप्रसंगात् मानाभावात् अन्यथोपपत्तेश्च अपविशिष्टस्मरणेऽतिव्याप्तिः न चोपेक्षान्यत्वेन तत्र हे
तुत्वं उपेक्षात्वं हि न जातिः चाक्षुषत्वादिना जातिसंकरात् आंशिकत्वोपगमाच्च नापि प्रवृत्तिनिवृत्त्यजनकत्वं अ
जिज्ञासितविषयत्वं वा तादृशादपि स्मृत्युत्पादात् नापि संस्काराजनकत्वं तज्जनकतावच्छेदकरूपान्तरापरिचयात्
अन्योन्याश्रयप्रसंगाच्च संस्कारानुत्पत्तौ वा स्मरणासंभवे ___ [illegible] तायां तदप्रवेशाच्च नाप्यनुभवत्वेन तथा

स्मृति

शि

४ त्वेसंस्कारस्यफलनाश्यत्वेयथासकृदनुभूतस्यस्मरणोत्तरमस्मरणप्रसंगात् समानाकारस्यैवफलनाश्यत्वात् समू
हालंबनादिनानैकैकगोचरक्रमिकस्मरणानुपपत्तिः जायतेचपुनःपुनःस्मरणात् दृढतरसंस्कारः परित्यज्यचलि
श्चिताव्यभिचारकंरूपंग्रत्यग्राणव्यभिचारकेणाकारेणत्वकल्पनानुदयात् इदमेवाः । असामान्यस्यहेतुतावच्छेदक
त्वेबीजं अभिहितंचतत्त्वार्थटीकायांप्रथमसूत्रेअवयवविवेचनेवाचस्पतिमिश्रैः स्मृतीनांस्वकार्यविरोधिनीनां
प्रसहभावादितिचेन्न चरमज्ञानपदस्यानुभवपरत्वात् साक्षात्तज्जन्यत्वे[illegible]क्षितत्वादित्यपिकश्चित् किंच
व्याप्यविशेष्यकात्पक्षविशेष्यकाच्चपरामर्शादनुमितिदर्शनात्तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेनतत्रहेतु
त्वंलक्षणाघटकमपितदेव एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभावात् अन्यथानियमेनस्मृ
तेरुभयविशेष्यकतापत्तेः समानप्रकारकत्वेनैवज्ञानस्मरणयोः कार्यकारणभावाच्चतत्रविशिष्यैवकार्यका
रणभावः गुरुरूपेणगौरवात् मानाभावाच्च एवंचविशिष्टवैशिष्ट्यबोधादौक्वापिनातिप्रसक्तिशंकापि
वन्ह्याद्यनुमितौवन्ह्यादिव्यभिचारधीविरोधिधीविषयधर्मप्रकारकपक्षधर्मताज्ञानत्वेनहेतुतामतेपिनतत् ४
द्रूपेणलक्षणेपिनिवेशात् अतएवव्याप्यवत्पक्षाद्यभावग्रहप्रतिव्याप्यवत्पक्षादिज्ञानत्वेनहेतुत्वेपिनक्षतिः

व्याप्तिविषयकत्वेन वाजन्यज्ञानं विशेषणीयं अनेन स्मृतिप्रतिसंस्कारद्वाराऽनुभवं प्रति च साक्षाद्विशेषणाधि
यः हेतुत्वस्यानविकल्पाकारणस्य वा स्मरणस्यानुभवं प्रति च वाचस्या हेतुत्वस्य नियमतश्च व्यक्तिसाक्षात्कार पूर्व
विषयस्मृतेः कल्पनात् व्याप्यवत्पक्षवत्त्वादिज्ञाने अस्ति व्याप्तिरिति परामर्शं साध्यादरनुगमादेकोपादानेऽन्यानुमि
तौ दैवाद्व्याप्तिविषयिण्यां च तस्याम व्याप्तिः परमवशिष्यते सा पितादृशज्ञानवृत्तिअनुभवत्वव्याप्यजातिमत्त्वविवक्षया नि
रसनीया एतस्य भायचानुभवार्थकं चरमज्ञानपदं एवं चान्वयव्यतिरेकव्याप्त्योः पृथक् प्रयोजकत्वेपि न क्षतिः पर्वतव
ह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतायाः वह्निव्याप्यवत्पर्वतनिश्चयत्वावच्छिन्नकार
णताप्रतियोगिकव्याप्तिविषयकवृत्तिकार्यताया वा अवच्छेदिकाज्ञानवृत्तिसामानाधिकरण्येनावच्छेदिका या जातिस्तद्वत्त्वं वो
ध्यं व्याप्तिभाने वह्यभासमानो यस्तादृशानुमितिविषयो यो धर्मस्तद्विषयत्वमात्रं ग्राह्यं [illegible]कांचिदनुमितिव्यक्तिमादा
य तद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्वमनुमितित्वं वक्तव्यं अनुभवत्वजात्यनंगीकारे तु तद्व्य
क्तिसमवेतस्मरणासमवेतधर्मसमवायित्वं वक्तव्यं व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्ना

याविशिष्टपरामर्शत्वावच्छिन्नाकारणताप्रतियोगिककार्यतातत्समानाधिकरणानुभवत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि
केचित् परे तु पक्षधर्मतेत्यत्र पक्षताविशेषणं तथा च पक्षतासहकृततादृशपरामर्शजन्यत्वमर्थः यथोक्तायाः विशे
ष्याद्यभावरूपाया वा पक्षतायाः प्रत्यक्षस्य वारणाय परामर्शस्योपादानं तत्त्वेन जनकत्वमेकावच्छेदेन तदुभयजन्यत्वं
च विवक्षितं तेन बाधादिकालीनेन दैवात्प्रतियोगिविषयकेन परामर्शेन जन्ये पक्षतायाः प्रत्यक्षे तदुभयसमूहालंबने
च नातिव्याप्तिप्रसंगः तद्वृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया च नाव्याप्तिरित्याहुः तच्चिंत्यं तत्करणमिति नैव व्याप्त्या
दिज्ञानजन्यज्ञानकरणत्वेनेतरभेदसाधने व्याप्तिज्ञानत्वं तादात्म्यसंबंधेन व्याप्तिज्ञानमेव वा ग्राहकं व्याप्तेरननुगमेपि अ
धिकस्य भागासिद्धिवारणमात्रप्रयोजकत्वादिति वाच्यं फलोपहितस्य लक्ष्यत्वे तथा व्याप्तिज्ञानत्वादेरतिप्रसक्तत्वात् करण
त्वनिष्ठव्याप्तेस्तादृशज्ञानत्वाद्यनवच्छेद्यत्वात् व्यतिरेकव्याप्तेर्गमकतया वैयर्थ्यशंकानवकाशाच्चेति लिंगस्य नित्यत्वेपि
अनुमितिकरणस्य स्वरूपतः प्रत्यक्षोपजीवकत्वं व्यवस्थापयन्नाह तच्चेति अनुमितेर्ज्ञानाकरणकज्ञानत्वेन प्रत्यक्षप्र
मितिमध्यनिवेशात्तत्करणस्यापि प्रत्यक्षप्रमाणांतर्भावः स्यादिति तन्निरस्यति तच्चेत्यपि केचित् अनुमानस्य प्रामाण्यं . ५

परीक्षितुं चार्वाकमतमुत्थापयति अपि चेति अनुमानं अनुमानत्वेनाभिमतं धूमादिज्ञानं असत्त्व्याप्त्युपनीतं अनुमानमेव वा संवादेन संवादाभिमानेन संभावितस्यासतोऽनुगताकारस्य परमार्थसत्त्वलक्षणमात्रसाक्षिणाध्यक्षेणानुल्लेखात्

१७ अध्यक्षमूलकविकल्पोल्लिखितत्वाद्यसंवादः अनुमानाप्रामाण्ये च तन्मूलकसमयनिर्णयाद्यधीनप्रवृत्तिकयोः शब्दोपमानयोः स्वतराम् अप्रामाण्यान्नाप्रत्यक्षं प्रमाणमित्याह इतीत्यादि अप्रमाणेसाधर्म्येण प्रमाणताप्रयोजकरूपशून्यत्वेन दृष्टसाधर्म्यस्य साधर्म्यदर्शनस्य वा मन्त्वभिहितमेव साधर्म्यदर्शनं संभावनाभावयति संभावनैव च बहुशो व्यवहारहेतुरिति अत आह अनुमानमिति ननु न वयमापाततो भ्रमजनकत्वलक्षणमप्रामाण्यं निरूपयामः येन भ्रमस्य विषयबाधाधीनतया प्रामाण्यं संभाव्येत परं तु प्रमाकरणत्वव्यतिरेकमत आह अपि चेति स्वत इति न चानुगताकारास्पर्शिनी परमार्थसत्त्वलक्षणसाक्षिणि स्वसंवेदनसंविदितप्रामाण्ये निर्विकल्पकज्ञानेन प्रामाण्यसंदिग्धत्वे परं तु तदुत्तरभाविनि समुल्लिखितालीकानुगताकारे सविकल्पक एवेति वाच्यं निर्विकल्पकस्य सन्मात्रावलम्बनत्वस्य च विषयकत्वप्रामाण्यावगा

सिद्धि हितानाम् अनुमानाधीनत्वात् सर्वमिदं सति व्याप्तिनिश्चये स्यात् स एव तु न संभवति उपायाभावादित्यत्राह व्याप्तीति

शि
६

समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादनिदानं व्याप्तिस्वरूपनिरूपणं मारभते
नन्वित्यादिना साध्याभाववदवृत्तित्वस्याव्याप्य तिसाध्यकसद्धेतावव्याप्तिमाशंक्याह साध्यवद्भिन्नेति साध्यवद्भिन्ने यः सा
ध्याभाववांस्तद्वदवृत्तित्वमर्थः कर्मादौ संयोगाद्यभावस्य भिन्नत्वेऽप्यलाभादाह साध्यवदिति हेतोः साध्यवदन्यस्य भिन्नदृष्टान्तवृ
त्तित्वेनाव्याप्तेराह सकलेति साकल्यं साध्याभाववति साध्ये च बोध्यं साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्रा
ह्यः तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः अव्याप्य
व्याप्यवृत्ति वृत्तिसाध्यकसद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्ताववतिव्याप्तेर्वारणायाभाववद्रूपे प्रतियोगिव्यधिकरणत्वं बोध्यं हेत्व
भावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो बोध्यः तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यं तेन
द्रव्यत्वादौ साध्ये विशिष्टसत्त्वादौ नाव्याप्तिः न वा विशिष्टसत्त्वादिना तादृशाभावप्रतियोगिनि सत्त्वादावतिव्याप्तिः यत्रै
कव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिव्याप्यत्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिस्तत्र हेत्वभावस्य वन्ह्यादेः प्रत्ये
कं यावद्विपक्षावृत्तित्वादत आह साध्यवदिति अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं ६

नहि भवति नीलो घटो घटान्य इति नापीति साध्यसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वं सा
ध्यनिष्ठसामानाधिकरण्यप्रतियोगित्वं साध्यनिष्ठाधेयतानिरूपकाधिकरणवृत्तित्वमिति यावत् तदनधिकरण[illegible]
त्वमि[illegible]त्यर्थः साध्यवन्निष्ठस्य च साध्यनिष्ठाधेयतानि[illegible]रूपकत्वान् वृत्तौ नातिप्रसंगः साध्यनिष्ठाधेयतानिरू
पकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामा[illegible]कत्वमिति निष्कर्षः तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः
साध्यवेयदधिकरणं साध्यवन्निनाधिकरणवृत्तित्वं चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहाय द्वयमेवा[illegible]
नूद्य दूषयति तदुभयमपीति साध्येत्यादिः साध्यं यदधिकरणानधिकरणं तत्त्वाभावः साध्यस्य यदनधिकरणं तद्वृत्तित्वाभा
वश्चार्थः तत्र केवलान्वयिनि साध्यनिष्ठाधेयतानिरूपकाधिकरणाप्रसिद्ध्या नानाव्यक्तिसाध्यके चैकसाध्य[illegible]व्यक्तिनि
ष्ठाधेयतानिरूपकत्वात् साध्याधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः क्वचिद्व्यभिचारिण्यतिव्याप्तिश्चाद्ये द्वितीये च साध्यवे
यदधिकरणं यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदो विवक्षितः तदा केवलान्वयिनि यदि च यत्किंचित्साध्यवद्व्यक्तिभे
दः तदा नानाधिकरणसाध्यके सर्वत्राव्याप्तिः केचित्तु साध्येति साध्यासामानाधिकरण्यं हेतुतावच्छेदकसंबंधेन हे

त्वधिकरणेतेनैवसंबंधेनसाध्यवद्वृत्तित्वस्याभावः तदधिकरणभिन्नत्वमर्थः तेनधूमस्यसावयवेसंयोगेनवह्निमत्तिव्यस
मवायेनावृत्तावपिनक्षतिः तादृशाभावश्चसंबंधान्तरेणावर्तमानेसत्त्वम्ः व्यभिचारिण्यव्यभिचारनिरूपकाधिकरण
एवतादृशितादृशाभाववत्त्वं सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमित्यनुभवात् नचैवविशिष्टसत्त्वेअव्याप्तिः विशि
ष्टस्यातिरिक्तत्वात् अनतिरिक्तत्वेतुविशेषणविशेष्यसंबंधस्यैवपरंपराव्याप्यत्वात् केवलान्वयिनिचाव्याप्त्यभिधा
नद्वितीयलक्षणाभिप्रायेणेत्याहुः नचैवं सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमितिप्रतीतिर्हि द्रव्यत्वेगुणेनपृ
थिवीत्वसामानाधिकरण्यमितिवत्तत्तन्निष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परंपरासंबंधेनसामानाधिक
रण्यस्यवाअभावंगुणेअवगाहतेनतुसत्तायामेवद्रव्यवृत्तित्वाभावं सत्तानद्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभाववान्
सत्तावृत्तिरित्यादिसर्वजनसिद्धप्रतीतिबाधितत्वात् बाधकाभावात्संयोगतदभावयो[redacted]रवच्छेदकभेदेनएकत्रप्रती
त्याततदुभयोरेकत्रसिद्धिः अतीन्द्रियसाध्यकेअतीन्द्रियव्यभिचारिण्यातिप्रसंगाच्च तत्रसामानाधिकरण्याभावस्य
प्रत्यक्षासंभवेनासिद्धेः नचतदभाववद्वृत्तित्वेनतत्रतदनुमेयं तद्वृत्तिभिन्नत्वस्योपाधित्वात् किंचइदमिदानीमितिप्र
तीतिनियामकविशेषणताविशेषेणहेतुतायांसद्धेतावव्याप्तिः तेनसंबंधेनहेतुमत्तिकालेतेनसंबंधेनसाध्यवद्वृत्तित्वस्यवि ७

रहितोऽप्रसिद्धेरिति समवायित्वेति वाच्यत्वं प्रधानसमवायित्वप्राप्ते वक्ष्यते घटादिसमवायित्वेत्यपेद्रष्टव्याः प्रमे
यसाध्यके च भावत्वेनाभावानामभावत्वेन भावानां वह्नित्वेन निवेशे तौऽवृत्तिमात्रवृत्तिगगनत्वादिना विरुद्धघटत्वपटत्वाभ्यां
च प्रमेयमात्रस्याभावः सुलभः ननु पारिभाषिकमेवाव्यभिचरितत्वं तथा हि यत्समानाधिकरणाः साध्यतावच्छेदकावच्छि
न्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वं सर्वत्र वाच्यत्वाद्यभावस्य तथात्वा
द्यावत्त्वोपादानं अत एव मूर्तत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ द्वित्वाद्यवच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येपि भू
तत्वमनोन्यत्वाद्यभावस्य तथात्वान्नातिप्रसंगः साधनसमानाधिकरण गोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य वाक्ष
तथात्वात्साध्यतावच्छेदकेत्यादि येन संबंधेन हेतुस्तेन संबंधेन तदधिकरणं बोध्यं तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञा
नस्य विषयतयाऽधिकरणे घटादौ वर्तमानस्य साध्याभावस्य तथात्वेपि न क्षतिः एवं दत्वान्तरेपि संबंधभेदनिबंधनो
दोषः संबंधैक्यविवक्षया निरसनीयः रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव प्रलये परमाणावुत्पत्तिका
ले चावयविनि तत्सत्वात् न च प्रतियोगिवत्ताध्वंसप्रागभावयोरप्यत्यन्ताभावविरोधित्वे मानाभावात् अत एवान्तराश्यामेर
क्तरूपं नास्तीति प्रत्ययः न चैवं रक्तिमध्वंसाद्यवगाहि पूर्वापररक्तिमध्वंसप्रागभाववत्तिदानीं रक्तेपि तथाऽस्य प्रसं

द्वि
८ गात् तत्सामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यं तेन गोत्वजन्यद्रव्यत्वप्रलयावृत्तित्वादिना वा गवादेरभावस्य
गवाद्यनधिकरणध्वंसावच्छेदेन तद्वृत्तिकाले महाकाले वा वृत्तावपि यदा गोत्वं तदा गौः यत्र कालत्वं तत्र जन्यद्रव्यं प्रलयावृत्तिर्वेत्या
दौ नातिप्रसंगः हेतुमति प्रलये तत्सामानाधिकरण्याभावात् [illegible] विशिष्टेति विशेषणात् कपिसंयोगाभाववान् एतत्त्वादित्यादौ
संयोगाद्यात्मकस्य साध्याभावस्य सकलहेत्वधि [illegible] वृत्तित्वेऽपि नाव्याप्तिः जलादिवृत्तित्वविशिष्टभावस्याभावस्तु जलत्वा गोत्वा
द्यभावः न तु धूमाद्यभावः अलादावपि तदभावस्यैव प्रसंगात् ॥ यत्समानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापक
तावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत्र तेपत्वसा
दिना याच्यत्वादीनामभावस्तु सकलभः शेषं दृष्टं तद्दिशा अवसेयम् अत आह प्रतियोग्यवृत्तिश्चेति ॥ ॥ केचित्तु व्याप्यवृत्तौ हेतु
समानाधिकरणसाध्याभावस्य प्रतियोगितायाः अनवच्छेदकं हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरण
स्य वा अभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं वा यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्या
प्तिः एवं च व्याप्तेर्व्यभिचारिसंबंधरूपतापि संगच्छते हेतौ साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव साध्यता
वच्छेदके हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात् अवच्छेदकत्वं च हतत्स्यपो स्वाधिकरणत्वं तेन वि ८

शिष्टवत्त्वभावस्य ह्रदत्ववह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेपि वह्नित्वस्य न क्षतिः सत्त्ववति गुणादौ संयो
गाद्यभावोपि व्याप्यवृत्तिः वक्ष्यमाणं वा तत्प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यं भवति च
गुणत्वगुणान्यत्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरि
क्तवृत्त्यैव संयोगत्वमित्याहुः॥ ॥साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यावच्छेदकरूपसामानाधिकरण्येन साध्या
भाववत्त्वं यत्सामानाधिकरण्येन साध्याभावप्रमायां साध्यवत्ताज्ञानविरोधित्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं सर्वत्र सा
ध्याभावपदवैयर्थ्यात्॥ ॥यत्तु साध्याभाववति यद्वृत्तेः प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरिति तन्न अनुमित्य
विरोधित्वज्ञानस्यानुमितिहेतुत्वे साध्याभाववद्वृत्तित्वज्ञानस्यानुमित्यविरोधित्वया व्यभिचारिण्यतिप्रसंगात्॥ ॥
केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयान्येन तदधिकरणवृत्तित्वाभावात्तद्वृत्तित्वं साजात्यं च समानासमा
नाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण साध्याभावश्च पूर्वोक्तद्वितीयरीत्या प्रसेतव्यो व्याप्यवृत्तिश्च॥
प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यसमानाधिकरणो वा तेन तत्तत्साध्ययत्नेर्व्याप्यवृत्तेर्वा साध्याभाववत्तिवृत्ताव
पि हेतोर्नाव्याप्तिः तद्वृत्तित्वाभावस्तु तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताको ग्राह्यः

शि
१ तेन तत्तत्साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य द्रव्यत्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभाव
मादाय नातिप्रसंगः ~~अन्यच्च~~ हेतुतावच्छेदकसंबंधेन साध्याभाववद्वृत्तित्वं बोध्यं तेन वन्ह्यभाववति स्वावयवे धूमस्य वृत्ताव
पि न दोषः इत्थं च साध्याभावोपि हेतुतावच्छेदकसंबंधेन कस्यचिदधिकरणे वर्त्तमानो ग्राह्यः तेन जातिमान् सत्त्वादि
त्यादौ हेतुतावच्छेदकसंबंधेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः यद्वा यावंतस्तादृशाः साध्याभावाः प्रत्येकं ते
षां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रतिव्यापकत्वमव
च्छिद्यते तद्रूपवत्त्वं तत्त्वं साधनस्य तादृशाभावप्रतियोगित्वं तदवच्छेदकत्वं वा साधनतावच्छेदकस्येति तु न वाच्यं द्रव्यं स
त्त्वादित्यादौ सत्तादेः तादृशाभावव्यापकगुणकर्मान्यत्वविशिष्टसत्त्वाद्यवच्छिन्नप्रतियोगिताकतादृशाभावप्रतियो
गित्वादतिव्याप्तेः ज्ञेयं प्रमेयादित्यादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वादव्याप्तेश्च प्रमेयत्वव्यधिकरण
यद्वा प्रतियोगित्वस्याप्रसिद्धेः यावंतस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्र
तिव्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वमित्याहुः॥ ॥परे तु वृत्तिमद्वृत्तयो यावंतः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं
व्याप्तिः येन संबंधेन हेतुतावच्छेदकवृत्तिमत्त्वमपि बोध्यं तेन व्यधिकरणधर्मावच्छिन्नाभाववति संयोगेन यावृत्तिस्तद १

भावस्यजात्यादौ वर्त्तमानस्य धूमादावसत्वेपि न क्षतिः साध्याभाववश्च पूर्ववद्बोध्यः तद्वृत्तित्वाभावोपि स्वव्यापकतत्तत्साध्या
भाववद्वृत्तित्वत्वे व्यापकप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना
वाधर्मेण नवच्छिन्नप्रतियोगिताको वा बोध्यः तेनालोकाद्यवृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्तित्वस्य यत्किंचिन्नालाद्य
वच्छिन्नवन्ह्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेत्वंतरवृत्तेः
स्वस्मिन्नसत्वेपि न क्षतिरित्याहुः ॥ ॥ अन्ये तु वृत्तिमद्वृत्तियोयावत्तः साध्याभाववत्समुदायाधिकरणावृत्तित्वाभावास्तद्वत्त्वं
तादृशावृत्तित्वाभाववश्च स्वव्यापकतादृशावृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः प्रयोजनं चोक्तप्रायं साध्याभावाधिकरणावृ
त्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वात् व्यभिचारिण्यति व्याप्तेः समुदायेति ॥
साध्याभाववश्च साध्यतावच्छेदकसंबंधेन बोध्यः तेन समवायेन वन्हेः साध्यत्वे धूमे संयोगेन च तथात्वे वन्ह्यवयववत्त्वे पर्वतव
न्ह्यवयवसंयोगेन च पर्वतस्य वन्ह्यवयववत्त्वसंबंधद्वयावच्छिन्नवन्ह्यभावद्वयानधिकरणत्वेपि नातिव्याप्तिः तथा स्वव्याप
कीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोपि तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्धि पक्षावृत्तित्वाद्यवच्छिन्नप्रतियोगि
ताकाभावकूटाधिकरणाप्रसिद्धं तत्र संग्रहो पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववत्ति सामान्यादावर्त्तमाने द्रव्यत्व

शि
१०

प्रकारकप्रमाविषयत्वादौ नाव्याप्तिरिति व्याप्तिर्वो साध्याभाववत्त्वाहिनाऽभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसि-
द्ध्याऽव्याप्तिरित्याहुः तन्न द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति गुणादौ द्रव्यत्वा-
देरवृत्तेरतिव्याप्तेः अपि च इदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वादित्यादौ द्रव्यत्वत्वाद्यवच्छिन्नाभावकूटाधिकर-
णगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिव्याप्तेः द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसम-
व्याप्तत्वात् किं च रूपाभाववत्साध्यकसद्धेतौ साध्याभावसमुदायनिविष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धेः यावत्तामभावा-
नामेकाधिकरणे तावतां समुदाये विवक्षितेपि इदं पृथिवीवृत्तिगुणशून्यं सत्तान्यपृथिवीवृत्तिगुणशून्यं वा वायुत्वात् रूप-
वदन्यत्वाद्वेत्यादावतिव्याप्तिः तत्र तादृशसाध्याभाववत्तोभयरूपादिघटितत्वेन तद्वृत्तिहेतोरवृत्तेः वस्तुतो निखिला-
नामेव रूपाणां तादृशाभावसहत्वसमानाधिकरणत्वात् समानाधिकरणयावदभावाधिकरणाप्रसिद्धेर्दुर्वारैवेति-
किं च हेतुतावच्छेदकसंबंधेन या साध्याभाववद्वृत्तिस्तदभावो वक्तव्यः अन्यथा धूमादावव्याप्तिः साध्यतावच्छेदकसंब-
धेन साध्यस्याभाववति कालादौ वृत्तिमन्मात्रस्यैव वृत्तेर्व्यभिचारिण्यतिप्रसंगो वा तथा च सत्तादिसाध्यके संयोगेन समवाये- १०
न वा हेतावव्याप्तिः साध्याभाववति तेन संबंधेन वृत्तेरप्रसिद्धेः साधनसमानाधिकरणत्वेन साध्याभावो विशेषणीय इति

तिविशिष्टोक्तौ तथापि भूतत्वमूर्तत्वाद्योरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादित्यादावतिव्याप्तिः तत्र तादृशसाध्याभावसमुदायवत्ति
पृथिव्यादौ हेतोरवृत्तेः किंच महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशेषेण घटादिहेतावतिव्याप्तिः तादृशसा
ध्याभावसमुदायवत्ति महाकाले तेन सम्बन्धेन वृत्तिमन्मात्रस्यैव वृत्तेः॥ ॥एतेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छि
न्नप्रतियोगिताकव्याप्यवृत्तिस्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभाववृत्तिमद्वृत्तेर्यो यावत्तद्वत्त्वे व्याप्तिः केवलान्वयिनः
संयोगाद्यभावस्याभावाः संयोगादयो न व्याप्यवृत्तयः साध्यस्य गुणसामान्याभावो द्रव्यत्वाधिकरणे उत्पत्तिकालावच्छेदेन व
र्तमानोपि न व्याप्यवृत्तिः उक्तरूपावच्छिन्नप्रतियोगिताकाः क्वचिदप्रसिध्यादिसंपादकाः पुनरभावा न हेतुसमानाधिकरणाः उक्तस
मुदायाधिकरणवृत्तित्वतदभाववृत्तिमत्त्वादीनि पूर्वोक्तरीत्या प्रत्येतव्यानीत्यादिकमपास्तं॥ ॥ ॥नहि विशिष्टेति विशेषणतावच्छे
दकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात् तदभावप्रत्ययो हि घटत्वादिविशिष्टघटादेः प्रतियोगित्वमवगाहमानो विशेष
णस्यापि घटत्वादेः तदवच्छेदकत्वमवगाहते न स्वातन्त्र्येण घटो नास्तीत्येव प्रतीतेः तदिहाभावप्रत्ययो यदि व्यधिकरणधर्मेण
विशिष्टप्रतियोगिनं नावगाहते नावगाहत एव तदा तस्यापि प्रतियोगितावच्छेदकत्वं अथावगाहते तर्हि भ्रम एव न चातोऽप्रसि
द्धिरिति भावः यदि पुनरनुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्तीति प्रत्ययस्तदा तादृशाभावनिराकरणं गीर्वाणगुरूणामश

त्रि
११ साध्येति साध्यस्याभावाभावानधिकरणं येषु तेषामनधिकरणत्वं तदभाववद्वृत्तित्वमिति यावत् तस्मिन्सति साधिकरणत्वं तदवच्छिन्नाधिक
रणताकत्वं प्रतिसम्बन्धावच्छेदकत्वलाभात् तच्च हेत्वन्यूनवृत्तित्वं एवं च साध्यवदवृत्तिमत्केवलपदार्थाभाववत्त्वं यदधिकरणताया
अन्यूनवृत्तितत्त्वमिति फलितार्थः यथाश्रुतनिवेशे अधिकरणत्वस्य नैयत्यं हेतुतावच्छेदकसंबंधलाभाय वा तत्र येनयेन
संबंधेन योयः साध्यवदवृत्तिस्तेन तेन संबंधेन तत्तदभावो बोध्यः तेन साध्यवदवृत्तित्वं यदि साध्यतावच्छेदकसंबंधेन विवक्षितं
तदा समवायेन साध्यतायां साध्यवदसमवेतस्य सार्वत्रिकत्वात् सकलतद्वृत्त्यप्रसिद्धिः अथ तदभावो तादृशेनैव संबंधेन वा
च्यः तदा जातिमान्मेयत्वादित्यादावतिव्याप्तिः जातिमदसमवेतानां समवायेनाभावस्य केवलान्वयित्वात् अतएव न सं
योगेन समवायेन वा इदं न जातिमत् जातित्वादित्यादौ साध्यवदसमवेताद्यप्रसिद्धेश्च नापि साधनतावच्छेदकेन इदमेत
द्रव्यभिन्नं गुणत्वादित्यादावतिव्याप्तेः नापि विषयतया घटभिन्नं मेयत्वादित्यत्राव्याप्त्यतिव्याप्तेः सविषयमात्रस्यैव घटभि
न्नविषयकत्वात् घटनिर्विकल्पकेपि घटत्वादिभानात् नापि संबंधमात्रेण द्रव्यं सत्त्वादित्यादावतिव्याप्तेः वृत्तिमन्मात्रस्यै
व स्वरूपसंबंधेन महाकालवृत्तेः अवृत्तेरभावस्य केवलान्वयित्वादिति प्रत्युक्तं विशेषणताविशेषेण वा साध्यव
दवृत्तित्वं वक्तव्यं सर्वत्रैव तत्तद्वृत्तित्वे तत्तदन्यान्यत्वेन तत्प्रकारकप्रमाविषयत्वे वा तत्सुलभं तेनैव संबंधेन तदवच्छिन्न ११

सामान्याभावो वाच्य इति केचित्तु न च व्यस्तासेन साध्यानि साध्यविरोधीनि साध्यासमानाधिकरणानीति यावत् तानि सामानाधिकरण्यानधि
करणानि यस्य तत्वं साध्यसामानाधिकरण्याभावव्यापकाभावप्रतियोगिसामानाधिकरण्य [redacted] सामान्यकत्वमिति फलितार्थः
अत्र च साध्यसामानाधिकरण्यं साध्यतावच्छेदकसंबंधेन साध्यवति हेतुतावच्छेदकसंबंधेन वृत्तिः परं च सामानाधिकरण्यं हेतुतावच्छे
दकसंबंधेन हेतुमति तेनैव वृत्तिः तेन समवायेन पृथिवीत्वादेः साध्यतायां व्यभिचारिणि कालिकसंबंधेन हेतौ द्रव्यत्वादौ समवा
येन साध्यतायां समवायेन हेतौ सत्त्वगुणत्वादौ नातिप्रसंगः न वा संयोगेन वन्ह्यादौ साध्ये समवायेन तद्व्याप्यस्य तत्प्रविशेषादेः का
लिकसंबंधेनाधिकरणकाले स्पंदादौ च तत्परिमाणस्य स्पंदत्वादेः समवायेन तदधिकरणे घटादेः संयोगेन वृत्तावपि वा प्रसंगः
संबंधविशेषणाव्याप्यत्वलाभाय साधिकरणत्वमित्याहुः तच्चिंत्यं यथाश्रुतयथासंभवं विकल्प्य दूषयति नेत्यादि नन्वप्रतियोगि
पदेन प्रतियोगितानवच्छेदकावच्छिन्नत्वं वक्तव्यमत आह द्रव्यत्वादेरिति प्रतियोगिविरोधित्वं तदधिकरणावृत्तित्वं व्याप्यवृत्तित्वं
स्वासमानाधिकरणात्यंताभावाप्रतियोगित्वं अधिकरणेति तथा सत्यभाव एव न सिध्येदिति भावः संयोगाद्यभावस्य च द्रव्ये प्र
तियोगिसामानाधिकरण्यमव्याप्यवृत्तित्वं च प्रतियोग्यधिकरणीभूतद्रव्यवृत्तित्वं स्वाधिकरणीभूतद्रव्यनिष्ठात्यंताभावप्रति
योगित्वं गुणे च प्रतियोग्यसामानाधिकरण्यं व्याप्यवृत्तित्वं च प्रतियोग्यनधिकरणीभूतगुणवृत्तित्वं स्वाधिकरणीभूतगुण

निष्ठात्यंताभावाप्रतियोगित्वं एतानि च न भेदकानि अविरोधात् सामान्यतश्चैव व्याप्यश्चेत्तौ प्रतियोगिसमानाधिकरणो च न
तस्य व्यतिरेक इति भावः ननु साध्यवान्यस्येति साध्यवत्तिसंबंधोऽन्वेष्टव्यः स चाधिकरणत्वं साध्यसाधनयोरपि सामा
नाधिकरण्यमेवेत्यतो दूषणांतरमाह साध्येति साध्यत्वसाधनत्वे व्याप्तिप्रतियोगित्वानुयोगित्वे यत्तन्मात्रमेव व्याप्तिर्नि
र्वक्तव्येत्यत आह वन्हिमदिति ननु धूमसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नं न भवति तद्रू
पावच्छिन्नेन सममेतस्य सामानाधिकरण्यं व्याप्तिरित्यर्थः न च धूमसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदको
वन्हित्वावच्छिन्नो वन्हिः धूमवान्वन्हिमान्नेत्यप्रतीतेरित्यत आह विशेषेति यद्वा प्रत्येकं वन्हिमद्भेदाः धूमसमानाधि
रणास्तत एवैकाधिकरणवृत्तित्वावच्छिन्ना वन्हिमत्सामान्यभेदबुद्धिमुत्पादयंतीति तत्प्रतियोगितावच्छेदकश्च वन्हित्वाव
च्छिन्नो वन्हिरिति भवत्यव्याप्तिः साधनेति वैयधिकरण्यं तदनधिकरणवृत्तित्वं तच्च केवलान्वयिनः साध्यस्याप्रसि
द्धमिति प्रसंजकं च पृथिवी द्रव्यत्वादित्यादौ अतः समानाधिकरणोपादानं धूमादेरपि वन्ह्यादिसमानाधिकरणद्रव्य 

त्वाद्यनधिकरणवृत्तित्वमतो यावदिति यद्यपि पृथिवीत्वादिसमानाधिकरणघटत्वपटत्वाद्यनधिकरणवृत्तित्वं द्रव्य
त्वादेः तदनधिकरणमात्रवृत्तित्वं च न निखिलघटपटादिरूपाणां तथापि तादृशधर्मानधिकरणमात्रवृत्तित्वानवच्छेद
कसाध्यतावच्छेदकत्वं बोध्यं नहि पृथिवीत्वादिसमानाधिकरणः तादृशः कश्चिदेको धर्मो यदनधिकरणमात्रवृत्तित्वावच्छे
दकं रूपत्वादि धूमत्वादिकं तु वह्न्यादिसमानाधिकरणायोगोलकत्वाद्यनधिकरणमात्रवृत्तित्वावच्छेदकं न तदवच्छेदकत्वं च त
दनतिरिक्तवृत्तित्वं न च स्वतन्त्रधर्मावृत्तित्वं तेन मेयत्वसमानाधिकरणगुणत्वाद्यनधिकरणमात्रवृत्तित्वानधिकरणगग
नादिवृत्तित्वेपि द्रव्यत्वस्य द्रव्यसाध्यकमेयत्वेनातिप्रसंगः वस्तुतस्तु तादृशधर्मानधिकरणमात्रवृत्तित्वावच्छिन्नाधिकरण
ताकत्वं तदवच्छेदकत्वं वाच्यं तेन सत्ताद्रव्यत्वोभयवान् गुणान्यत्वविशिष्टसत्तावान्वा जातिमत्वादित्यादौ नातिप्रसंगः सत्ता
यां गुणत्वाभाववन्मात्रवृत्तित्वविरहेपि उभयत्वावच्छिन्नाधिकरणताया गुणत्वाभाववन्मात्रवृत्तित्वात् प्रमेयत्वादेरिति ननु
व्यतिरेकित्वेन धर्मो विशेषणीयः वस्तुतस्तु यावत्वं तादृशस्यैकस्यापि निर्वैयधिकरण्यावच्छेदकमेतावन्मात्रस्फोरणाय
तथा च साध्यसमानाधिकरणधर्मनिरूपितवैयधिकरण्यावच्छेदकं यच्च तद्भिन्नधर्मवत्ता यावत्तादृशावच्छेदकत्वशून्य

शि
१२ धर्मवत्तावात्समं सामानाधिकरण्यमिति पर्यवसितं अतो दूषणान्तरमाह महानसादाविति तथा च तदनधिकरणत्वं तदभावाधिकर
णत्वं तद्भिन्नत्वं वा द्रष्टव्यमपि दुष्टमित्यर्थः एतेन तदधिकरणावृत्तित्वमात्रं वैयधिकरण्यमिति परास्तं समवायितया महानस
वृत्तित्ववह्नेर्नास्तीति प्रतीतेर्वह्न्यादेरपि तादृशवैयधिकरण्याधिकरणत्वात् संबंधविशेषेण वैयधिकरण्यविवक्षायां
नोक्तदोष इति ध्येयं उपाधिपदस्य साध्यसमव्याप्तवचनतया आत्माश्रयप्रसंगादाह साध्यव्यापकइत्यादि व्यापकत्वं
व्याप्तिनिरूपकत्वं आत्माश्रयादिग्रस्तमतआह तद्वन्निष्ठेति यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिको वा तत्रापि व्याप्यवृत्तिर
खंडाभावेन तत्तद्भिन्नत्वप्रकारकप्रमाविषयत्वाभावादिर्व्याप्तिः यदि च तस्यापि विशेषणान्तरविशिष्टस्य हेत्वाद्यवच्छि
न्नस्य वा तत्राभावसंभवस्तदा साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकीभूतसाधनसमानाधिकरणात्यं
ताभावप्रतियोगितावच्छेदकधर्मवत्त्वं दलद्वयार्थो बोध्यः अनवस्थां निरसितुमाह प्रतियोगित्वमिति सहेति एकदे
शकालावच्छेदेनेति पूरणीयं तेनाव्याप्यवृत्तेरभावस्य प्रागभाव देश्च प्रतियोगितायामव्याप्तिः अन्योन्येति अत्र स
मवायादिसंबंधावच्छिन्नप्रतियोगिताकाभाववति महानसादौ संयोगादिना वह्न्यादेर्वृत्तेर्येन संबंधेनाभावस्तद्वृत्तित्वेना १२

वृत्तिर्वक्तव्या इत्थं च तेन संबंधेनासंबद्धत्वोक्तौ नायं दोषः अन्योन्याभावस्य तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकतया तद्वृत्तितेन
संबंधेन प्रतियोगिनोऽसंबंधत्वात् परं तु सत्तायाः समवायेनाभावप्रतियोगितायामव्याप्तिः तद्वृत्तिसमवायेन वृत्तेरप्रसिद्धेः ता
दृशस्वसंबद्धाधिकरणावृत्तित्वस्याभिधाने च व्यधिकरणसंबंधावच्छिन्नाभावप्रतियोगितायामव्याप्तेः सिद्धांतलक्षणवक्ष्य
माणरीत्या च खंडशः प्रसिध्या तत्परिहारो ध्येय इति ध्येयं अभावविरहत्वमिति नवान्योन्याभावप्रतियोगितावच्छेदकयोरप्र
सक्त्वतिप्रसक्तौ प्रकृतोपयोगिप्रतियोगिताभावस्य लक्ष्यत्वे तु लक्षणेऽत्यंतपदवैयर्थ्यं सर्वत्र नित्यस्य नित्यसाधारणरूपावच्छि
२ न्नस्य वोपाधिताऽसंभवात् इतरेषां तु भेदप्रतियोगितावारणाय संसर्गाभावपरतया तस्य सार्थकत्वादिति वाच्यं विरहपदस्य तत्तत्प्र
तिबंधकत्वानविषमार्थकत्वात् प्रतिबध्यातिहितादात्म्येन प्रतियोगितानभन्योन्याभावबुद्धिं प्रतिबंधकत्वं चात्रैककालावच्छेदेनै
कत्रावर्तमानत्वं अभावपदस्य चैस्वाभावपरत्वात् वस्तुतस्तु एकसंबंधावच्छिन्नायास्तत्समानाधिकरणाभावप्रतियोगिताया अ
नवच्छेदकमपि भवत्येव संबंधांतरावच्छिन्नायास्तस्या अवच्छेदकमतो यत्संबंधावच्छिन्नायाः साध्यसमानाधिकरणाभावप्रतियोगितायाः
अनवच्छेदकं तत्संबंधावच्छिन्नाया एव साधनसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्वाच्यं तथा च संसर्गाभावत्वमनुपादेयमे
व घटादेरसंसर्गसमवायसत्वव्यधिकरणसंबंधेन सत्वस्य प्रतियोगिनः तादृशाभावे मानाभावात् स्वाभावसंबंधस्य स्वाभावत्वा त्व

शि
१४

नविषयत्वस्य वाच्यत्वयोः सर्वत्रासंभवित्वात् स्वाभावेत्यादौ षष्ठ्यर्थप्रतियोगितायाः प्रवेशात् तत्र स्वरूपसंबंधस्यैव शरणीकरणीयतया तस्यै
वावश्यकत्वेन तथात्वानिरुक्तात् अभावत्वप्रतिबंधकत्वयोः प्रतियोगिताघटितत्वात् तथाविधव्यवहारविषयस्यापि विना प्रतियोगि
तानिर्वक्तुमशक्यत्वात् यत्साध्याव यत्समानाधिकरणसाध्यस्य तथाहीत्यादि यत्समानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं या २
वत्साध्यसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं साध्यसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकं याव
त्साधनसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकमित्यर्थेनोक्तदोष इति ध्येयं प्रतियोगितयोः एकसंबंधावच्छि
न्नत्वं विशेषणताविशेषावच्छिन्नत्वं वा वक्तव्यं तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किंचित्संबंधावच्छिन्नसाध्यसमानाधि
करणात्यंताभावप्रतियोगितावच्छेदकत्वेपि एकसंबंधावच्छिन्नसाध्यसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकस्य
संबंधांतरावच्छिन्नसाधनसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकत्वेपि न क्षतिः व्यभिचारिणि वयत्राधिकरणे व्यभिचा
रो विशेषणताविशेषावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकं साध्यत्वप्रकारकप्रमाविशेष्यत्वं विशेषणताविशेषावच्छि
न्न साध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नातिप्रसंगः वस्तुतो यत्समानाधिकरणान्योन्याभावप्रतियो
गितावच्छेदकं यावद्यद्धर्मावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यं साध्य १४

समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं यावत्साध्यसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं तत्त्वं व्याप्ति
रिति ध्येयं साध्यमिति यावत्तांतेषामित्यर्थः इति केवलान्वय्यव्याप्त्या साच यथोक्तलक्षणोपि गौरवपरमतिरिच्यतइति ॥ ॥
कृत्स्नसाधनस्यसाध्यस्यसाध्याश्रयस्यसाध्यसमानाधिकरणस्यसाधनाश्रयस्यसाधनसमानाधिकरणस्यका आद्ये
कृत्स्नसाधनसामानाधिकरण्यं साध्ये कृत्स्नेषु साधनेषु साध्यसामानाधिकरण्यं वार्थः प्रथमे एकैकतिनानेति च व्याप्तेश्च
हेतुवृत्तित्वे पृथिवी पृथिवीत्वव्यापकजातेरित्यादावतिव्याप्तेश्च अतएवनेतरः अर्थाभिधानपूर्वकं द्वितीयं निर
स्यति अतएवेति अतएव एकव्यक्तिसाध्यकाव्याप्तेरेव विषमव्याप्ते समव्याप्तेपि च संख्यापरिमाणादावेकत्रसाधने
सकलसाध्यसंबंधस्याभावात् भावाश्च द्रव्यवान् द्रव्यत्वादित्यादौ तृतीये साध्याश्रयमात्रवृत्तित्वं चतुर्थे च साध्यसमानाधि
च करणायावत्सामानाधिकरण्यमर्थः तत्रैयथासंभवमेकमात्रवृत्तिसाध्यके वन्ह्यादौ साध्ये धूमादावव्याप्तिः अतिव्याप्तिश्च
सत्वादौ अर्थपरिष्कारपूर्वकं पंचमं निरस्यति नचेति एकमात्रवृत्तिके साधने चाव्याप्तिः तथैव षष्ठं निरस्यति नापीति ता
दृशानां सर्वेषां महानसत्वादीनां प्रत्येकनिरूपितान्यपि सामानाधिकरण्यानि न कुत्रापि वन्हौ अपय ऽभावच्छिन्नसा

व्यसामानाधिकरण्यत्वेन साधनसामानाधिकरण्यव्यापकत्वं तद्रूपावच्छिन्नसामानाधिकरण्यं विवक्षितमिति चेत् इ
तोपि लघुतरं साधनव्यापकतावच्छेदकरूपावच्छि [redacted] न्नसामानाधिकरण्यमेव व्याप्तिरिति सिद्धांतयिष्यत इति अविने
ति साध्यं विना साध्याभाववत्तियो [redacted] भावः वृत्तिः तद्विरहः साध्यं विना अभावः साध्याभावव्यापकीभूताभावप्रतियोगि
त्वं वा अन्वेति संबंधः सामानाधिकरण्यं व्यभिचारिसंबंधस्य केनचित् किंचिद्रूपावच्छिन्नेन धूमादेः पिंडव्यक्त्यादिना
वन्हिव्यापकत्वात् तद्बोधादिति न च व्यभिचाराग्रहसहकृततद्बोधस्तथा व्यभिचारतद्व्यतिरेकयोरनुपस्थितावपि
समानाधिकरण्यधर्मवत्ताज्ञानमात्रादनुमित्युत्पादस्य सर्वानुभवसिद्धत्वात् हेत्वंतरे तत्रैव च हेत्वंतरेण व्यभि
चारग्रहे हेतुतावच्छेदकाग्रहेप्यनुमितेरुत्पादाच्च विवदंते च सामानाधिकरण्यज्ञानस्यैव हेतुतायां व्यभिचारज्ञा
नाभावकारणतामपेक्ष्य चकारणीभूतसामानाधिकरण्यज्ञाने लाघवेनाव्यभिचारस्यैव विषयत्वस्यावच्छेद
कत्वमुचितं न चाव्यभिचारसंशयेऽनुमित्यनुदयात् व्यभिचारनिश्चयत्वेन कारणत्वे गौरवं व्यभिचारज्ञानस्य
भ्रमत्वनिश्चयदशायामेवानुमितिविरोधितया भ्रमत्वेनानिश्चीयमानस्य तस्य विरोधित्वं वाच्यं अन्यथा व्यभि

चारनिरूपणस्य प्रमेयत्वं कामामप्यनुमित्यजनकतया प्रमत्वेनागृह्यमाणस्यैव हेतुत्वमिति तत्रैव च गौरवात् नानाविध
व्यभिचारस्य नाभावानां नियतपूर्ववृत्तित्वेन क्लृप्तानामेव हेतुत्वमपेक्ष्य वक्ष्यमाणैकविधव्यभिचारज्ञानस्य हेतुत्वं युक्तमित्या
हुः सामानाधिकरण्यविशिष्टपक्षधर्मत्वं तु पक्षे साध्यग्रहं विनादुर्ग्रहमिति केवलान्वयित्वस्याग्रहे सामानाधिकरण्य
मात्रग्रहादनुमित्यनुत्पत्तेस्तद्ग्रहोऽपि वाच्यः तद्वद्वृत्तिमदत्यन्ताभावाप्रतियोगित्वादिकं अन्योन्याभावप्रतियोगितानवच्छेदक
त्वं वा तथा च सर्वसाधारण्याय लाघवात् साधनवतः तद्वृत्तित्वस्य वा वृत्तेरन्योन्याभावस्य वा विशेषणत्वमुचितमिति सिद्धा
न्तरहस्यं शेषं केवलान्वयिग्रन्थे वक्ष्यामः॥ ॥ ॥प्रतियोग्यसमानाधिकरणेति॥ ॥प्रतियोग्यसमानाधिकरण
यद्रूपविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यं
तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्यर्थः इदं च व्याप्तौ साध्ये परं परास्तं बहुदेशत्वादिकमेव साध्यतावच्छेदकमतो
नाव्याप्तिः इत्थं चेदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सत्ताद्यधिकरणगुणनिष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वादेर्नो
व्याप्तिः साधनस्य विशिष्टसत्त्वादेर्गुणादावृत्तेः सामानाधिकरण्यघटकीभूतेऽभेदेऽपि निरूपकतावच्छेदकस्याधिकरणता

त्रि
१६ वच्छेदकत्वं चैकव्याप्तेरैक्यं यस्त्वनस्तु धूमत्वादिविशिष्टव्यापकसामानाधिकरण्यस्य रासभादिसाधारणत्वात् धूमत्वादि
मत्तिताद्रशसामानाधिकरण्यं तद्धूमत्वादिकं वा व्याप्तिः एवं चाभिन्नाद्वितीयात्वभिन्नैवेति ध्येयं व्यापकपिसंयोगी
एतद्वृक्षत्वादित्वादिसंग्रहायासमानाधिकरणान्तं यत्तु इदं संयोगी द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत्तु संयोगस्य शाखा
वच्छेदेन वृत्तेर्वृक्षत्वावच्छेदेन सामान्याभाववत्तौ विरोधाभावात् तत्र चातीन्द्रियसंयोगस्यापि सत्वात् यदि तः प्रतियोग्युप
लब्धे दोषाद्वृक्षत्वेन संयोग इत्यादि साध्यस्यापिति तत्र द्रव्ये संयोगसामान्याभावे मानाभावात् न च योयद्रव्ययावद्वृक्षे
षाभाववान् सत्तसामान्याभाववानिति व्याप्तेर्यावत्संयोगाभाव एव मानं यत्तदर्थयोरननुगमात् एकावच्छेदे
न यावद्विशेषाभाववत्वस्योपाधित्वाच्च एतेनापसंयोगसामान्याभाववान् यावत्संयोगविशेषाभाववत्वादि
तिपरास्तं व्यर्थविशेषणत्वात् अप्रयोजकत्वान्निर्गुणत्वा [illegible] धित्वाच्च न च प्रतियोग्यनवच्छेदकत्वं
वद्वृक्षत्वादेरभावावच्छेदकत्वं गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसंगात् यथा च घटपूर्ववर्त्तित्व
स्य प्रतिदण्डवह्निसामानाधिकरण्यस्य वा प्रतिधूमभिन्नत्वेपि दण्डत्वं धूमत्ववात्तत्सामान्यस्यावच्छेदकं तथैव संयोग १६

सामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापि स्फवचनत्वाच्चेति संप्रदायः नवीनाः पुनरुत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्र
लयावच्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्त्तते तथा धूमत्ववत्यपि गिरौ दहनस्य इह पर्वते नितंबे हुताशनः न शिख
र इति प्रतीतेः संयोगेन द्रव्यस्याप्यव्याप्यवृत्तित्वात् वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतोऽव्याप्यवृत्तित्वस्यात्यन्तासंभवित्वाच्च एवं
प्रतियोगिमत्यपि कालदेशयोर्देशकालभेदावच्छेदेन तदभाव इति तत्साध्यकाव्याप्तिवारणाय तत्तत् नोपादेयं च सर्व
त्रैवाव्याप्यवृत्तिसाध्यके साध्यभेदेन व्याप्तिभेदादिति वदन्ति प्रतियोग्यसामानाधिकरण्यं च प्रतियोगितावच्छेदकावच्छि
न्नासामानाधिकरण्यं तेनायं गुणकर्मान्यत्वविशिष्टसत्तावान् जातिमत्त्वात् भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ नाति
प्रसंगः नचोभयत्वमेकविशिष्टापरत्वं विशिष्टं च केवलादन्य दिति तदभावो मनसि सहजत एव प्रतियोगिव्यधिकरण
इति वाच्यं तदुभयत्वं हि न विशिष्टत्वादनतिरिक्तं यथा तद्वह्निनाभावः तद्वह्निनाभावात् वैशिष्ट्यविरहेऽपि घटत्वपटत्वयो
रुभयत्वस्योभयत्वेन तदभावस्य प्रत्यक्षसिद्धत्वात् न च तत्र व्याप्तिरेव उभयत्वाधिकरणस्य मूर्त्तत्वस्य मनस्यसत्त्वादिति वा
च्यं तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वात् मात्रोभयमिति प्रतीतेर्दुर्वारत्वात् अत्यन्तपदं चात्यन्ताभावत्वनिरूपकप्रति

योग्यसामानाधिकरण्यस्यात्यन्ताभावत्वनिरूपकप्रतियोगिताया अलाभाय अन्यथा सर्वस्यैवाभावस्य स्वसमानाधिकरणाभा
वान्तरभिन्नत्वात् भेदस्य स्वरूपानतिरिक्ततया प्रतियोग्यसमानाधिकरण्यस्य दुर्लभत्वापत्तेः सर्वेषामेवाभावानां हेतुसमा
नाधिकरणात्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणाभावान्तरात्मकत्वभेदस्य प्रतियोगित्वाद भा व सा
ध्यकाव्याप्त्येति संप्रदायः अप्यपदार्थो वं तदा गौरित्यत्राति व्याप्तिः प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वात्
संसर्गाभावमात्रोक्तावपि यदा स्यं दूत्तदा घणुकं यदा [redacted] दृष्टं तदा जन्यं ज्ञानं दुःखं वा यदा तस्याद्दृष्टं तदा तदीयं ज्ञानमित्या
दावतिव्याप्तिः घणुकत्वादेर्घणुकादिसमूहस्य चैवं प्रलयनिष्ठध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात् न हि तयोः सामा
न्याभावत्वमते पि एकविशेषप्रागभावविशेषान्तरध्वंसवत्यपि समये सामान्यावच्छिन्नध्वंसप्रागभावयोः संभवद् इति चेन्न
प्रतियोगिमत्तद्वृत्तध्वंसादिमत्तोपि कालस्यात्यन्ताभाववत्त्वेपि विरोधाभावात् अन्यथा अत्यन्ताभावस्य कालमात्रावृत्तित्वप्रसं
गात् इयांस्तु विशेषः यदेकस्य देशाभेदावच्छिन्नं तथात्वं अपरस्य तु स्वरूपावच्छिन्न [redacted] मिति कालस्यैव कालो देशः स्या
प्यवच्छेदकत्वात् तच्छून्ये च काले तदभावस्य प्रतियोगिव्यधिकरणत्वात् न च संसर्गाभावविशेषो अत्यन्ताभावः संसर्गाभा
वत्वं च संसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपं जन्यतावच्छेदकनियमघटितमिति वाच्यं तद्दन्यावृत्तित्वरूपनियमस्यात्र १८

च्छेदकत्वात् एवं नियमांतरस्याप्रवेशेपि न क्षतिरित्याहुः वक्ष्यते च नियमाघटितमेव संसर्गाभावादिलक्षणं अनुपदमेव विवेचयि
ष्यते संसर्गाभावत्वनिवेशप्रयोजनविरहो अव्याप्तिश्च अप्रमेयवान् द्रव्यत्वात् विशेषगुणवान्मनोन्यद्रव्यत्वात् जातिमान् अभा
वत्वात् इत्यादौ समवायेन ज्ञानादेः साध्यतायामतिव्याप्तिः साध्यशून्यानामपि हेतुमतां विषयत्वविशेषणत्वएकार्थसमवायैः सा
ध्यवत्वात् नैवं प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिनो यदधिकरणं संबंधि यत्तद्वृत्तित्वाभावस्योक्तत्वात् भवति चैवमन्यो
न्याभावेपि प्रतियोग्यसमानाधिकरणः तद्विशिष्टस्य च हेत्वधिकरणावृत्तित्वं बोध्यं तेन नाव्याप्यवृत्तिसाध्यकासंग्रहः तद्वृ
त्तिभिन्नत्वं तु नार्थः अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसंगात् अत्र च सामानाधिकरण्यवत्तान्नतद्भाववत्त्वं प्रतीतेर
न्यथोपपादितत्वात् इत्यस्वरसात् प्रतियोगिवैयधिकरण्येत्यादिविशेषणं वक्ष्यति तत्र हेत्वधिकरणे बोध्यं प्रतियोग्यनधि
करणीभूतहेत्वधिकरणावृत्त्यभावेति पुनरर्थांतरनिष्कर्षः ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित् तत्सामान्यस्य
वा प्रतियोगितावच्छेदकयत्किंचित्तदवच्छिन्नस्य वा अनधिकरणत्वमुक्तं आद्ये अव्याप्यवृत्तिसाध्यकाव्याप्तिः एकप्रति
योग्यधिकरणस्यापि तत्तद्व्यक्त्यंतरानधिकरणत्वात् द्वितीये संयोगसामान्याभाववान् द्रव्यत्वाभाववान्वा सत्त्वादित्यादावति

त्रि

१८ व्याप्तिः साध्याभाववत्तो द्रव्यस्य तत्प्रतियोगिसंयोगविशेषाभाववत्त्वात् नित्यत्वा [redacted] दिविशिष्टद्रव्यत्वाभावात्मकप्रतियो
गिनोऽधिकरणत्वाच्च स्वाभावाभावात्मकस्य विशिष्टस्यापि द्रव्यत्वस्य द्रव्यत्वानतिरेकात् तृतीयेकपिसंयोगाभाववाना
त्मत्वादित्यादावव्याप्तिः साध्याभाववानीकपिसंयोगानां गुणानामनधिकरणस्याप्यात्मनस्तत्प्रतियोगितावच्छेदकगुण
सामान्याभावत्वावच्छिन्नानधिकरणत्वात् मैवं यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत्तस्तदवच्छेदक
त्वस्योक्तत्वात् अन्यथा त्वसामानाधिकरण्ये हेतौ यादृशसंबंधः प्रविष्टः तेन संबंधेन यो हेतुमान् तत्र वर्त्तमानत्वमभाव
स्य साध्यस्य च यादृशसंबंधः तत्संबंधावच्छिन्नायाश्च प्रतियोगिताया अनवच्छेदकत्वं बोध्यं तेन धूमसमवायिनिष्ठाभावस्य सं
योगावच्छिन्नप्रतियोगितायाः धूमसंयोगिनिष्ठाभावस्य च समवायावच्छिन्नप्रतियोगितायाः अवच्छेदकत्वेपि वह्नित्वस्य न क्ष
तिः यद्वा साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधित्वं हेतुमत्तो बोध्यं तथा च संबंधभेदेन प्रतियोगिता न विशेषणीया एवं
व्याप्ते सामानाधिकरण्यादौ संबंधित्वं निवेशनीयं न त्वधिकरणत्वं तथा च धर्मिणोपि व्यापकत्वं व्याप्यत्वं च निर्वहति तथा
हि तादात्म्यसंबंधेन धूमवत्तः संबंधिनि महानसे वर्त्तमानो योऽन्योन्याभावस्तस्य तादात्म्यसंबंधावच्छिन्नाया प्रतियोगिता १८

तदनवच्छेदकवह्निमत्त्वावच्छिन्नस्य वह्निमत्तादात्म्यसंबंधेन संबंधिनि महानसे धूमवत्तादात्म्येन संबंधित्वं एवं
धर्मिणो धर्मव्यापकत्वव्याप्यत्वे बोध्ये अत एव जलादीनां पृथिवीत्वाभाववद्व्याप्यत्वं तत्रेतरत्रोक्तं संगच्छते यथा च यादृशेन
संबंधेन हेतोर्व्याप्यता गृहीता तादृशेन संबंधेन तस्य पक्षविशिष्टज्ञाने यादृशेन संबंधेन च साध्यस्य व्यापकत्वमवग
तं तादृशेनैव पक्षसाध्ययोः वैशिष्ट्यानुमितिः तेन संयोगेन धूमावयवे न वा पर्वते समवायेन वह्निधीः तथैवावगत
व्यापकताघटकसंबंधेन व्यापकस्याभाववत्त्वेन गृहीतव्याप्यताघटकसंबंधेन व्याप्यस्याभावः सिध्यति कथमन्यथा
समवायेन वह्निविरहिणि पर्वते संयोगेन संयोगेन वा वह्निविरहिण्यवयवे धूमः समवायेन न निवर्तते निव
र्तते च संयोगेन वह्निविरहिण्यवयवे संयोगेनेति नियमोपपद्यते तथा च तादात्म्यसंबंधेन जलादीनां व्याप्य
त्वग्रहात् व्यापकनिवृत्त्या तादात्म्येनैव तेषामभावः सिध्यति स एव चान्योन्याभावः इत्थमेव तादात्म्यात् वृक्ष
शिंशपयोरपि व्याप्तिनिश्चय इति संगच्छते अत एव गोत्ववान् यत्र हृदशायां [redacted] यत्र सास्नादिः सा गौरिति तादा
त्म्येन गोर्व्यापकत्वग्रहे तादात्म्येन सास्नादिमान् गौः तादात्म्येन गोव्यतिरेकाच्च सास्नादिव्यतिरेकः सिध्यति एवं च

शि
१९ संयोगेन गगनादेरपि द्रव्यत्वव्याप्यत्वं वृत्त्यनियामकसंयोगाभावस्याभावप्रतियोगितावच्छेदकसंबंधत्वघटितत्वे साध्यतावच्छेदक
संबंधेन प्रतियोग्यसंबंधित्वाभिधाने वा पृथिवीत्वादिव्यापकत्वमपि तदभाववत्तोऽपि पृथिव्यादेः संयोगेन तत्संबंधित्वात् सिद्धिर
पि तस्य तथैव न तु वृत्तिनियामकेन संबंधेन तेनासंबद्धत्वात् अव्यापकत्वाच्च व्यक्तीभविष्यति चेदमुपरिष्टात् न च द्रव्याति
रिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य विशेषणताविशेषेण व्याप्यवृत्ति किमपि व्यापकं न स्यात् स्वावच्छेदकसंबंधेन प्रतियो
गिनोऽसंबंधिनि काले वर्तमानस्याभावस्य प्रतियोगितायां तत्संबंधावच्छिन्नत्वस्य तेन संबंधेन यत्प्रतियोगिसंबंधितदन्यत्वस्य
च काले असंभवात् ननु एतादृशसंबंधेन हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसामान्यक
त्वं वक्तव्यं तथा चावृत्तिगगनात्यन्ताभावद्वारिकैव तथात्वप्रसिद्धिः सत्ताद्यधिकरणकर्मादौ समवायेन सत्तासामान्यस्य संयोग
सामान्यस्य वावृत्तेर्नातिप्रसंगः भूतत्वमूर्तत्वोभयत्वविशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टादिकं तु न मनोगुणादिवृ
त्ति संयोगसामान्यं तु न किंचिद्व्यावृत्तमिति वाच्यं विशिष्टस्यानतिरिक्तवृत्तित्वात् समवायेन जातेः साध्यत्वे मेयत्वादावतिव्याप्तिः
जातिमन्निष्ठतादृशाभावप्रतियोगितायाः जातित्वेनानवच्छेदात् जातिशून्ये च समवायेन वर्तमानस्याप्रसिद्धत्वात् संयोगादिसा
ध्यकगुणकर्मान्यत्वादौ अतिव्याप्तिश्च अद्रव्ये हेतुमति समवायेन वृत्तेरप्रसिद्धेः द्रव्ये च संयोगादेरपि वृत्तेः नैवं साध्यता १९

यच्छेदकसंबंधसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभावस्य
विवक्षितत्वात् धूमसंयोगे हेत्वधिकरणायोगोलका नुयोगिकत्वस्य चैत्रान्यत्वविशिष्टेन दंडसंयोगे दंडाधिकरणचै
त्रानुयोगिकत्वस्य गुणकर्मान्यत्वविशिष्टसत्तासमवाये चात्माद्यधिकरणगुण कर्मानुयोगिकत्वस्य विरहान्नातिप्रसंगः स्वरू
पसंबंधेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियो[redacted]ग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वयद्धर्मा
वच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नस्य व्यापकत्वं बोध्यं समवायसंबंधेन मेयसामान्य[redacted]भावस्य सामान्य[redacted]दोस
त्वात् मेयत्वादेरप्यभावप्रतियोगितावच्छेदकत्वेस्फुलभं अत एव समवायस्यैकत्वेन द्रव्यत्वादिप्रतियोगित्वगुणाद्यनुयोगित्वोभ
यवत्त्वेपि द्रव्यं जातेरित्यादौ वन्हिधूमोभयवान्वन्हेरित्यादौ संयोगस्य वह्नित्वावच्छिन्नप्रतियोगिताकत्वविरहेपि च नातिव्याप्तिरित्यपि
नि वदंति प्रतियोगित्वादिरूपसंबंधविशेषः न संबंधित्वेन विष्टः सामानाधिकरण्येपि संबंधः संयोगत्वादिनैव निविशते दर्शितं च
नियमाघ— टितमपि संबंधत्वं अभावत्वं चेदमिह नास्ति इदमिदं न भवतीत्यादिप्रतीतिनियामको भावाभावसाधारणो स्वरू
पसंबंधविशेषः अतो नाभावसाध्यकव्यभिचारिण्यतिप्रसंगः तदपि नोपादेयं[redacted] प्रयोजनाभावात् विषयतात्वादिवत्
वा

सि°
२०

प्रतियोगित्वाधिकरणवृत्तित्वसंबंधत्वादयो व्यतिरिक्ता एव पदार्था इत्यप्येकदेशिनः॥ ॥नन्ववच्छेदकत्वमिह न स्वरूपसंबंधवि
सं शेषः अभावत्वधीधर्मिगुरोस्तदभावात् प्रमेयधूमत्वकंबुग्रीवादिमत्त्वघ्राणग्राह्यगुणत्वादेस्तथात्वेन तेन रूपेण साध्यतायां
व्यभिचा -- रिण्यतिव्याप्तेः नाप्यनतिरिक्तवृत्तित्वं प्रतियोगितायाः स्वरूपसंबंधात्मिकायाः प्रतिव्यक्तिभेदेन धूमत्वादेर
पि तदतिरिक्तवृत्तित्वात् न च तथाविधयत्किंचिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वं तत् अत एवातिरिक्तसामान्या
भावस्याभावे धूमत्वादेरप्यनवच्छेदकत्वापातात् अग्रेतत्साधनमपि संगच्छत इति वाच्यं वह्निघटवृत्तिद्वित्वमादाय तादृश
दहनवृत्तिद्वित्वावच्छिन्नप्रतियोगितानतिरिक्तवृत्तिवह्नित्वादावव्याप्तिप्रसंगात् एतेनान्यूनवृत्तित्वविशेषितमपि [redacted] परास्तं
अत एव नानाप्रतियोगिकस्यैकप्रतियोगिताङ्गीकारेपि न निस्तार इति लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिः
तादृशतदवच्छिन्नत्वाप्रसिद्धेरिति चेन्न प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात् स्वसमानवृत्तिकं चावच्छेद
कताख्यं तत्त्वं च स्वपर्याप्त्यधिकरणपर्याप्तवृत्तिकत्वं यावत्त्वादिकं तु न तथा पर्याप्तिश्चायमेको घटः इमौ द्वाविति प्रतीतिसाक्षि
कसंबंधविशेष एव त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः घटकं चावच्छेदकत्वं स्वरू
पसंबंधविशेषः एवं च प्रागुक्ते यद्धर्मावच्छिन्नत्वेत्यत्र यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नत्वेति वक्तव्यं तेनोक्ताव्याप्तिनिरासः वस्तुतस्तु २०

नदवच्छिन्नप्रतियोगिताकाभाववद्वसंबद्धत्वविशिष्टसामान्यकत्वं स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकानकत्वं वा न द न
तिरिक्तवृत्तित्वं वक्तव्यं [redacted]वसत्तावान् जातेरित्यादौ जातिमन्निष्ठाभावप्रतियोगिता[redacted]वच्छेदकगुणकर्मान्यत्वविशिष्टसत्तात्वस्य तु
स्यवृत्तिकत्वेपि सत्तात्वस्य न क्षतिः एवं स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं वाच्यं तादृशप्रतियोगिताश्च
विशिष्योपादेयाः नातो गुरोरवच्छेदकत्वविवादः एवं च तत्प्रतियोगित्वसंबंधित्वं च साध्यतावच्छेदकसंबंधेन बोध्यं अतो न सं
बंधभेदमादाय दोषः कालिकविशेषणताविशेषेण साध्यतायां च तादृशप्रतियोगितावच्छेदकत्वं अनित्यत्वेन गगनत्वे प्रसि
द्धं अभावे प्रतियोगिव्यधिकरणो बोध्यः अत एवोक्तमिदमीयं च प्रतियोगिवैयधिकरण्यमनुपादेयं [redacted] संयोगेनाव्यवच्छि
न्नाभाववति संयोगत्वादिविशिष्टस्य वृत्तेः गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वस्य द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभा
ववत्तिवृत्तेरव्याप्तिरव्याप्त्योरगवकाशादिति वाच्यं धूमवान् वह्नेरित्यादावतिव्याप्तिः न चोत्पत्तिकालावच्छेदेनापि महानसा
दौ किंचित्संयोगेन वर्तते येन वह्निमद्वयोगोलकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकायोगोलका[redacted] वृत्तिद्रव्यत्वावच्छिन्ना
भाववद्वृत्तित्वं धूमवत्त्वविशिष्टस्यसंभाव्येत प्रतियोगितयोरेकसंबंधावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विवक्ष
णे तु पुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यद्वयं यत्राधिकरणे व्यभिचारः तदन्यत्वं तत्त्वस्य कारकप्रमाविषयत्वस्य सा

त्रि
२१

ध्यत्वप्रकारकप्रमाविषयत्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् हेतुतावच्छे
दकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वाच्चातिव्याप्तेरनवकाशात् तथा च विशेषणताविशेषावच्छिन्नयद्धर्मविशि
ष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्संबन्धावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियो
गितासामान्ये नास्ति साधने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोऽर्थः अत्र सद्धेतुविशेषे साध्यतावच्छेदकं
न प्रतियोगितावच्छेदकं तत्र वैयर्थ्यमिति रूपादेर्येत्यपि वदन्ति गौरवप्रतिसंधानदशायामपि कंबुग्रीवादिमान्नास्तीत्यादि
प्रतीतेर्गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः न चास्यास्तत्प्रतियोगिकाभावमात्रमवलम्बनं तथाविधयत्किंचित्प्र
तियोगिसत्त्व एव तादृशप्रतीतेरनुदयात् अत एव एकघटवति भूतले कंबुग्रीवादिमान्नास्तीति शब्देन प्रमाणं प्रमाणं
न घटसामान्याभावे न चेदेवं लघुसमनियताभावेन गुरुणां व्याप्यवृत्तितापत्तिः गुणादिगुणकर्मान्यत्वविशिष्टसत्त्वादिसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगितायाः लाघवेन द्रव्यादिनिष्ठाभावप्रतियोगितावच्छेद
कत्वेनैवावच्छेदात् तत्तदवच्छेदकव्यक्तीनां च प्रातिस्विकरूपेणाभावानां युगसहस्रेणापि ज्ञातुमशक्यत्वात् एवं द्र
व्यत्वादिविशिष्टद्रव्यत्वादेरव्याप्यताप्रसंगोऽप्यनुसंधेयः उपदर्शितप्रकाराणामपि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात् ० २१

[illegible]व घ्राणग्राह्यगुणवत्त्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वमपि साधु संगच्छत इत्यपि केचिदिति कृतं पल्लवितेन॥ ॥
ननु यत्र वह्निमत्तावत्त्वाभावाः ह्रदादौ वह्निर्नास्तीति धियं जनयंति त एव प्रत्येकं धूमवति महानसादौ वर्त्तंते तत्र च तेषां स्वस्वा
वच्छेदकतत्तद्वह्नित्वावच्छिन्नवैयधिकरण्यनिरूपका याः प्रतियोगिताः तदवच्छेदकमेव वह्निमत्त्वमतोऽव्याप्तिः नचैवं
वह्नित्वावच्छिन्नस्य तद्वृत्तित्वान्न तथात्वं तथा सति ह्रदवृत्तिधूमाभावप्रतियोगितावच्छेदकह्रदावृत्तित्वावच्छिन्नस्य वह्निमद
योगोलकवृत्तित्वादतिव्याप्त्यापत्तेः अननुगतरूपेण तत्तदभावप्रतियोगितानां नानावच्छेदकत्वेऽनवच्छेदकमेव तत्त्वभावप्रति
योगितायाः अभावान्तरे मानाभावात् तथा च तद्रूपावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरत आह सामान्येति संशया
न्यथानुपपत्तिं प्रमाणयति अन्यथेति तथा चेति यच्चायं संशयो न वायुविशेष्यकः तस्य विशेषणत्वेनोल्लेखात्
न वा रूपविशेष्यकः तथा सति रूपतदभावयोः विरोधिनोरकोटितायां प्रकृतानुपयोगप्रसंगात् तथापि वायू रूपवान्
तदभाववान्वेति रूपतदभावकोटिकसंशये तात्पर्यं अन्यस्तु रूपवत्तदन्योन्याभावकोटिक इति नाभेद इति सम्प्रदायविदः
विरुद्धयोरेकधर्मिसंबंधावगाहित्वान्न भेदसंशयः ननु तदुभयप्रकारतापि नियता तथा च रूपतदभावविशेष्यको वायु

विशेषणकोसाविति [illegible]: भूतलवृत्तित्वतदभावकोटिकोऽप्रधर्मिक एवायंसंशयः अधिकरणेतत्तदभावान्यतरनिश्चय
स्यापितत्तदधिकरणवृत्तित्वसंशयविरोधित्वात् अन्यथाभूतलेघटतदभावान्यतरनिर्णयेपिघटोभूतलवृत्तिर्नवेतिसंशय
प्रसंगादित्यपरे अपरेतावत्त्वेवरूपाणि इत्यनिर्णयात् यावद्रूपाभावानिर्णयेसंशयोनविरुध्यत इति चेत् यावद्रूपाभावानि
र्णय इत्यस्य यावन्तोरूपाभावाः तेषां यावत्त्वेन तेषां यावन्तिरूपाणि तावद्रूपाभावानां यावद्रूपत्वेन तदभावानां वानिर्णय इत्यर्थः तत्रन
प्रपञ्चनतीयैतथानिर्णीतत्वात् नेत्यौ प्रतियोगितदभावयोर्यावत्त्वानुल्लेखेपियोग्यानुपलब्ध्याभूतलेघटोनास्तीतिनिश्चयमात्रा
द्वैधघटतदभावसंशयोच्छेददर्शनेन तस्याकिंचित्करत्वात् नचातिरिक्तसंभावनाविरहसहकृतस्य एवाभावनिश्चयः तत्प्रतिबंधकः
संभावना च रूपपार्थिवादित्रितयभिन्नं नवेत्याकारिका निवर्तते चेयं रूपत्वावच्छेदेन त्रितयभिन्नत्वाभावनिश्चयादेवेति वाच्यं गौर
वात् विनाप्यतिरिक्तसंभावनां विशेषाभावनिश्चये सामान्यसंशयदर्शनाच्च अथाभावस्यसामान्यावच्छिन्नप्रतियोगिताकत्वनि
श्चय एव तादृशसंशयविरोधी अन्यथा न वाप्य[illegible]ति प्रसंगात् सचनप्रकृते अभावस्य च यावद्विशेषाभावाधिकरणवृत्तित्ववि
शिष्टस्य तदवच्छेदेन वा सामान्यावच्छिन्नप्रतियोगिताकत्वं संभवति चेदं तादृशप्रतियोगिताया अतिरिक्तत्वात् तेन नैकविशेष
वतो विशेषान्तराभाववत्त्वेन सामान्याभाववत्त्वप्रसंगः नच प्रतियोगितावच्छेदकभेदस्याभावभेदनियामकत्वाद्भेदसिद्धिः प्रतियोगि

भेदस्यानन्त्ये एकघटप्रतियोगिकस्य प्रागभावादिचतुष्कस्याभेदप्रसंगात् अवच्छेदकं तु भिन्नमेव तत्र क्वचित्तादात्म्यस्य क्वचि
त्संसर्गस्य क्वचित्पूर्वापरकालीनत्वघटत्वादेश्च तथा सादिति वाच्यं संसर्गप्रतियोगिविशेषणसाधारण्यैकस्यावच्छेदकत्व
स्य दुर्वचत्वात् पूर्वापरकालीनत्वादेश्च ध्वंसादिप्रतियोगितावच्छेदकत्वे प्रमाणाभावाच्च किंचावच्छेदकभेदस्याभावभेदनि
यामकत्वं न तज्जनकत्वं अत्यन्ताभावादिस्वरूपस्य तस्याजन्यत्वात् नापि तद्व्याप्यत्वं वैयधिकरण्यात् अत एव नैव व्याप..कत्व त
मपि अभेदेऽप्यविरोधाच्च च तदितरधर्मावच्छिन्नप्रतियोगिताकत्वं तदवच्छिन्नप्रतियोगिताकान्यत्वस्य व्याप्यं मानाभावात्
अत एव समनियतसुखदुःखादित्वतत्संख्यापरिमाणव्यक्त्यादिनानाधर्मावच्छिन्नोऽप्यभिन्न एवाभावः भेदसिद्धिस्तु भाववद
भावस्यापि विरुद्धधर्माध्यासादेव अत एव गगनादीनामवृत्तीनां समनियतानां च धर्माणामेक एवात्यन्ताभावः युगपद्वि
नष्टानामुत्पन्नानां वा समदेशानामसति बाधके एक एव ध्वंसः प्रागभावो वेति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽप्य
भावः प्रामाणिकश्चेत्तदा तस्यैकस्यैव प्रतियोगिता सर्वैरेव व्यधिकरणैर्धर्मैः सर्वैरेव समानाधिकरणैः संबंधैरवच्छिद्यं
तां आकाशाभाववदेव वा तथास्तामिति मैवं एवं हि तत्तद्देशकालाद्यवच्छिन्नानवच्छिन्नतत्तदधिकरणावृत्तित्वेन विशिष्ट
स्य तत्तदवच्छेदेन वा एकस्यैवाभावस्य घटपटगोत्वाश्वत्वादिप्रतियोगिकत्वसंभवे न नाभेदोऽपि विलुप्येत तत्राप्यति

शि
२३ योगिकत्वंचुतत्तत्स्वभावोनतत्राधिकरणविशेषवृत्तित्वस्यांतर्भावोऽवच्छेदकत्वंवेतितु प्रकृतेपिसमानं एवसामा
न्यावच्छिन्नप्रतियोगिताकत्वंव्यासज्यवृत्तीत्यपिप्रत्युक्तं अव्यासज्यवृत्तेस्तत्स्वभावस्यतत्त्वानुपपत्तेः अतिरिक्तकल्पने
चकिमपराद्धमतिरिक्तेनाभावेन किंचव्यधिकरणयोःघटपटयोर्द्वित्वप्रतीतिवत् व्यधिकरणानामपिविशेषाभावानां
युगपदिंद्रियसन्निकर्षेसामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्ययोपिस्यात् अपिचस्वरूपांतरेणसंबंधविधयाव्यासज्य
वृत्तिधर्मस्यज्ञानेनयावदाश्रयसन्निकर्षापेक्षा मानाभावात् एवंचैकाभावसन्निकर्षेपिसामान्याभावबुद्धिप्रसंगः यादृ
शेन्यतत्स्यज्ञानेयावदाश्रयाणांसन्निकर्षोपेक्षतेतत्रैतेषांतद्भेदस्यज्ञानमपितद्ज्ञानेतदभेदज्ञानेचतदग्रहात् आश्रय
भेदभ्रमेणतद्भ्रमदर्शनाच्च नचात्रयावद्विशेषाभावानांप्रत्यक्षमनुपस्थितिःसंभवति तत्तत्प्रतियोगिनांविशेषतोऽनु
पस्थितेरिति केचित्तु अनंतविशेषाभावानांसामान्यावच्छिन्नप्रतियोगिताकत्वस्यतद्व्यासज्यवृत्तित्वस्यकल्पनाम
पेक्ष्यलाघवात्सामान्यावच्छिन्नप्रतियोगिताकत्वेनएकएवाभावाभावः कल्प्यते कल्पनीयशरीरस्योभयत्वेपिएतदपेक्ष्य
नस्यगुरुत्वात् विनिगमनाभावेपिचसामान्याभावसिद्धिरप्रत्यूहैव धर्मकल्पनातोधर्मिकल्पनायांगुरुत्वंकल्पनीया २३
नेकत्वप्रयुक्तं नचातिरिक्ताभावस्यतत्रचसामान्यावच्छिन्नप्रतियोगिताकत्वस्यअनंतवाय्वाद्यधिकरणवृत्तित्वस्यकल्प

नापेक्ष्य कुत्रानंताधिकरणवृत्तीनां यावद्विशेषाभावानामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य न त्वासज्यवृत्तित्वस्य च कल्प
नेयलघीयसीति वाच्यं एवं सत्यभावमात्रासिद्धिप्रसंगादित्याकूतं ॥ ॥यद्धेत्वादि अथात्र नानाव्यक्तिरूपादिसाध्यकैकव्यक्तिप
पिर्वीत्वादावव्याप्तिः न च तत्र रूपत्वादिकमेव साध्यं तच्च परंपरासंबंधेन रूपत्वादिकमेव तेन संबंधेन नैतदभावः पृथिव्यादावि
ति वाच्यं रूपादेरसाध्यतापत्तेः द्रव्यान्यत्वविशिष्टसत्ताद्यभावस्य द्रव्यादिवृत्तित्वात्सत्तादिसाध्यकद्रव्यत्वादावव्याप्तिश्च अ
न्यथा विशिष्टतया सत्तादेः साध्यतायां व्यभिचारिणि जातिमत्त्वादावतिप्रसंगः व्युत्पादयिष्यते हि विशिष्टाभावस्य विशेष्यप्रति
योगिताकत्वं हि तावदवच्छिन्नसाध्याभावस्य तत्र सत्त्वाच्च अथाप्रतियोगित्वं प्रतियोगित्वाभावः स च येन रूपेण तद्रूपावच्छिन्नव्या
प्यत्वं हेतौ अस्ति चायं रूपादौ रूपत्वादिना न पृथिव्यादिनिष्ठाभावप्रतियोगित्वमिति प्रत्ययादिति चेन्न तादृशप्रतीत्या हि रूपत्वा
दौ प्रतियोगिताया अवच्छेदकत्वाभावो गृह्यते न तु तदभावावच्छेदकत्वं सर्वत्रैव रूपे पृथिवीनिष्ठाभावप्रतियोगित्वं न तु कुत्रापि रू
पे तदभाववृत्तिश्च बाधितप्रत्ययात् अन्यथा यो यो धर्मो यस्य यस्य नावच्छेदकः तत्तदवच्छेदेन तदभावोप्युक्तरीत्या सिध्येत प्रमे
यधूमत्वेन न वह्निमन्निष्ठाभावप्रतियोगित्वमिति प्रत्ययात्तदवच्छेदेन तादृशप्रतियोगित्वाभावस्यापि सुवचत्वाच्च अथ प्रमेय
धूमत्वं गौरवेण न सामानाधिकरण्यप्रतियोगितावच्छेदकं विवक्षितं चात्र तत्पेति चेत् असमानाधिकरणधूमकव्यक्तिव

शि
२८

तितया वह्निस्वमपि नतदवच्छेदकं कंबुग्रीवादिमत्त्वादिना च घटादेरसाध्यतापत्तिरिति व्याकोपः प्रमेयधूमत्वं
प्रतियोगितायाद्वृत्तकुन्यताया अपि नावच्छेदकमित्युक्तावपि न निस्तारः प्रतियोगित्वं प्रतियोगितानवच्छेदक
धर्मवत्वं पूर्वस्मादभेदः नात्र साध्यसजातीयसमानाधिकरणसाधनसजातीयत्वस्य अत्र च साध्यसाधनसामाना
धिकरण्यस्य व्याप्तित्वेन तात्पर्यात् कयोस्तादृशप्रतियोगितावच्छेदकत्वात् अन्योन्याभावात्यंताभावयोर्भेदाभेद इत्यपि
त अत्यंताभावगर्भवत् सामान्यविशेषभेदेनान्योन्याभावगर्भमपि व्याप्तिद्वयमाह समानाधिकरणेत्यादिलक्षण
द्वयेन प्रथमे एकस्य साध्याधिकरणांशस्याधि [redacted] कया द्वितीयं लक्षणं व्यापिनाना व्यक्तिसाध्यकस्थले तत्तत्सा
ध्यवत्त्वस्तत्तत्साध्यवत्त्वस्य साधनसमानाधिकरणान्योन्याभावप्रतियोगितात्तदवच्छेदकत्वाच्चाव्याप्तिः यद्रूपा
वच्छिन्नवत्त्वं तादृशान्योन्याभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नसामानाधिकरण्यं मित्यत्र तात्पर्यं वन्ह्यादौ तत्संयो
गादौ तद्द्वादौ वा साध्ये सर्वत्र साक्षात्परंपरया वा अनुगमकं वह्नित्वादिकमेव साध्यतावच्छेदकं तदवच्छिन्नत्वस्य न ता
दृशान्योन्याभावप्रतियोगितावच्छेदकत्वमिति यद्वद्रूपावच्छिन्नं यादृशरूपावच्छिन्नमनवच्छेदकमिति वा यथायथं २८

वक्तव्यं शब्देकस्यानुपादेयत्वात् अ[illegible]न्येत्यादि यद्य[illegible] करीत्यासर्वेत्रतादृशप्रतियोगितानवच्छेदकत्वपर्यंतानुधावनस्यावश्य
कत्वेनाकिंचित्करत्वमेव तादृशाभावप्रतियोगित्वं [illegible]पादि। [illegible]शिष्टसामानाधिकरण्य[illegible]रूपायाव्याप्तेर्व्यधिकरणासंभवित्वमात्रे
तात्पर्यं [illegible]रवेत्यस्य कालिकीत्यादिः अन्योन्याभावगर्भलक्षणस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिं निरस्यति नचेति
अभेदस्येति तथा च मूलेऽग्रे हीरुहोविहंगमसंयोगि नेति प्रतीतेरनुभूयमानविशिष्टभेदोल्लेखिन्या अपि शिखीविनष्ट इ
त्यादिप्रतीतिवत् विशेषणाभावविषयतामात्रं कल्प्यते बाधक[illegible] कत्वात् यत्र विशिष्टभेदेन बाधकं तत्रैतत्याप्रतीतिव च
त्वात् नत्विसिद्धिरप्यूहेवेति नातिप्रसंगः अत्र वदंति अभेदस्य भेदाभावस्य ज्ञानेन बाधकं भेदवत्प्रतियोगितावच्छेदकस्य सं त
योगात्मनः तदभावस्याव्याप्यवृत्तित्वेन तदुपपत्तेः यथाहि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानेन तदत्यंताभावस्याग्र
हादभावव्यवहारश्च सएव तदभावद्वृत्तिकल्प्यते तथा प्रतियोगितावच्छेदकपर्यग्रहे तद्वदन्योन्याभावस्याग्रहादभावव्यव
हारश्च सएव तस्याभावद्वृत्तिनिर्णीयते आधिक्येपि वा अव्याप्यवृत्तित्वात् [illegible] मूलावच्छेदेन कपिसंयोगिभेदाभा
वज्ञानं न तथा असंभवादसिद्धेश्च नापि संयोगिभेदस्य वृक्षावृत्तित्वज्ञानं असिद्धेः न हृति तस्यैव ग्रहात् नापि कपि

संयोगिभिन्नभेदत्वानंकपिसंयोगभेदवत्त्वइदेदस्यापिअव्याप्यवृत्तित्वेनाविरोधात् नापिमूलावच्छेदेनतत्त्वानं असिद्धेः ननु
मूलावच्छिन्नभिन्नभेदस्यतद्भेदमात्रपर्यवसायित्वया कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्यमूलेवृत्तित्वबाधाच्च नहि
घटभिन्नभेदोघटत्वादतिरिच्यते अवश्यक्लृप्तघटत्वेनैवोपपत्तावतिरिक्तकल्पनायांमानाभावात् अन्यथासर्वत्राभावस्या
भावोऽतिरिक्त एव कल्प्येत अतएवात्यंताभावप्रतियोगिनोरन्योन्याभावप्रतियोगितावच्छेदकयोश्चसामान्यतएवक्लृप्तो
विरोधः तत्रकपिसंयोगवत्त्वपिवृक्षेमूलेनकपिसंयोगइतिप्रतीतेरन्यथानुपपत्त्यातावदाद्ययोःसंकोच्यतां नत्वेषाप्रती
तिः कपिसंयोगिभेदविषयत्वेनोपपादयितुंशक्या नियमतः संयोगवत्त्वेनप्रतियोगिनोऽनुपस्थितेः प्रतियोगिकोटौतदनुल्लेखा
च्च मूलेवृक्षोनकपिसंयोगीतिप्रतीतेस्तुशिखीविनष्टइतिवत्भासमानविशेषणस्याभावमात्रविषयत्वेनोपपत्तावांतिम
योरप्येतिपरास्तं अन्योन्याभावांतरस्यप्रतियोगितावच्छेदकां [redacted] तरसमानाधिकरण तयास्वस्वप्रतियोगिता
वच्छेदकासामानाधिकरण्यपर्यवसायिनोविरोधस्यस्वत्वघटितत्वेनविशेषएवक्लृप्तत्वात् अत्यंताभावप्रतियोगिनोरिव
अन्योन्याभावप्रतियोगितावच्छेदकयोरबाधितसामानाधिकरण्यानुभवेनप्रतिरुद्धतयातथाविधविरोधकल्पनायाअ
नवकाशात्वेति किंचशिखीविनष्टइतिप्रतीतेःविशिष्टध्वंसोत्वेविन्याविशेष्येतद्बाधादात्तांविशेषणध्वंसविषयत्ता 

नसंयोगीतिप्रतीतेर्विशिष्टभेदमवगाहमानायाः कथं विशेषणासंसर्गाभावविषयत्वेनोपपत्तिः नखलु सहस्रेणापि बा
धकैः इदं रजतमितिप्रतीतिं रंगत्वावच्छिन्नत्वव्यवस्थापयितुं शक्यते नच विशेषणाभेद एव तस्या विषयः अथैवं न क
पिसंयोगीतिप्रतीत्यापत्तेः युज्यते चाव्याप्यवृत्तिरन्योन्याभावः कथमन्यथा पक्वतादशायां घटादावयं न श्यामः दण्डादिवि
नाशसमये च चैत्रादौ नायं तद्दण्डवानित्यादयो व्यवहाराः नचात्र विशेषणासंसर्गाभाव एव प्रतीयते अनुयोगिनि सप्तमीं
विनातदनुपपत्तेः नखलु भूतलं न घट इत्यादौ निकदाचिदपि घटसंसर्गाभावं बोधयन्ति तथात्वे वा घटो न घट इत्यादेरपि
प्रसंगात् अपि च विशिष्टवाचकदण्डादिपदेभ्यो धर्म्युपसर्जनतयोपस्थितस्य दण्डादेः कथं प्रतियोगित्वेनाभावान्वयः इतर
विशेषणत्वेनोपस्थितस्य निराकांक्षत्वात् अन्यत्र विशेषणत्वेनान्वयायोगात् नच विशिष्टोपस्थापकं पदं विशेषणमात्र प
रं तथापि चैत्रो न दण्डी घटो न श्याम इत्यादेरपि दण्डादिसंसर्गाभावप्रतीत्यापत्तेर्दुर्वारत्वात् एतेन नञः अभाववत्त्वा व
लक्षणिकतया विशेषणसप्तमीमन्वयबोधसमर्पणं प्रत्युक्तं एवं च चैत्रो न पचतीत्यादौ आख्यातार्थकृत्या लक्षणया चोपस्थि
तस्य कर्तुरेव ... भेदो भासतामित्यस्तु वस्तुतस्तु न ... पचति चैत्रः नेदं मैत्रस्येत्यादौ विभक्त्यर्थस्य कृतेः संबंधादेरभावस्य

शि
२८ बोधनेन ग्रासप्रमीनापेक्षत्ते अपेक्षन्ते च प्रादिपत्तिकार्यस्येति निपुणतरमुपपादयिष्यामः नन्वेवं वैधर्म्यपरतया न श्याम
इत्यादेः श्यामादिविधर्मेत्यर्थः वैधर्म्यं च रक्तत्वादिकमेव [illegible]कुराचार्योः श्यामाद्रक्तो विधर्मो नानुपपत्तितीस्यपि वदतीति
हतं पक्षविकेन सर्वं [illegible]ेति निरूपितत्वमेतत् वास्येति इत्थं चाननुगताया अपि ध्यासेत्तोनं यथानुमेति हेतुत्वथा
वक्ष्यते एते अत्यन्तान्योन्याभावगर्भे तादृशेति ननु द्वित्वं किं प्रतियोगितावच्छेदकमेव न भवति किं वा ग वत्वेव परं तु [illegible]मेयस्य
समानाधिकरणतत्तद्धर्मावच्छिन्नप्रतियोगिताकानामभावानां लाघवादित्यभिप्रायः नाद्यः एकैकाभावप्रतीतितो द्वौ नस्त इ
तिप्रतीतेस्तत्र विलक्षणत्वात् शशादिना द्वौ नस्त इति निश्चयेऽपि एकैकाभावसंशयात् विषयाद्यनुगमे विना अनुगतप्रत्यया
योगात् न चाभावस्य द्वित्वाधिकरणप्रतियोगित्वमात्रे द्वित्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगित्वमात्रं वा द्वयं नास्ती
तिप्रतीतेर्विषयः तादृशद्वित्वाधिकरणव्यक्तिविशेषविरहिणि तथाविधोभय [illegible] शालिनि तादृशौ द्वौ नस्त इत्यप्रत्ययात् ताक
द्वित्वसामानाधिकरण्येनाभानेऽपि प्रतीतेरनुगताकारत्वाच्च अन्यथा न तादृशप्रतीतेर्घटत्वपटत्वाद्यन्यतरत्वावच्छिन्नप्र
तियोगिताकाभावविषयत्वं अन्यतरानुल्लेखेऽपि घटपटौ नस्त इत्यनुगतप्रत्ययात् न च परंपरासंबंधेन तादृशद्वित्व २८

सामान्याभाव एव हेतौ नास्ति इति प्रतीतेर्विषयः तादृशहेत्वधिकरणयोरेव प्रतियोगित्वेनोल्लेखात् हेत्वादेः घटादिवृ
त्तित्वानुपस्थितावपि अंततः शब्देनापि घटपटौ न स्त इत्यादिप्रत्ययाच्च अत एवैकविशिष्टापराभावोपि न तादात्म्येव
नं विरुद्धयोरपि जलत्वपृथिवीत्वयोर्हेतुत्वेनाभावप्रत्ययादित्युक्तत्वाच्च नान्यः तथात्वेपि साध्यतद्धेत्वोः तादृशाभावप्र
तियोगित्वानपायात् अंतरेण चाभावांतरमेकैकघटवत्यजायमानायापत्तिं किं च घटद्वयवति चानुत्पद्यमानाया घटौ
न स्त इति प्रतीते रूपपादयितुमशक्यत्वादित्यत आह अभ्युपगमे वेति उभयत्वमेव प्रतियोगितावच्छेदकं न तु साध्यता
वच्छेदकं साध्यवत्त्वं वेत्यर्थः अनुरूपमाणावच्छेदकत्वांशेपि लक्षणे तयैव विवक्षितमिति भावः तच्चेति स्वसाधन
त्वाभिमतं तथा च साधनसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकाभाववान् धर्मः पक्षधर्मावच्छिन्नसमानाधि
करणात्यंताभावप्रतियोगितावच्छेदिकास्तद्धर्मावलीढसामानाधिकरण्यमित्यर्थः एतेन सर्वत्र तादृशीयावद्धि
रवच्छिन्नस्य तादृशावच्छिन्नयावत्प्रतियोगिकस्य चातिप्रसंजकत्वावसाय वच्छिन्नप्रतियोगिताकव्यतिरिक्तस्य [illegible]भा
वस्याप्रसिद्धिः तादृशावच्छिन्नप्रतियोगिताकानां यावदभावानामधिकरणस्यापि प्रायशस्तथा रूपादिसाध्यकपृथिवी

षि
२७

त्वादव्याप्तिश्च क्वापि स्यादिप्रसक्तेनादृशयावदभावसामानाधिकरण्यासंभवादितिप्रत्युक्तं सर्वत्रसोपाधावेकव्यक्तिकस्य
संभवत्तोप्युपाधेर्धर्मांतरविशिष्टत्वादिनाऽभावोभवत्येवसाध्यसमानाधिकरण इत्यवच्छेदकानुसरणं साधनसमाना
धिकरणात्यंताभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकायावंतोऽभावाघटमोवच्छिन्नसमानाधिकरणास्तद्धर्मा
वच्छिन्नसामानाधिकरण्यमित्यर्थः अभावश्चात्रभावभिन्नोत्यंताभावोग्राह्यः तेनेदं जलं स्नेहवत्त्वादित्यादौ स्नेहवत्त्वस
मानाधिकरणात्यंताभावप्रतियोगितावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावानां सकलस्याणांज
लत्वसामानाधिकरण्यविरहेपिनाव्याप्तिः घटध्वंसोध्वंसत्वादित्यादौ च घटध्वंसत्वादेस्तत्प्रकारकप्रमाविषयत्वादेर्वा
भावाभावत्वातिरिक्ताभावः तादृशोनघटध्वंसत्वादिसमानाधिकरण इतिनातिव्याप्तिरित्यपि वदंति यावदिति
स्वंसाधनं व्यभिचारियेषां तेषां यावत्तां व्यभिचारिणासाध्येन सामानाधिकरण्यमित्यर्थः यावदिति यावत्पदं साध्य
त्वाभिमतपरं सोपाधिवारणाय यावदिति लुप्तसप्तमीकस्य द्वितीयात्यंताभावस्य विशेषणं तथा च साध्यव्यापकता
वच्छेदकावच्छिन्नप्रतियोगिताकात्यंताभावत्वव्यापकस्वसामानाधिकरण्यसामान्याभावकत्वमर्थः केवलान्वयिन्य २७

लेखाकाशादिरेव तथाविधाभावः प्रसिद्ध इति संप्रदायविदः केचित्तु तादृशाया वह्न्यभाववृत्तित्वं यदधिकरणताया व्यापकं तत्त्व
मर्थः न चैतादृशाप्रतियोगिकानवच्छेदकं यत्तमेव यावत्वेन विशिष्य यावत्तादृशाश्रयत्वं यदधिकरणताया व्यापकं तत्त्वमित्य
पेक्षाभावे दैवसामानाधिकरण्ये अभावबहुत्वोपपादनमननिप्रयोजनकमिति वाच्यं यावत्तादृशाभिधानादीनां मेकाधिकरण्यस्याप्रसि
द्धेः न चानवच्छेदकांशमनुपादाय प्रतियोग्येव यावत्वेन विशेष्यतां साध्यव्यापकस्यापि हृत्पांतरेण साध्यसमानाधिकरण
त्वं ताभावप्रतियोगित्वस्योपदर्शितत्वादित्याहुः अवच्छिन्नसामानाधिकरण्यं सामानाधिकरण्यावच्छेदकं वा व्याप्तिः इत्थं च
धूमत्वद्रव्यत्वसत्वादेः व्यापकतावच्छेदकत्वं दंडत्वादेर्नियतपूर्ववर्तितावच्छेदकधर्मात्मककारणतावच्छेदकत्ववद्भेदेपि
उपहितानुपहितभेदाद्धासमर्थनीयं तत्राद्यमभिप्रेत्याह यत्संबंधितेति सा संबंधितासामानाधिकरण्यरूपाजनकत्वादि
व्याख्याता अत्र च विशिष्टसत्तावाद्यवच्छिन्नगुणादिसामानाधिकरण्याधिकरणासत्तादेः कर्मादौ परामर्शाद्गुणाद्यनुमित्यापत्तिः
साध्यसामानाधिकरण्यविशिष्टहेतुमत्तापरामर्शस्तु पक्षे साध्यनिर्णयात्प्रागसंभवीत्याशयेन द्वितीयं अयमालोको धू
मो वेत्यादौ विशिष्यसंदेहेपि सामान्यतोऽवच्छेदकरूपवत्वनिर्णयः संभवत्येवेति हृदयं अत्रावच्छेदकत्वं नान्यूनवृत्तित्वं

शि
२९

अन्यूनानतिरिक्तवृत्तित्वं वा वह्न्यादौ साध्ये मेयत्वादावतिव्याप्तिप्रसंगात् धूमत्वादावप्रसंगाच्च किं त्वनतिरिक्तवृत्तित्वं तच्च यद्य
पि तद्भाववदवृत्तित्वं गुणवान् सत्त्वादित्यादौ सत्तात्वेऽतिप्रसंगात् कर्मादिवृत्तित्वावच्छेदेन गुणसामानाधिकरण्याभा
ववत्त्यां सत्तायां वर्तमानत्वात् तथा सत्ताविशिष्टसत्तात्वे प्रागुपदर्शितदिशा च धूमत्वाव्याप्तिप्रसंगात् तथाप्यतिरि
क्तैयद्धर्मविशिष्टहेत्वधिकरणवृत्तित्वं न वर्तते तत्त्वं साध्यासमानाधिकरणवृत्तिस्वविशिष्टाधिकरणवृत्तित्वसामान्यक
त्वं स्वविशिष्टाधिकरणवृत्तियावत्साध्यासमानाधिकरणकत्वं वेति फलितार्थः सत्तात्वविशिष्टसत्ताधिकरणकर्मादिवृ
त्तित्वस्य साध्यासमानाधिकरणे कर्मत्वादौ सत्त्वान्नातिप्रसंगः कर्माद्यन्यत्वान्यविशिष्टसत्ताश्रय न कर्मादिवृत्तिर्नाप्रसंगः
एवं च मेयत्वादेरपि केवलान्वयिसामानाधिकरण्यावच्छेदकत्वोपपत्तिः वृत्तिमत्त्वादिकर्मे वक्तव्याप्तिः तद्ग्रहस्तु मे
यत्वादिनेति व्याप्तिविरहितवृत्तितया गृह्यमाणेन रूपेण व्याप्तिग्रहासंभवात् अन्यथातिप्रसंगात् साध्यतावच्छेदक
संबंधेन साध्याधिकरणे येन येन संबंधेनावर्तमानत्वं हेतुतावच्छेदकसंबंधेन हेत्वधिकरणेऽपि तेन तेनैव संबंधेन तथात्वं वा ध
र्मीत्वधूमत्वादेर्वारणीयत्वेन तु स्वसमानाधिकरणतादृशधर्मान्तराघटितत्वेन विशेषणीयं सामानाधिकरण्योपादानात्
धूमप्रागभाववत्त्वादिसंग्रहः तदघटितत्वं च तद्विषयकप्रतीतिविषयत्वं स्वरूपसंबंधविशेष एवावच्छेदकत्वं २९

न वृत्तिप्रसङ्गमवच्छेदकमित्यपि संगत्वे अन्यथा अतिप्रसङ्गे अनतिरिक्तत्वस्याप्रसक्तत्वेन तन्निराकरणायोगात् विरु
द्धयोरभावाभावयोरधिकरणे एकस्य एकेन संबंधे न वृत्तिर्विरुध्यते अतस्तत्रावच्छेदकभेदापेक्षा अतएव व्यभिचारि
णि साध्यतदभावसामानाधिकरण्ययोर्विरुद्धयोरुपपादनायोपाधितदभावावच्छेदकावनुमन्यन्ते न्यायाचार्याः समा
नं तु गुणाभावस्येव गुणस्यापि न सामानाधिकरण्यावच्छेदकं विशेषणात् अव्याप्यवृत्तेश्च कपिसंयोगादेरधिकरणे वृक्षादौ
तदभावस्य संयोगेन च वह्नेरधिकरणे महानसादौ समवायावच्छिन्नप्रतियोगिताकतदभावस्य सत्वेनाविरुद्धत्वात् वह्नि
मत्संयोगेन वर्तमानस्य धूमादेर्वह्न्यभाववत्स्वावयवे संयोगेनावर्तमानत्वाच्च एतादृशत्वस्य धूमत्वादेर्न साध्यसामा
नाधिकरण्यावच्छेदकत्वविरोधः व्यभिचारधीरप्येतद्व्याप्तिबुद्धौ विरोधिन्येव तदुभयविशिष्टस्य साध्यानधिकरणवृत्ति
त्वग्रहे तदवच्छेदेन साध्याधिकरणवृत्तित्वग्रहायोगात् अस्तु वा एतन्मते हेतुवृत्तिधर्मस्य सामानाधिकरण्यानवच्छेद
कत्वमेव व्यभिचारः तद्धीरेव साक्षाद्विरोधिनी व्यभिचारान्तरधीस्तु परम्परयेति नीलधूमत्वादिकं तु गौरवान्नावच्छेदकं
एवं च लघुघटत्वादिकमेव सामानाधिकरण्यावच्छेदकं व्याप्तिः न तु तत्सहचरितं कम्बुग्रीवादिमत्त्वादिकं तेन च गुरुणा

पिरूप्येण व्याप्तिग्रहे कथायां हेतौ रूपन्यासे चानुयोगः प्रकारान्तरव्याप्तिवादिनामपि स[redacted]: [redacted]द्रव्यं रूपादिस्याद्यौ स कल
गुणसाधारणस्य गुणत्वस्य द्रव्यादिसाधारणस्य गुणासंभवेन त्वे सति द्रव्यासंभवेन त्वस्य वा एकस्यावच्छेदकत्वसंभवेन
बहूनां रूपत्वादीनामपि नत्वं विरुद्धधर्मद्वयाधिकरणयोश्च एकस्येकेन संबंधेन वृत्तौ कुत्र विरोधः कथं वा द्रव्यत्वादौ
साध्ये हेतुत्वेन विशिष्यरूपादेः प्रयोगः तथा परामर्शाद्या अनुमितिरिति तु विभावनीयं [redacted]नुपदर्मविशिष्टहेत्वधिकर
णत्वं साध्याधिकरणतावच्छेदकं सधर्मो व्याप्तिः ग्रंथस्तु धूमस्य धूमवतः धूमत्वं धूमवत्त्वं वह्नेस्तु वह्निमत्त्वमित्या
दिप्रकारेण व्याख्येयः अत्र चावच्छेदकत्वेन स्वरूपसंबंधविशेषः विरुद्धदिक्कालावच्छिन्नवृत्तिकस्य न्यूनदेशकालवृ
त्तिकादेश्चाधिकरणतायां तदसंभवात् तुल्यवृत्तिकधर्मद्वयाधिकरणत्वयोर्मिथोऽवच्छेद्यावच्छेदकभावस्य निर्णीतुमश
क्यत्वात् नाप्यन्यूनवृत्तित्वं न्यूनवृत्तिकधूमादेरव्याप्यतापत्तेः किं त्वनतिरिक्तवृत्तित्वं स्वान्यूनवृत्तित्वमिति यावत्
अतो नकेवलान्वयिन्यव्याप्तिः अत्र च यदन्यूनवृत्तिसाध्यं तत्त्वं स्वव्यापकसाध्यसंबंधित्वपर्यवसन्नमपेक्ष्य गौरवं
परमवधेयं वक्ष्यते तच्च ग्रंथकार एवाग्रे विवेचयिष्यतीत्याहुः उपाधिनेति विशेषणतापन्नेन उपाध्यनुप्रवेशेन

त्तियावत् वन्हावार्द्रेंधनप्रभवत्वविरहितत्वेन रासभार्द्रेंधनादौ तथाविधवन्हिविशिष्टत्वेन धूमसंबंधे अवच्छिद्यमाने तथा
विधवन्हेरप्यनुप्रवेशात् रासभत्वादिकं तु निवेश्यते न वेत्यन्यदेतत् अत्र च द्रव्यत्वे हवन्निष्ठे हवास्पर्शादिस्तत्र विनाप्यु
पाधिप्रवेशं शीतत्वेन शीतान्यत्वेन वा साध्यासमानाधिकरणतया साधनव्यापकतया वा स्वयमनुपाधिना केवलेन विशे
षणीभूयवा शीतान्यस्पर्शत्वेन चोपाधिनास्वत एव स्पर्शसाध्यसंबंधोऽवच्छिद्यत इत्युपाधिनैवेत्ति नियमेन तात्पर्यं
परंतुभुदूस्यसाधनतावच्छेदकस्यानवच्छेदकत्वभावे यत एव सोपाधौ साधनतावच्छेदकातिरिक्तं नियतमवच्छेदकमत
एव तद्विशेषस्तत्रोपाधिरिति वदंतीत्याह अत एवेत्यादि अत्रावच्छेदकत्वसामानाधिकरण्येन तत्त्वं चाव्यूनवृत्तित्वं व्या
पकत्वमितियावत् तत्साधिकरणं तद्भावेन साध्यविशिष्टसाधनतावच्छेदकावच्छिन्नसाधनवत्त्वव्यापकत्वाधिकरणता क
त्वपर्यवसितार्थः निरुक्तविशिष्टसाधनव्यापकत्वमिति तु निष्कर्षः अयं च सत्ताद्येकव्यक्तिहेतुनिष्ठद्रव्यत्वादिसामा
नाधिकरण्यव्यापकसामानाधिकरण्यप्रतियोगिनि घटत्वादौ नातिप्रसंगः नवा द्रव्यं अन्यत्वेन तु तिसत्त्वादित्यादौ द्रव्यत्वा
सत्ता दिविशिष्टसत्ताद्यव्यापके स्पर्शयत्ताद्यव्यप्रसंगः स्नेहस्पर्शान्त द्रव्यं [redacted] दित्यादौ शीतस्पर्शान्यत्वरूपान्यत्वादेर्वा द

श्रि

णायतानेत्यादि तत्र साध्यविशिष्टसाधने विशेषणं साध्याभावविशिष्टात्साध्यनात्सामानाधिकरण्येन व्यावर्त्तकं साध्याभा
३० श्रि वविशिष्टनिरूढसाधनवद्वृत्तीतियावत् द्रव्यं सत्त्वादित्यत्र सत्तायां अभेदेपि गुणकर्मान्यत्वेना व्याप्तिः द्रव्यं कर्मान्य
त्वेसति सत्त्वादित्यत्र गुणान्यत्वादौ साधनतावच्छेदकस्य अनवच्छेदकत्वोन्नायपरं तद्भिन्नत्वमुक्तं ननु विवक्षि
तमेवतत् वैयर्थ्यात् इदं दधिजन्यं वा दध्न इत्यादौ दधित्वादि व्याप्तेश्च प्रकृतसाधनतावच्छेदकावच्छिन्नप्रकृतसाध
ननिष्ठसाध्यसंबंधितावच्छेदकत्वपूर्वेदलार्थः अनवच्छेदकत्वे च तस्य साध्याभावविशिष्टसाधनवृत्तितया तद्विशिष्ट
साधनस्य साध्याभाववद्वृत्तित्वेन साध्याभाववत्तद्विशिष्टसाधन वत्त्वेनेतियावत्
तेन धूमवान्नेयवत इत्यादौ मेयान वच्छेद्यसाध्यसंबंधाप्रसिद्धिः गुणवद्गुणकर्मान्यत्वे सति जातिमत्त्वादित्यादौ जातित्वा
दिघटकनित्यत्वादेर्वैयर्थ्येन विशिष्टस्यानवच्छेदकतया गुणकर्मान्यत्वादेरुपाधितापत्तेश्चेति निरस्तं अवच्छेदकत्वं
च सामानाधिकरण्येन तथा च साध्यविशिष्टस्य साध्यसंबंधितानवच्छेदकसाधनतावच्छेदकावच्छिन्नसाधनस्य व्यापक
त्वमर्थः पर्यवस्यति उपदर्शितशीतस्पर्शान्यत्वादिवारणायत्रेत्यादि तत्र साधनतावच्छेदकविशिष्टसाधने विशेष ३०

त्वं साध्यमून्यात्व्याप्तेस्सौपैकं यत्सामानाधिकरण्यविशिष्टप्रकृतसाधनवत्त्वं साध्याभाववद्वृत्तिनिवर्तनेति यावत्
साध्याभाववविशिष्टप्रकृतसाधनाधिकरणसामान्यात् साध्यविशिष्टप्रकृतसाधनाधिकरणसामान्यस्य व्यावर्तकमिति स
मुदायार्थनिष्कर्षः केचित्तु विशेषणं सामानाधिकरण्यं तथा च सामानाधिकरण्यप्रत्यासत्त्यायेनावच्छिद्यते अवच्छेद
कीभूतसामानाधिकरण्यप्रतियोगीति यावत् अवच्छेदकत्वं चेहान्यूनानतिरिक्तवृत्तित्वं गुरोरप्युपाधिसामानाधिक
रण्यस्याक्षतमेव यद्यपि प्रत्यक्षमुद्भूतरूपान्महानित्यद्रव्यत्वादित्यत्र महत्त्वस्यानियतसमवेतत्वस्य च वक्ष्यमाण
लक्षणाक्रान्तस्योपाधेः सामानाधिकरण्यं साध्यसामानाधिकरण्यन्यूनातिरिक्तवृत्ति तथापि हेतुनिष्ठसाध्यसामाना
धिकरण्यस्य हेतुनिष्ठयत्सामानाधिकरण्यं अन्यूनानतिरिक्तवृत्तित्वं विवक्षितं सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्य
स्य तन्निष्ठकर्मान्यत्वसामानाधिकरण्यमतिरिक्तवृत्ति गुणोन्नदभावावच्छेदकावच्छिन्नवृत्तिकत्वात् पृथिवीत्वादिसा
मानाधिकरण्यं न्यूनवृत्तिजलादौ तदवच्छेदकावच्छिन्नवृत्त्यत्यन्ताभावप्रतियोगित्वात् साध्यव्यापकानां सद्धेतावुपाधि
त्ववारणाय साधनतावच्छेदकभिन्नेनेति तदनवच्छेद्यार्थकमित्याहुः नतु सर्वत्र सोपाधौ सर्वेणोपाधिना साध्यस

व्या
३१
धं धीअवच्छिन्नत इति न नियमः अयं प्रत्यक्षो मूर्त्तत्वादित्यादौ उद्भूतरूपवत्त्वादेः तदसंभवादित्यत आह अत एवेति यत
एवोद्भूतरूपवत्त्वादेर्न तथात्वसंभवः अत एव तत्र तादृशनियमवादिमते साध्यलक्षणमिति साधनाव्यापकत्वमिह
मा साध्यवद्विशिष्टसाधनव्यापकीभूताभावप्रतियोगित्वं तादृशसाधनासामानाधिकरण्यं पर्यवसितं तेनोपदर्शितोद्भू
तरूपवत्त्वादौ नातिप्रसंगः अयं प्रत्यक्षो द्रव्यत्वादित्यादौ घटत्वादावतिव्याप्तिः साध्यव्यापकत्वेन विशेषणे च स्यामो मि
दी त्रातनयत्वादित्यादौ शाकपाकजत्वेऽव्याप्तिरत उक्तं साधनावच्छिन्नेत्यादि साध्याभाववत्संबंधिनिविष्टस्य संबंधस्या
वच्छेदकभेदं विना अनुपपद्यमानस्यावच्छेदकीभूयोपपादनमुपाधिफलं तदसमर्थानां चोपदर्शितोद्भूतरूपव
त्त्वादीनां नोपाधिभावः संभवतीत्याह व्यभिचारिणामिति व्यभिचारः सपक्षविपक्षवृत्तित्वं अपविपक्षगामित्वेरूपव्य
भिचारोन्नयनमेवोपाधिफलं तच्चोद्भूतरूपवत्त्वादीनामप्यस्ति इत्यत आह अत एवेति यत एव साध्यसंबंधितावच्छेदकरू
पं व्याप्तिः सोपाधौ तु स्वाभाविकं हेतुतावच्छेदकं न तत्साध्यसंबंधितावच्छेदकमत एव स्वसमीपवर्त्तिनि स्वसमानाधिकरणे
व्यभिचारिणि हेतौ स्वनिष्ठसाध्यसंबंधितावच्छेदकरूपलक्षणव्याप्तिसंक्रामकतया साध्यव्याप्यस्यैवोपाधित्वमाचार्यै ३१
रनुमन्यत इत्याह अत एवेति साध्यन्यूनवृत्तावुपाधिव्यवहारं दूषणोपैकरूपस्य वाच्यतयाउपाधिपदस्य योगरू

ढिलव्यवस्थापनेननिराकृतेलक्षणं त्विति लक्षणं दूषणोयैकं रूपं साध्येति अत्रसाध्यव्यापकत्वमात्रंविवक्षि
तंतावतैवसाधनवत्तित्वव्यतिरेकेणसाध्यव्यतिरेकोन्नयनसंभवात्साधनवत्तिव्यापकनिवृत्त्यासाध्यसाधनसंबंध
निवृत्तिसिद्धावर्थात्साध्यनिवृत्तिःसिध्यतीतिप्रकारान्तरप्रदर्शनायपरंतथाविधोक्तिः रूढ्यान्यूनवृत्तावुपाधिव्यव
हारंनिरस्ययोगेनाधिकवृत्तौतंनिरस्यतिविषमेति प्रवृत्तिनिमित्तं यौगिकं व्यभिचारोन्नायकत्वमेवेत्येवकारेण
योगानादरंसूचयति उपाधित्वं उपाधिपदप्रवृत्तिनिमित्तं उपाधिता उपाधिपदवाच्यता योगादरेतुलाघवात्
साध्यव्यापकत्वमात्रेरूढिरितिभावः॥ ॥ ॥ आसिस्वरूपंनिरूप्यपरमतनिराकरणपूर्वकंस्वमतेनतद्ग्राहोपा
यमभिधातुंप्रथमंप्राभाकरमतमुपदर्शयतिसेयमित्यादिना दर्शनानांप्रत्येकंहेतुत्वंमिलितानांवा मेलनमपिस्वरूपतो
व्यापारतोवा आद्ये दर्शनानामिति द्वितीयेत्वाशुतरेति क्रमिकाणामपिस्थिराणामस्थिराणामपिसहोत्पन्नानांमेल
नमस्तीतिउभयमुपात्तं तृतीयमाशंक्यनिराकृतेनचेति व्यापकसामानाधिकरण्यात्मिकायांव्याप्तौसाध्यसामाना
धिकरण्यांशस्यप्रथममेवगृहीतत्वान्अगृहीतव्यापकत्वांशग्रहे सहचारदर्शनजन्यसंस्काराणां हेतुत्वंवाच्यं
तच्चनसंभवतिभिन्नविषयकत्वादित्याह समानेति समस्त्वगृहीतभेदंज्ञानद्वयंनतुवैशिष्ट्यावगाहीतिभावः नन

शि
३२ न व्याप्तिग्राहकं व्यभिचारादर्शनं व्यापारस्तथा सहकारी व्यभिचारादर्शनसहचारदर्शनसहकृतस्तर्क एव व्याप्तिग्रा
हकः भूयोदर्शनं तु क्वचित्तर्कप्रवृत्तावुपयुज्यत इति निर्गलितं नैयायिकम[illegible]तमाशंक्य निराचष्टे नन्वेवमिति [illegible]
र [illegible]तन्मूलकौ व्याप्त्यंतर्ग्राहकतर्कावतार इति भावः तर्हीति नन्व्याप्तिप्रत्यक्षं प्रतितर्को हेतुः न तु स्मरणमिति न व्य
भिचारावकाशः विनानुभवं स्मरणायोगात् न जन्मांतरीणः स जन्मांतरेपि पर्यनुयोगतादवस्थ्यात् अनादित्वेन च परि
हारः परतोपि विचारणीयत्वेनेति मानाभावात्तर्कस्य च हेतुतासिद्धेः यद्विचारगृहीतस्य चारगृहीतपुरोवर्तिसंसर्गक
स्य वा प्रत्यासत्तित्वे अतिप्रसंगः तद्वा पुरोवर्तिनि तद्ग्रहो दृश्यतां न तु सामान्यत्वेनेत्याह नत्विति साध्यव्यापकत्वं साध्यसमा
नाधिकरणाभावप्रतियोगित्वं तद्ग्रहः साध्याधिकरणैकव्यक्तिवृत्तितया गृहीतभावस्य तादृशाव्यक्त्यंतरग्रहं विना न संभ
वतीति भूयोदर्शनापेक्षा तदाहितसंस्कारो बहिरिंद्रियमात्रस्य सहकारि मनसोपि वा आद्येन व्यापारं विनेति द्वितीयेना
नीति परिशेषात् साध्यसाधनसंबंधग्रहकातिरिक्तानपेक्षग्राहकत्वात् उपाध्यभावग्राहकस्यापेक्षणीयत्वादसिद्धं नि
रस्यति तथा हीति उपाधिस्मरणादुत्साहि नन्वेवमसन्निकृष्टादिहेतुकानुमितिर्न स्यात् उपाधियोग्यानुपलंभविरहाद ३२

त आह ननु वक्ष्यतेति तथा च व्यवहारस्य हेतुरेवानुमितिहेतुः न च सोपाध्यभावत्वेन ज्ञानमुपाधिस्मरणादित्यादि तु न तत्कारण
प्रदर्शनपरं अभावत्वं चेदमिह नास्तीति प्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः अतिरिक्तपदार्थो वेत्यन्यदेतत् एवं च सो
पाध्यभावत्वेन ज्ञानेऽधिकापेक्षां न वारयाम इति भावः व्याप्तिस्वरूपे संशयाभावमापादयति निरुपाधिसंबंधत्वेन रूप
व्याप्तित्वेन वा आद्ये इष्टापत्तिः द्वितीयमपि किमुपाधिस्मरणादिकं विना तत्सम्बन्धाने सति वा संबंधग्रहे आद्ये किं विद्य
मानत्वमिति तथा च तद्ग्रहमात्रं न तु तदभावत्वेनापि ग्रह इति समानप्रकारकनिश्चयाभावात् संशयो नानुपपन्न इति भावः
द्वितीये ज्ञानप्रामाण्येति प्रथमेति सत्युपाधिस्मरणाद्यावित्यादि न चात्रापीति सर्वत्र एतत्समाधावित्यर्थः अवगत इति
स्वरूपकीर्तनमात्रं महानस इत्यस्य अभिव्यक्ति इत्यादि महति कार्ययोर्योग्यायोग्ययोर्भूतत्वरूपसामान्यतद्वतोरित्ययोग्ये वह्नौ तादृ
श प्रतियोगित्वसामान्यतद्वतोरप्यस्ति तान्योन्याभावयोर्योग्यत्वादिति भावः न प्रतियोगितावच्छेदकमिति न धूमसामान्यस
मानाधिकरणतादृशाभावप्रतियोगितासामान्यावच्छेदकमित्यर्थः अयं साधनताव्यापकव्याप्यत्वाभावः साध्ये अधिक
रणस्वरूप एव एवं साधननिष्ठसाध्यसंबंधे साधनतावच्छेदकातिरिक्तावच्छेद्यत्वाभावो यदीत्यनुशयानो येन रूपेण सा

शि ३२
नाव्याप्तिरनुमितंगतद्भिविशिष्टानसरूद्दर्शनगम्यासामानाधिकरण्यमात्रस्यतुतथाभावेनवारयामइत्याशयेनाहकिंचेति विशेषण
ज्ञानसाध्यसाधनसामग्रीसाध्यसाद्य नवेति उपलक्षणमेतत् उपाधेरयोग्यस्यापिसंभवादुपाधिसामान्यतद्गोमूर्तादिसामा
न्यतद्गोरितात्पर्यं नान्योन्याभावयो [redacted] रयोग्यतयाप्रत्यक्षेणाग्रहीतुमशक्यत्वात् योग्योपाधिव्यतिरेकग्रहणेवानुमा
नांगं अयोग्योपाधिग्रहेप्यनुमितिप्रसंगात् यथाश्रुतंदूषयति योक्तमित्याहविना व्यभिचारेत्यादि अत्रचप्रत्यक्षेणात्य
संशयस्यापिप्रतिबंधकत्वमाद्त्यव्यभिचारशंकायास्तथात्वाभिधानं अन्यथापुनरसाधारणतत्कारणमेलकरूपसाम
तं ग्रीप्रतिबंधिकावोध्या विवेचितंचेदंप्रत्यक्षमणिदीधितौ वक्ष्यतेचाधिकमुपरिष्टात् साधनगोचरसाध्या
भाववद्वृत्तित्वग्रहाभावोहेतुरितिनयुक्तं केवलान्वयिनितथात्वाप्रसिद्ध्याग्रहाप्रसिद्धेः खंडशःप्रसिद्ध्याघटितत्वादृश
प्रमसंभवेपिसर्वत्रतथाप्रमेमानाभावात् अतएवसाध्यतावच्छेदकगोचरहेतुमन्निष्ठात्यंताभावप्रतियोगितावच्छेदकत्व
ग्रहोपिप्रत्युक्तः सकलसाध्यतावच्छेदकेतादृशग्रहेमानाभावात् तथापिसाध्यतावच्छेदकेतत्पुरुषीयतादृशावच्छेदक
त्वग्रहस्यविषयतयाअभावःतद्विषयत्वाभावोवातत्पुरुषीयव्याप्तिग्रहेहेतुः वस्तुतोव्याप्तेःसाध्यसाधनभेदेनभिन्न ३२

तयाविशिष्टयैव कार्यकारणभावः तथा च साधनं यत्र साध्याभाववद्वृत्ति साध्यतावच्छेदकं साधनवन्निष्ठात्यन्ताभावप्रतियोगितावच्छेद
कमित्यादिकमेकविधमनेकविधं वा व्यभिचारज्ञानं प्रसिद्धं तत्र यथायोगं तदभावः पुरुषनिष्ठो व्याप्तिग्रहे हेतुः अत एवैकविधव्यभि च
चारज्ञानविरहेपि अन्यविधव्यभिचारज्ञानात् व्याप्तिधीप्रतिरोधः एवं च क्वचित् व्यभिचारज्ञानस्याप्रसिद्ध्या तदभावस्याहेतुत्वेपि
नक्षतिः प्रसिद्धयाः साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वादिबुद्धेः समानविषयतया तदभावबोधविशेषि नन्वेत त्वानुरोधे
तिदि थाकल्पनं न वयं वारयामः यदि तत्तत्प्रकारादिनिवेशो न विशेषेण पर्यवस्येदिति व्याप्तिग्रहे धूमादिव्यापकवन्हिसमानाधिकरणवृ
त्तिधूमत्वादिकं तादृशसामानाधिकरण्यमात्रस्य रासभादिसाधारण्यात् अतो व्यापकत्वांशग्रहे व्यभिचाराग्रहः समानाधिकरण्य
वृत्तित्वांशग्रहे विशेषणतया सामानाधिकरण्यस्य ग्रहो हेतुरिति मन्तव्यं साध्यसंबंधितावच्छेदकरूपवत्त्वलक्षणव्याप्तिग्रहे
स्य विशेषणतया संबंधग्रहो हेतुरित्यपि केचित् यत्तु विरुद्धे सहचारभ्रमेण व्यापकत्वभ्रमदर्शनात् सामान्यत एव सहचार
ज्ञानं हेतुरिति तन्न असिद्धत्वात् विरुद्धेपि व्यापकत्वसामानाधिकरण्ययोः ग्राहकसामग्रीक्रमयौगपद्याधीनं ग्रहक्रमयौग
पद्यं न तु मिथः कार्यकारणभावः इदं पुनरत्रावधेयं यथाविद्यमानमपि वन्हिलेख्यव्यवहितविप्रकृष्टरासभादिदेशनिष्ठाभा

वप्रतियोगितावच्छेदकत्वं न गृह्यते अभाववद्देशविप्रकर्षादिना ग्राहकाभावात् तथा धूमवह्निष्ठाभावप्रतियोगितावच्छेदक
त्वसत्वेप्यग्रहसंभवात् नानुपलब्धेः प्रतियोगिसत्वविरोधित्वादिलक्षणायोग्यतेति न तत्साभान्याभावो लौकिकप्रत्यक्ष
गम्यः परन्तु कथंचित् विरोधस्फुरणादिवशात् धूमत्वादौ गृहीतो धूमनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावो वह्निव्या
प्यत्वुपनयमर्यादया गृह्यते [illegible] वानुमानादिना व्यभिचारग्रहेपि न व्याप्तिधीनिरासात्मनिसाधारणो वा दोषविशेषाजन्य
उपनीतभाने संशयादिसाधारणस्य निश्चयात्मनो वा विपरीतज्ञानमात्रस्य वप्रतिबंधकत्वात् तत्तद्भावादौ देशांतरवृत्तित्वसंभाव
नाविरहादिवशात् तस्माणे वन्ह्यभाववद्वृत्तित्वाभावो धूमत्वावच्छेदेन गृह्यते लाघवादिति [illegible]॥ ॥ कुत्राशनरासभादिप
दार्थसार्धस्यान्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानोप्यवश्यमेनेषामन्यतमं कारणं धूमस्येति सवधार्य संदि
ग्धे किमेतानि सर्वाण्येव कारणानि किंवा कानिचित्तथा कानिचिन्नेति तत्र चयान्वयव्यतिरेकेपि इतरेभ्यस्तथाविधेभ्यो धूमोत्पत्ति
मुपलभमानस्तस्याहेतुत्वमवधारयति यथा रासभादेः यस्य च व्यतिरेके तादृशापरसकलान्वयेपि धूमानुत्पत्तिं पश्यति तस्य कार
णत्वमेव निश्चीयते यथा वन्हेः तत्र चाकारणकत्वसंदेहो विरोधिताभासाद्यनुपेन तर्केण निवर्त्यते तादृशतर्कभाह धूमउ ३४
त्वादिना अनुसंधेयः प्रत्र अवश्यं कार्यकारणभावग्रहः तदधीनत्वाद्व्याप्तिबुद्धेः सामानाधिकरण्येनान्वयव्यतिरेकग्रहात् अथ

मानस्यार्थे वह्नेस्तु हेतुमत्त्वाग्रहणं तत्तस्यैव व्याप्तिपरिच्छेदकत्वात् विपर्यये तत्कोटिमात्रपर्यवसायिनस्तर्कस्य तदभावकोटिकशं
कानिवर्तकत्वं अन्यथा धूमो यदि वह्नित्वजन्यजन्यान्यतरो न स्यात् तज्जन्यो न स्यादित्यादेरपि तथात्वापत्तेः तथा पर्यवसायिता च क्वचिद्वि
शेषतो व्याप्त्या सामान्यतो व्याप्त्या च विपक्षधर्मतावलात् तत्संपत्तये च अत्र वह्निसमवहितत्वाजन्यत्वेन पक्षो विशेषणीयः विशेष
णत्वेनोपस्थिते विशिष्टाभावबुद्धेर्विशेष्याभावमात्रावलंबनात् तथोपस्थितिविरहेपि चावह्नेरित्यादिशंकाद्वयमग्रे निरसनीयं ॥
यत्तु चोवह्न्यजन्यमपि वह्निसमवहितजन्यं वह्निसमवहितताजन्ये संभवतीति वह्निजन्यत्वपर्यवसितं वह्निसमवहितजन्यत्वया
च्यं तथा च घटादौ व्यभिचारवारणायापाद्यकोटिप्रतियोगिविशेषणार्थकं सत्त्वांतं अजन्येऽजन्ये च नांतरीयवह्निके व्यभिचार
वारणाय जन्य इति तदर्थस्तु वह्निसमवधानकालीनवह्नित्वसमवधानेतरयावत्कारणजन्यत्वं तथाविधयावत्कारणक
त्वमिति यावत् तथा च वह्निसमवहितताजन्यत्वे सति वह्निसमवधानकालीनवह्नित्वसमवधानेतरयावत्कारणको न स्यादिति
पर्यवसितोऽर्थः यत्तु नांतरीयवह्निके व्यभिचारवारणायापादककोटावेव विशेषणं सत्यंतं तात्पर्यः स च वह्निघटितसामग्र्यजन्य
त्वमिति मम प्राक्तदसिद्धेः अनावाधादूमीशंकादुष्टापत्तिपर्यवसितानतीयापुनरापादकाव्यप्रसिद्धिपर्यवसायिनी अवह्नेः

वन्हिमूलत्वान् तदुपादानमिति करणव्युत्पत्त्या तदीयकार्यप्रयोजकत्वज्ञानपरं तादृशान्वयव्यतिरेकानुविधानज्ञानपरं वा अग्रे
तनमपि स्वक्रियापदं तत्परमेव रूपादेः शंकाप्रतिबंधकत्वेमानाभावात् कारणताग्रहोत्तरकालीनत्वाच्च यद्यपि च एतावता धू
मत्वावच्छिन्नं प्रति वन्हेर्जनकत्वेनाप्यावितृणारणिमणिन्यायेन वैकल्पिककारणतायामपि तथात्वसंभवति तथापि विशेषयोः का
र्यकारणभावग्रहः तर्केण तद्विरोधिशंकायामपनीतायां जायमानः सामान्यव्यभिचारानिर्णयादनुगतागुरुविशेष रूपांतरानुप
स्थितिप्राग्वप्रतिसंधानादिवशात्सामान्यत एव तत्परिच्छिनत्ति प्रामाणिकौ च तत्पर्यवान्वयव्यतिरेकौ फलबलेन च लाघवज्ञानादिमूल्या
याए व सामान्यव्यभिचारशंकायाः प्रतिबंधकत्वं कल्प्यते परे तु धूमत्वावच्छिन्नस्य वन्हेरन्यत्वेन अन्यत्वविशिष्टस्य यथाश्रुत वन्हेः
समवहितजन्यत्वस्य व्यतिरेक एवापादनीयः तथोक्तन्यायेन तादृशवन्हियुक्तकारणकलापजन्यत्वग्रहेण तद्व्यतिरेकजन्यत्वशंका
निरासात् वन्हिविरहेपि निरतिशयस्यैव तादृशसमूहस्य धूमजनकत्वसंदेहस्य तथाविधाधूमानुत्पाददर्शनेनैकायोगात् तादृशस्यैव च
क्वचिद्वन्हिं क्वचिच्चेतरद्रासाद्यजनकत्वसंभावनायां क्वचित् धूमानुत्पादप्रयोजकत्वेनावधृतस्य वन्हिविरहस्यैव तथाविधसमू
हसत्वे धूमानुत्पत्तिसामान्यं प्रति लाघवात्प्रयोजकत्वनिर्णयेनापनीतमन्वसेयस्य ग्रहं वन्हिः वन्हिसमवहितस्य उपादानं अत्र च
नियमव्यवच्छेदस्य वन्हेः समवहितानुपादानस्य प्रयोजके तदजन्यत्वज्ञाने परं परया वन्हिसमवहितोपादानस्य वा प्रयोजकेन त्वता ३५

स्वयं [illegible]अन्वयव्यतिरेकानुविधायित्वस्य ज्ञाने मेघविशेषदर्शने तथाशंकाप्रतिबंधकं तदेव तर्कघटकं तदिदमुक्तं गृहीतान्वयव्यति ता
रेकहेतुमिति [illegible] यादृच्छिकस्य तदनुविधानस्य व्यभिचारित्वान्नियतस्य चोक्ताभेदसंपादकत्वादिति वदंति तच्चिंत्यं केनचित्कार्य
कारणभावग्रहानंतरं व्याप्तिग्रहाय व्यधिकरणस्य जनकत्वशंकानिरासार्थमयं तर्कः तथा च धूमो यदि स्वसामानाधिकरण्यातिरि
•क्तप्रत्यासत्त्या वन्ह्यजन्यत्वे सति सामानाधिकरण्यप्रत्यासत्त्या वन्हिजन्यो न स्यात् दूरजन्यो न स्यात् दप्रत्यासन्नस्याजनकत्वात् तादृ
शजन्यत्वं च प्रत्यासत्त्यंतरशालिवन्हिसत्वेपि धूमानुत्पादादिना ग्राह्यमिति इदमेव च वाचोभंग्यापरे परिष्कुर्वंति धूमो यदि वन्ह्य
नधिकरणदेशानुत्पत्तिकत्वे सति वन्ह्यधिकरणदेशोत्पत्तिको न स्यात् अन्यो न स्यात् तादृशानुत्पत्तिकत्वे ग्रहण्य धूमानुत्पत्तिप्र
तिवन्हिसंबंधाभावस्य प्रयोजकत्वे गौरवे तु पस्थितत्वात् लाघवाच्च तादृशसंबंधाभावस्यैव तथात्वावधारणादिति तच्चिंत्यं
मिथ्यात्वनु परं प्रति व्याप्तिग्रहोपाये प्रदर्शनीये व्यभिचारशंकानिरासहेतुत्वेनोपदर्शिततर्के प्रकृतशैथिल्यादिशंकोद्भावकत्वप्रति
व्याघातीयमुपदर्श्यते मैवं शंकिष्ठाः तथा सति तत्त्वार्थत्वेन यातत्र तत्र कारणोतर्वेव प्रवृत्तयो व्याहन्येरन् यदाह न स्वेवं संभ
वति स्वयं वन्ह्यादिकमिति प्राहुः तदेति नत् व्यभिचारादर्शनं व्यभिचारज्ञानसामान्याभावः अयोग्यत्वादिसंदेहेपि श
कृादिनाअर्थनिश्चयात् [illegible]र्कस्वरूपमित्यपि केचित् ननु वस्तुतो व्याप्तिसत्वे तर्काभासात्प्रमाभ्रमयोरुत्पादानुत्पादाभ्यां व्य

त्रि
३६ भिचार इत्यत आह विशेषदर्शनेति तथा च यथा तस्य बाध्यत्वादभाववद्विशेष्यकत्वे सत्यसत्यत्वेन तथा तर्कस्यापीति अत्र च सत्यत्वादि
संपादकैव धर्मिणो बाध्यादिमत्त्वे बाध्यादिमद्भिन्नसंनिकर्षे वा तात्पर्यं लाघवात् तर्कस्य व्यभिचारेण हेतुतायास्त्वयमेव दर्शितत्वाच्च अथ
विपरीतज्ञानानंतरप्रत्यक्षेण निवर्तकत्वेन विशेषदर्शनस्य हेतुत्वं तस्य तर्कस्यापीति चेत् अस्तु तावदापाततस्तथा तथाप्यन्यत्र कु
प्तप्रामाण्यादि प्रयोजकादेव तत्र प्रामाण्योपपत्तौ न तस्यापि विशेषतः कारणत्वं गौरवात् उक्तं च विशेषणज्ञानस्य विशिष्ट
ज्ञानकारणत्वमते सर्वत्र विशिष्यसंबद्धासंबद्धविशेषणज्ञानमेव प्रमाभ्रमप्रयोजकत्वमिति वदंति तत्र प्रमाणेति इदमनादि
सिद्धत्वज्ञानस्य प्रयोजकत्वमभिप्रेत्य परार्थानुमानाभिप्रायेण वा अनुमानत्वात् व्याप्तिग्रहाधीनप्रवृत्तिकत्वात् व्यभिचारादि
शंकेति द्वारेण च द्वारिणो नान्यथासिद्धिरिति भावः अनुमानमात्रमिति अनिश्चितसाध्यपक्षके सर्वत्र संभवित्वात् पक्षे सा
ध्यनिर्णये अनुमानवैफल्यात् उपाधित्वेन स्वव्यभिचारेण साध्यव्यभिचारोन्नायकत्वेन अनुमानोच्छेदकता [redacted] ज्ञानमेव मान
साध्यव्यापकता बुद्धिविरुद्ध्यादित्याशंकायामाह अपि चेति करवन्तीति परमतेनेदं स्वमतेन तु वायुवादौ स्पर्शादिना रूपादिसाध
ने शंकातिरिक्तविशेषणप्रक्षेपेण वा तद्बोध्यं॥ ॥ ॥उक्तव्याप्तीति प्रतियोग्यसमानाधिकरणत्वविशेषणविरहेण ३६

लाघवात् [redacted]संयोगवन्भेदस्यापि संयोगाभावस्येव हेतुसामानाधिकरण्यग्रहेप्यनुमितिदर्शनात्तत्रापि तद्घटितं
निवेशनीयमिति चेत् लाघवं [redacted]वं प्रतियोगिसामानाधिकरण्याद्यनुपस्थितौ हेतुसमानाधिकरणाभावप्रतियोगितानव
च्छेदकत्वग्रहेप्यनुमितिर्न स्यात् [redacted] प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानायां वृत्तौ हेतुसमानाधिकरणाभावास्त
त्प्रतियोगितावच्छेदकत्वाभावग्रहो हेतुरिति [redacted] तादृशाभावग्रहो हि न हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदक
त्वेन रूपेण प्रतियोगिसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वग्रहे तदसंभवात् [redacted]पि प्रातिस्विकरूपेण
जन्मसहस्रेणाप्यसंभवात् [redacted]पि रूपान्तरेण वह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य धूमसामानाधिकरण्यभ्रमेपि वह्नि
त्वानवच्छिन्नप्रतियोगिताकधूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्वमिति ज्ञानेप्यनुमितिप्रसंगात् [redacted]
हेतुसमानाधिकरणत्वेनाज्ञायमानवृत्ति [redacted] वह्नित्वे धूमसमानाधिकरणासमान्याभावप्रतियोगितावच्छेदकत्वभ्र
मेप्युक्तरूपेण तथाग्रहसंभवात् धूमाधिकरणान्तराननुपस्थितौ वह्नित्वेनासंभवात् दोषश्च तादृशभ्रमोत्पादेपि एतस्मादेरिव व
न्हेरप्यनुमानाच्च एवं वह्नित्वावच्छेदेनास्तु कुत्राभावभ्रमदशायांम् अस्तु कुत्रप्रतियोगिकावह्न्यन्तरप्रतियोगिकाभ्रमे धूमस

शि ३७ मानाधिकरणाभावास्तत्प्रतियोगितानवच्छेदकं वह्नित्वमिति ग्रहेपि [redacted]ं प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभा
वप्रतियोगितावच्छेदकत्वग्रहविरोधिग्रहविषयत्वेन तेषां तादृशावच्छेदकत्वग्रहविरोधित्वेन तद्बुद्धीनां वा अनुगमात् विरु
णद्धि हि सामान्याभावबोधोपि सामान्यघटितविशेषवत्त्वबुद्धिं सत्यां हि घटो नास्तीति बुद्धौ जात्वपि नीलो घटोस्तीति बोधानुदया
त्तनरूपस्य हेतोः तद्धि विशिष्टप्रतियोगिमत्ताबुद्धिं प्रतिनवच्छिन्नाभावबुद्धेः विरोधित्वात् अवगाहन्ते च नीलघटवत्ताबुद्धिरपिघ
टत्वविशिष्टमद्वत्तां [redacted]तावच्छेदकतत्वयोरन्योन्यात्यंताभावबोधयोरुपसंग्रहः हेत्वाभासे च वक्ष्यमाणरीतिरिहाप्यनुसं
धेया [redacted]चसाध्यतावच्छेदकस्याभावप्रतियोगितानवच्छेदकत्वग्रहान्नानुमितिः [redacted]तादृशावच्छेदकत्वग्रहाविरोधित्वमपि
निवेशनीयं अन्योन्याभावस्याव्याप्यवृत्तित्वपक्षे तु सुतरां विशेषणदानमिति [redacted]यं तथाप्यन्योन्याभावे प्रतियोग्यवृत्तित्वस्यै
व विशेषणत्वं न प्रतियोगितावच्छेदकसंबंधभेदानुधावनमतो लाघवमिति यथाश्रुतग्रंथानुरोधिनः [redacted]रे तु अन्योन्यात्यंता
भावगर्भव्याप्त्योरेकतरग्रहेप्यन्यतरग्रहादनुमितेरनुभवविकलात्तदुभयसाधनमेव हेतुः इंद्रियसंयोगादिवच्च विशिष्यैव कार्य
कारणभावान्न व्यभिचारः [redacted]तु यद्रूपावच्छिन्नप्रतियोगिताकत्वेनोपस्थितो अभावो धर्मितागत्वमाणः साध्यवत्त्वबुद्धिं विरु
णद्धि तद्रूपावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यावगाहिनो ग्रहस्य विरोधित्वेन व्याप्तिबुद्ध्योरननुगम नीयाः प्र ३७

तिवधीतत्वसाध्यतावच्छेदकत्वं तान्योन्याभावग्रहो साध्यवत्ताबुद्धिं केवलान्वयिस्थले च भ्रमरूपस्यैव तद्ग्रहस्य प्रसिद्धि[redacted]त्वं साध्यता कथंचित्
वच्छेदकं साधनसमानाधिकरणात्यंता भावप्रतियोगितावच्छेदकत्वावगाहि साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वे च साधनसमानाधिकरणा
न्योन्याभावप्रतियोगितावच्छेदकत्वावगाहियो ग्रहस्तद्विरोधित्वं साध्याभाववद्वृत्तित्वसाध्यवदन्यवृत्तित्वोभयावगाहिग्रहविरोधित्वा
दिकं वाननुगमकं वाच्यं केवलान्वयिनि प्रसिद्धिः पूर्ववदनुसंधे[redacted] अधिकं च हेत्वाभासे वक्ष्यमाणरीतिरिहाप्यनुसं[redacted] ग्रंथस्तू
पलक्षणपरः अनौपाधिकत्वमात्रव्यवच्छेदाय यद्रूपस्यानौपाधिकत्वं तल्लक्षणमिति व[redacted]ति व्यभिचारज्ञानस्य व्याप्तिधीहेतुत्वात्
व्याप्तिग्रहप्रतिबंधकग्रहविषयत्वेन व्यभिचारस्याभासत्वे सोपाधिकत्वज्ञानं तु न साक्षाद्व्याप्तिधीविरोधि विरोध्यविषयकत्वात् किंतु
व्यभिचारधीद्वारा वक्ष्यते चानुमितेः तत्कारणज्ञानस्य वा साक्षाद्विरोधिन एवाभासत्वमिति निरुपाधित्वज्ञानं च न व्याप्तिधीहेतुः प्रा
प्य नाभावात् तथात्वेप्युपाधेराभासत्वायोगाच्च [redacted]दन्योन्याभावस्याव्याप्यवृत्तित्वे प्रतियोग्यवृत्तित्वविशेषितत्वद्वृत्ति
लक्षणस्य संयोगसाध्यके व्यभिचारिण्यति व्याप्तिः संयोग्यन्योन्याभावस्य केवलान्वयित्वात् [redacted]व्याप्यवृत्तिसाध्यके स्वव्यापकसाध्य
सामानाधिकरण्यं व्याप्तिः अव्याप्यवृत्तिसाध्यके तु स्वव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकात्यंताभावेन तादृशरूपविशिष्टा
वच्छिन्नप्रतियोगिताकान्योन्याभावेन सममसामानाधिकरण्यमिति चेत् स्मृतिसंस्कारजन्यज्ञानविषयत्वादि केवलान्वयिसाध्यकेषु

द्वि
३८

कागतिः ...पत्वाधिकरणयत्किंचिद्व्यक्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्कत्वं
यद्धर्मविशिष्टाधिकरणयत्किंचिद्व्यक्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वे सति तद्ध
र्मविशिष्टवत्त्वं वा तदिति ... तत्र किं यथाकथंचित्संबंधेन हेत्वधिकरणत्वं विवक्षितं साध्यतावच्छेदकसंबंधेन वा आद्ये गुणः
स्पंदत्वादित्यत्रातिव्याप्तिः गुणत्वस्य स्वरूपसंबंधेन स्पंदवृत्तितया तद्वृत्तिस्पंदनिष्ठतादृशान्योन्याभावप्रतियोगितानवच्छेदकत्वा
त् द्वितीये समवायेन जातेः साध्यत्वे मेयत्वादावतिव्याप्तिः जातिमन्मेयव्यक्तिनिष्ठतादृशान्योन्याभावप्रतियोगितायाः जातिमत्त्वेनानव
एवं च्छेदात् जातिशून्यमेयव्यक्तौ च समवायेन वर्तमानस्याप्रसिद्धत्वात् एतेन ग्रहोऽपि व्याख्यातः अत्यन्ताभावगर्भलक्षणमपि दुर्वचं न
...हि प्रतियोग्यनधिकरणीभूतहेत्वधिकरणनिष्ठात्यन्ताभावे स्यादिगर्भमव्यापकमेव संयोगादिसाध्यकद्रव्यत्वादौ स्वाधिकरणय
त्किंचिद्व्यक्तिवृत्तिप्रतियोगिकात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणहेतुमत्त्वमित्यत्रापि
पूर्ववत् गुणःस्पंदत्वात् जातिमान्मेयत्वादित्यत्रातिव्याप्तिः एवं स्वप्रतियोगिनिष्ठाधेयत्वानिरूपकहेत्वधिकरणवृत्त्यत्यन्ता
भावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणहेतुत्वमित्यत्राप्युत्पत्तिकालावच्छेदेन जन्यानां द्रव्याणा
मजन्यानां च प्रलयावच्छेदेन संयोगनिष्ठाधेयत्वानिरूपकत्वोपगमे संयोगसाध्यकद्रव्यत्वे कालपरिमाणे च हेतावव्याप्तिरि ३८

त्तिकृतंपक्षविशेषण [illegible] नत्वंति साध्यसमानाधिकरणयत्संबंधावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वव्यापकस्यसमानाधिकरणतत्सं
बंधावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वकत्वं [illegible]समानाधिकरणयत्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वव्यापकसाध्यसमाना
धिकरणतत्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वकत्वं [illegible]समानाधिकरणः सर्वेयद्धर्मावच्छिन्नसमानाधिकरणस्तद्धर्मावच्छिन्नसा
मानाधिकरण्यं [illegible]ध्यसामानाधिकरण्याभावव्यापकतावच्छेदकस्वसामानाधिकरण्यसामान्याभावत्वकत्वं वाव्याप्तिः अत्र च साध्य
त्व तावच्छेदकसंबंधेन साध्याधिकरणं हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं तद्वृत्तिद्वयं च [illegible] एकसंबंधेन विशेषणताविशेषेण वा बोध्यमिति
[illegible]॥ ॥ ॥ [illegible]संगात्सामान्यलक्षणं व्यवस्थापयितुमाह व्याप्तिग्रहश्चेति समानाधिकरणयोरेव व्याप्तिरिति पक्षे पर्वतीयधूमे वह्निव्या [illegible]
प्तिविशिष्टधीर्न पर्वतीयवह्निव्याप्तिग्रहं विना स च सामान्यलक्षणां विनानेति कल्पितव्याप्तिविशिष्टलक्षणो यो ह्नृतोपीत्याकुः अत्र च सामा
न्यलक्षणास्वरूपं यस्या इत्यर्थे तु तज्ज्ञानं तत्राद्यमाह साचेंद्रियेति इंद्रियेण
संबद्धधूमादि तस्य विशेषणं तद्विशेष्यकज्ञानप्रकारीभूतधूमत्वादिरित्यर्थः विशेषणतेत्यत्र भावार्थो न विवक्षितः तत्र विशेषणता यस्या
इति बहुव्रीहिर्वा संबद्धपदस्यैव वा परं परासंबद्धः तत्संबद्धविशेष्यकज्ञानप्रकारोऽर्थः तथा च सैव विशेषणतेत्यर्थः अत एव बहिरिंद्रिय
स्य धर्मिणि लौकिकः संबंधः ज्ञानस्य तदिंद्रियजन्यत्वे च नियामकं एवं चाणुत्वेन यत्किंचिदणूपस्थितावपि सकलाणुगोचरो मानसो बोध

शि
३९

इतिवं[illegible] [illegible]नधूलीपटले धूमत्वभ्रमेण वह्निव्याप्तिग्रहे तत्राप्यस्ता धूमत्वेन धूमेषु व्याप्त्यग्रहात् धूमदर्शनादूर्ध्वमनुमितिर्न स्यात् हेत्वभावे
न परामर्शानुत्पादात् [illegible]वधर्मिणि दोषवशात् येन गृह्यमाणेन स्मरणप्रकारीभवता सामान्येन गृह्यमाणेन वा लौकिकसन्निकर्षवि
गमेपि चाक्षुषस्तानापत्तिरिति पर[illegible] सामान्यं च सखंडाखंडभेदेन द्विधा सखंडं चाखंडमेव परं पर्यासं बद्धं प्रत्यासत्तिः येन संबंधेनें
द्रियसंबद्धं सामान्यं ज्ञायते तेन संबंधेनाधिकरणानां सा प्रत्यासत्तिरि[illegible] [illegible]नु यत्र नानाधिकरणप्रत्यासन्नं एकव्यक्तिर्घटादिस्तत्प्रागभावादि
वा अनित्यः प्रत्यासत्तिः तत्र तदभावदशायां तथा प्रत्यासत्त्या ज्ञानानुदयप्रसंग इति [illegible] तत्रापि तद्व्यक्तिद्वारा प्रत्यासन्नस्य घटत्वादेरेव प्र
सामान्य त्यासत्तित्वात् एतदस्वरसेनैव वा द्वितीयं पक्षमाह [illegible]रेव वेति अतिरिक्ता इंद्रियसंबद्धतादृशज्ञानात्मिका अतीताद्यनुरोधात् सा
मान्यज्ञानमेव प्रत्यासत्तिः अपेक्षणीयं च तर्हि इंद्रियकरणकत्वं धूमेवत्वबोधसामग्र्यंतरं अत एवाधुना मसिसौदामिनीसंपातज
निते पि द्रव्यप्रत्यक्षे चरमेन चाक्षुषो निखिलद्रव्यसाक्षात्कारसंतान इति नव्याः इयं च धर्मविषयकं ज्ञानं धर्मिणां प्रत्यासत्तिः इतरा
तु यद्विषयकं ज्ञानं तस्य अत एव सुरभि चंदनमित्यादौ सौरभत्वादेरपि भानमिति ततः स्मर्तव्येति धूमसमानाधिकरणात्यंताभावा
प्रतियोगिवह्निसमानाधिकरणवृत्तिधूमत्वं वह्निमन्याद्वृत्तित्वं या वह्निसंबंधितावच्छेदकरूपवत्त्वं वा व्याप्तिः एकैव सा सर्वधूमसा
धारणीति भावः [illegible]सेनैतावता पर्वतीयवह्नेरसन्निकर्षेतत्सामानाधिकरण्यग्रहायोगादन्यदीयवह्निसामानाधिकरण्यस्य च ३९

तत्राभानांगीकारे भ्रमत्वापत्तिरिति द्रष्टव्यं गवादिपदे घटमीति शक्त्यनुभववशाच्च स्मरणे हेतू हेतुमान्वा कार्यबोधः नन्वेवं जातिशक्ति
वादविरोधः जातौ व्यक्तौ च शक्तिः परंतु जातिविषयत्वेनैव सा ता व्यक्तिं स्मारयति अनुभावयतीति तद्र्थादिति वक्ष्यमाणत्वात् अतद्गुण
संविज्ञानबहुव्रीहिणा पश्वादिलिंगादिपदाभिप्रायेण परीक्षावसेयपि कश्चित् विशेषणतानसाध्येति न न पक्षतावच्छेदकज्ञानजन्यतया
सिद्धसाधनं न च वह्निविशिष्टज्ञानं तत्तद्धी साध्यमिति सामान्यव्याप्त्यादरात् अभावत्वप्रतियोगित्वयोरप्यनुपस्थितयोः प्रकारत्वात् वह्नि
विशिष्टज्ञानत्वेन तद्बुद्धिविशिष्टज्ञानत्वेन वा तज्ज्ञानजन्यत्वसाधनाद्वा विशिष्टवैशिष्ट्यत्वाद्यभ्युपगमवादः वस्तुतो विशेषणतावच्छे
दकादीनां युगपदिन्द्रियसन्निकर्षाभावात् तथा प्रत्यक्षं अनुमित्यादिस्तु तादृश्येण व्याप्त्यादिग्रहात् अत एव वानेकव्यक्तिकद्रव्यत्वादिविशेष
णतावच्छेदककानुमित्यादौ तज्ज्ञानार्थं न सामान्यलक्षणादरः अस्तु वा दण्डीत्यादिप्रत्यक्षे दण्डत्वादिना दण्डसंयोगवानित्यादौ च दं
डसंयोगत्वादिना वा यत्किंचिद्व्यक्तिज्ञानं कारणं दृष्टान्ताभावादिति विशेषणज्ञानत्वेन हेतुत्वस्य विशेष्यज्ञाना दिकारणत्वाप
त्ता मानाभावेन च निरस्तत्वादिति एतेनास्तु वा विशेष्यज्ञानमपि कारणं अन्यता च निर्विकल्पकमपि सामान्यलक्षणया सार्वज्ञा
पत्यातस्यास्तद्जनकत्वे तु तत एव बाधकान्न कारणमिति निरस्तं अप्रसिद्धधूमवत्त्वादि धर्मिज्ञानस्य संशयहेतुत्वानंगीकारे पि सं
शय एव धर्मिभानार्थं सास्वीकार्या धर्मितावच्छेदकप्रकारकज्ञानस्य प्रत्यासत्तित्वाभ्युपगमे त्वविवादात् तद्धर्मप्रकारकज्ञानस्य तद्ध

शि
४० र्णोऽत्र यत्र सा सत्तिलोपगमात् ननु वदंति प्रसिद्धधूमे धूमत्वेन व्याप्तिज्ञानं तद्धूमत्वेन वा आद्ये संशयोऽसिद्धः द्वितीये धूमत्वावच्छे
स देनैव व्याप्तिग्रहस्य तद्विरोधित्वेनानुपपन्नः कथमन्यथा पृथिव्यादिहृदये वायुत्वाभावव्याप्यत्वानिर्णयेऽपि हृदयं वायुत्वाभावव्यभिचा
रीन वेत्यादिसंशयः अनतिरिक्तसंभावनया तथाविशेषतश्चोपस्थितानामतिरिक्तानां विशेषदर्शनाकांतत्वया अतिरिक्तांतरो
पस्थितये अवश्यं साम्यीकरणीयेति वाच्यं यतो हृदयेषु नातिरिक्तत्वसंभावनातेषु विशेषदर्शनात् नाप्यतिरिक्ते हृदयत्वसंभावना
स्यान्यत्र न हृदयं द्रव्यं द्वयोरसादृश्याच्च न हृदयं प्रसिद्धहृदयभिन्नं यद्रूपभिन्नं द्रव्यं रसादिवात्तत्सर्वं न हृदयं हृदयत्वाभाववदेवेत्यादिविशेषद
आ र्शनेन तस्यापि प्रतियोगात् तदानीं चोक्तसंशयस्य सर्वजनानुभवसिद्धत्वादतिरिक्तसंभावनाया गौरवेणाप्रयोजकत्वाच्च तस्मात्तत्रैव धू
मे हृदये वा धूमत्वहृदयत्वावच्छेदेन व्याप्तेरग्रहाद्व्यभिचारसंशयो युक्तः एतु सामान्याभावभानार्थं सा स्वीकार्येत्यां विना सकलतत्प्रति
योगिज्ञानासंभवादिति मन्न न तदभावज्ञानमात्रे लौकिकप्रत्यक्षे वा प्रतियोगिज्ञानं कारणं तव सामान्यलक्षणाया हृदयत्वादिनापि भाने व्य
ह भिचाराज्ञानाभावाच्च अन्यथा वह्नित्वादिनोपस्थितेन मणिभाववत्त्वाभाववत्त्वसंशयः तेजोभाववत्त्वेनोपस्थितेन तद्योगात् प्रतियोगिविशेषितत्त
दभाने तु विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेते सकलप्रतियोगिविषयत्वं तु तस्यासिद्धं प्रतियोगिज्ञानस्य हेतुत्वेऽपि प्रतियोगितावच्छेदक
विशिष्टयत्किंचित्प्रतियोगिज्ञानादेव तत्संभवात् यावत्प्रतियोगिज्ञानत्वेन गौरवेणाहेतुत्वात् न च तदभावबुद्धौ तज्ज्ञानत्वेन हेतुत्वाद्या
वत्प्रतियोगिज्ञानस्य हेतुत्वमर्थादायातमिति वाच्यं मानाभावात् ध्वंसप्रागभावात्यंताभावाः प्रतियोग्यादित्रयप्रतियोगिकाः द्वया ४०

ग्रहेप्येकग्रहादेवानंतत्वस्याभ्युपगमाच्च अंधकारस्तु तेजोविशेषसामान्याभावो नाभावसमुदायः यावत्तदभावानामेकत्रासंभवात् अ
ननुगमाद्गौरवाच्च तेजोविशेषत्वादिना नस्य तेजःसामग्र्याश्च विरहे तेजोविशेषात्यंताभावप्रागभावादीनामस्य स्वत्वाभ्युपगमात् प्राग
भावप्रत्ययोपि प्रतियोगित्वेन घटत्वादिप्रकारकत्वान्न साध्यः न प्रतियोगितानपेक्षते [illegible] अपघटो भविष्यतीत्यादिप्रत्ययस्य प्रतियोगि
भावप्रत्ययोपि प्रतियोगित्वेन घटत्वादिप्रकारकत्वान्न साध्यः न प्रतियोगिकत्वावगाहने चभ्रमत्वं नचानागते घटे प्रत्यासत्त्यंतरमस्ति सामा
न्यविशेषितं प्रागभावमवगाहते नच प्राचीनास्तत्प्रतियोगिनः तत्प्रतियोगिकत्वावगाहने चरमकारणस्य सामग्रीव्यंग्यः प्रागभावो वाच्यः अन्यथा तदप्रत्ययात् त
त्यप्रत्यासत्त्या घटत्वेनानुभूतस्मृतं [illegible] चरमकारणस्य प्रसामग्रीव्यंग्यः प्रागभावो वाच्यः अन्यथा तत्प्रत्ययात् तथात्वे वाच्यं तथा च तद्धेतुका प्रागभावस्यानु
स्यात्तस्यस्वरूपसत्त्वाः स्वरूपेण वा तथात्वे अतिप्रसंगात् व्याप्यत्वेन गृहीताभावः तथात्वे वाच्यं यादृशकारणकलापानंतरं कार्योत्पादो दृष्टः तद्धेतुरेव व्यंजकत्वाभ्यु
भिन्नैरेव तावत्कालं प्रागभावस्यासत्त्वेन प्रत्यक्षायोगाच्चेति वाच्यं यादृशकारणकलापानंतरं कार्योत्पादो दृष्टः तद्धेतुरेव व्यंजकत्वाभ्युपगमात् प्रागभा
पगमात् अनुयोगिताविशेषादिरूपप्रागभावत्वादेश्च क्वचिदप्यप्रतीतौ तादृश्येणानुमानासंभवाच्चेति भविष्यत्वं हि न प्रागभा
वप्रतियोगित्वं ध्वंसोभाविन्यघटोभविष्यतीति प्रतीतिप्रसंगात् किंतु स्वसत्त्वे भविष्यती त्यादेः समानार्थकत्वात् वर्तमानप्रागभा
वप्रतियोग्युत्पत्तिकत्वं वर्तमानकालोत्तरकालोत्पत्तिकत्वं वा तत्त्वं न चेदमध्यक्षं उत्पत्तेरतीन्द्रियत्वात् इहाद्य घटो भविष्यतीत्या
वप्रतियोग्युत्पत्तिकत्वं वर्तमानकालोत्तरकालोत्पत्तिकत्वं वा तत्त्वं न चेदमध्यक्षं उत्पत्तिमत्तो वा अतएव कपालनाशजन्य
दैवतादृशोत्पत्तेर्देशविशेषः कालविशेषश्चाधिकरणत्वेन प्रतीयते नच प्रागभावस्य उत्पत्तिमत्तो वा अतएव कपालनाशजन्य
घटनाशस्य घटाद्यात्मकत्वात् प्रागभावस्यापि तत्र कपाले नेह घटध्वंसो भविष्यतीति बुद्धिः नभाभवनेश्च समुत्पद्य प्राग्गणोपर

शि
४१ ध्वंसोऽभविष्यति मैत्रे प्रागभावे परं ध्वंसो भविष्यतीति धीः अत्र च धातुना उत्पत्तिः प्रत्याय्यते प्रत्ययेन च धात्वर्थनिष्ठतादृशप्रतियोगित्वं
तादृशकालीनत्वं वा नंक्ष्यति नश्यति नष्ट इत्यादौ च प्रत्ययेन च यथायथं अनागतवर्तमानातीता चोत्पत्तिः तस्यामेव च कालविशेषा
दिर्विशेषणत्वेनान्वेति [illegible] ध्वंसो भाविनाशके परं ध्वंसो नंक्ष्यतीति नष्टे च नश्यतीति व्यवहारः स्यात् नश्यत्ता नाशस्य विद्यमानत्वात्
नष्ट इत्यादि न च तत्रातीतकालसंबंधित्वं वर्तमानत्वं वा निपातादेरर्थः चिरविनष्टेऽपि घटे इदानीं नष्टोऽधुना वेति व्यवहारप्रसंगादिति परास्तं
कृतेऽपि विहिते नाख्याते नहि तावाय यथायथं भावत्वप्रतियोगित्वलक्षणं कर्तृत्वमाश्रयप्रतियोगिनं घञ्कर्ता अभिधीयते कार्यानुसाद
दृष्टायां चाभावधीः सामान्यात्यन्ताभावमवगाहते न च प्रतियोगिसमवायिनि समयावच्छेदेनात्यन्ताभावधीः प्रागभावः भाविनि नष्टे वा घटे
इह कपाले घटो नास्तीति प्रत्ययात् न ह्ययं घटप्रतियोगिकाभावमात्रमवगाहते यत्किंचित् घटवत्यपि तादृशप्रत्ययप्रसंगात् परं तु
घटत्वावच्छिन्नप्रतियोगिताकं न च प्रागभावध्वंसौ तथा संभवतो वा तत्र कपाले ततः पूर्वं परं तत्र बहूनां घटानां नष्टत्वात् उत्पत्स्यमानत्वाच्च
ट अपि एवं कपालादौ कपर्दध्वंसादिमूलनाबुद्धिः अत्यन्ताभावस्य ध्वंसाद्यविरोधित्वादिति तेन तन्नदधिकरणस्य तस्मादतिरिक्तादनुगतादभा
वाद्वा इहेदानीं घटप्रागभाव इति प्रत्ययो न लोकानां अपि एवं जातो घट इति वदन्ती घटध्वंस इत्यादि विलक्षणप्रत्ययबलेन च नाशोऽप्य
तिरिच्यतां ननु प्रागभावः पूर्वत्वं तत्पूर्वत्वादिव्यवहारः अतीतकालवृत्तित्वं तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वविषयकश्च वा
उ स्तु दुःखात्यन्ताभावस्य स्वस्मिन्नुत्तरकालावृत्तिं दुःखसाधनध्वंसं वा समुद्दिश्य क्रियाविशेषे प्रवृत्तिरस्तु प्रमाणान्तरसिद्धं प्रयोजनमु ४१

द्विश्वपुमांसः प्रवर्त्तेते न तत्र वृत्त्यैव तत्सिद्धिः उत्पन्नस्य पुनरुत्पादप्रसंगस्तु लाघवात्कार्यादेः प्रतिबंधकत्वेनापि निरसनीयः तदुत्प
त्तिमहाप्रलयमनंगीकुर्वतां मते स्वाधिकरणसमयध्वंसानधिकरणसमयसंबंधः तदुक्तं अध्वस्तक्षणयोगस्य क्षणयोगोऽजनि
र्मतेति क्षणः समयः तदंगीकारे तु क्वचिदपि यदीयसमयसंबंधे यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्ति तस्य तत्समयसंबंधः स्वत्वादधि
करणक्षणवृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वं वा क्षणत्वं च स्ववृत्तिध्वंसप्रतियो ग्यनाधारसमयत्वं स्ववृत्तिध्वंस
प्रतियोगिप्रतियोगिकयावध्वंसविशिष्टसमयत्वं स्ववृत्तियावध्वंसविशिष्टसमयत्वं वा स्ववृत्तियावदभावविशिष्टसमयत्वं स्वस्वपूर्वव
र्तियावत्स्वदार्थविशिष्टसमयत्वं स्वपूर्वत्वं च स्वाधिकरणयावत्कालवृत्तिध्वंसप्रतियोगित्वं अन्यमात्रस्य कालोपाधित्वान्न दोषः यो यत्का
लवृत्तिध्वंसप्रतियोग्यवृत्तिः तस्य तद्धर्मित्वमुत्पत्तिरिति केचिदित्यिवेन चमुपचीयते किंचिदस्माकमिति एकदेशिनो वर्णयंति अपि पटस्य
त्वानधिकरणेषु तंतुषु तदुत्पत्तिवारणाय सहत्वादीनां तंतूनां तंततंतुत्वेन तत्सत्वजनकत्वं वाच्यं तथा च लाघवादेकप्रागभावः कल्प्यते स च तस्या
यएव प्रतियोगिजनकत्वं विनातिप्रसंगः इत्थं च प्रागभावसिद्धौ प्रागभावत्वेन प्रतियोगिजनकताछिन्नतुकपटेपि तत्सिद्धिरितिचेन्न त्रि
चतुरेषु तंतुषूत्पन्नेषु संयुक्तेषु च तत्पटोत्पत्तिप्रसंगात् यावत्तंतुवृत्तेः पटस्य कतिपयविरहे कथमुत्पत्तिरिति चेन्न कार्यानुत्पादस्य विनाकार
णविरहमनभ्युपगमात् सामग्रीसत्वेऽग्रिमक्षणे कार्यसत्वस्यावश्यकत्वाच्च तत्पटप्रागभावाश्रययावत्तंतुत्वेन तत्पटजनकत्वमिति
चेन्न अवच्छेदककोटौ तत्प्रागभावस्य प्रवेशाप्रवेशयोः कारणत्वे प्रमाणाभावः परस्परसंयुक्तेषु कतिपयतंतुषु पटोत्पादेन नचत

श्री
घटस्य प्रागभावव्याप्यत्वात् संयोगानामपि [redacted] तज्जनकत्वं कृतिप्रयत्नसंयोगेषु तेषु आगतेषु वा पटानुत्पत्तिप्रसं ती
४२ गात् तस्य घटप्रागभावमपेक्ष्य स एव घटो लघीयान् यावत्तानि हन्तेऽग्र [illegible]न द्वित्वानुत्पत्तिर्व्याख्याता [illegible] पुनः इहेदानीं घटध्वंस इतिवदिहे
दानीं घटप्रागभाव इति साधारणप्रतीतिर्लोकानां प्रसज्यं कल्प्यन्तः तत्त्वेन प्रागभावसामान्यलक्षणं च व्यवस्थापयन्तो वर्णयन्ति अव्याप्य
वृत्तेः कार्यस्य द्वितीयक्षणे धारावाहनस्थले च प्राथमिकनिर्विकल्पकस्य [illegible] चतुर्थक्षणे उत्पत्तिकारणसत्त्वे कावच्छेदादिना कार्याभावस्योत्त
रज्ञानाभावस्य च कारणत्वं वक्तव्यं [illegible] लाघवात् प्रागभावस्य तत्कल्प्यते तत्स्वभावाधीनस्वतत्त्वादेशिकत्वस्य देशनिर्णयः संयोगादीना
त् लिलि [illegible]नेनु सर्वत्र तत्संख्याविशेषाणां विशिष्य हेतुत्वाभ्युपगमेनैव तत्तद्व्यक्तित्वाद् नियमसंभवेऽपि युगपदुत्पन्नेषु नित्येषु च त्रित्वाद्युत्पा
दननियामकत्वेन प्रागभावः कल्प्यत इत्यनु[illegible]: [illegible]नुत्पन्ने इच्छाकृतीनां कार्यकारणभावग्रहेण तदुपस्थितिं विना न चेच्छाकृतिकाले ज्ञानेच्छा
साक्षात्कारो योग्यविभुविशेषगुणयौगपद्यस्यात्मनि निषेधात् अतो ज्ञानाद्यन्तरसाक्षात्कार एव ज्ञानत्वादिना इच्छादिजनकत्वाना
दिकं गृह्णातीत्युपेयत इति [illegible] पौर्वापर्यापरिचयेऽधर्मिस्वरूपग्रहेऽपि कारणत्वग्रहासंभवात् इच्छाकृत्यनुत्पादस्थले ज्ञानेच्छयोः
साक्षात्कारात् ज्ञाने इच्छासामान्यव्यतिरेकनियतेच्छाकृतिव्यतिरेकग्रहे मनसा कार्यकारणभावग्रहस्य अवश्याभ्युपेयत्वाच् कृत्यनुसा
ब दस्थले ज्ञानेच्छयोः कृत्यनन्तरं इच्छाकृत्योरसमूहालंबनसाक्षात्कारस्य स्मरणेन ज्ञानानुमानस्यासंभवात् विशत्वं गुल्यवच्छेदेन युग
पद्विशत्विप्रयत्नोत्पादवदिच्छाकृतिकाले ज्ञानोत्पादेऽप्यविरोधाच्च गोत्वे च गोनिष्ठाभावप्रतियोगित्वेन समवेतत्वेन च विशेषितमपि ४२

शेषितत्वा · गवेन एसमवेतत्वं व्याप्यतावच्छेदकं मनुसकलगोवृत्तित्वविशेषितं सामान्यलक्षणयापि गृहीतुमशक्यत्वात् नुसमानविषयकत्वे
नापि समानप्रकारतामात्रस्य प्रयोजकत्वे क्वचिदेव रजतत्वप्रकारकेच्छा क्वचिन्नेति नियमो न स्यात् तादृशाप्रकारान्नयस्य च तदुत्पा
दाभ्युपगमे कथं रजते रजतत्वप्रकारकेच्छा अनुपस्थिते वासंसर्गाग्रहोऽपि न नियामकः असंसर्गाग्रहमपेक्ष्य लघीयसस्तद्विषयतामा
त्रस्यैव नियामकत्वमुचितं सामान्यतश्चागृदिच्छायां व्यवस्थितहेतुभावस्य तद्विषयकज्ञानस्य तत्प्रकारकत्वमवच्छेदकं कल्प्यते लाघवात्
समानप्रकारकत्वेन व्यवस्थिते कार्यकारणभावे अतिप्रसंगभंगाय सामानाधिकरण्यमपि वसमानविषयकत्वमेव प्रत्यासत्तिः असंसर्गा
ग्रहादेः कारणतामपेक्ष्य समानविषयकत्वस्यावच्छेदककोटिनिवेशोऽपि लघीयान् कारणयथार्थत्वायथार्थत्वाधीनस्तु कार्यस्य तथाविधो विशेषः
न रजतत्वप्रकारकेच्छायां तत्प्रकारकज्ञानसंवादिजन्यायां तस्यां दोषाभावसहितत्वं विसंवादिन्यां तु उपस्थितरजतभेदाग्रहसहितं हेतुरिति पर
त्वद्विशापि च संवादिन्यामनुपस्थितरजतभेदाग्रहस्यैव हेतुत्वौचित्यात् दोषाणां रजतभेदग्रहप्रतिबंधकतामभावमपेक्ष्य लाघवा : सिद्धए
वस्तुत्वेसुखत्वेन रूपेणेच्छा लाघवात् तत्प्रकारकेच्छायां तत्प्रकारावच्छेदेन सिद्धत्वज्ञानमेव विरोधि न च तत्स्वत्वे तत्त्वे चोत्पत्तेस्तथाप्यनंगीका
रात् कथमन्यथा प्रोषितस्यात्तान्तकांतामरणस्य तत्कांतावलोकनाद्याविच्छा ज्ञानावलोकनादीनां सिद्धत्वज्ञानादतिरिक्तस्य चासत्वादित्यादि ब
हुतरमूहनीयं असिद्धत्वनिश्चयाभावापेक्षया लाघवादसिद्धत्वज्ञानमेव हेतुः न च सिद्धत्वेन ज्ञाते तत्संभवतीति असिद्धत्वज्ञानार्थं सामान्यलक्ष
णेति चेन्न विशेषरूपावच्छेदेन सिद्धत्वेन ज्ञातएव सामान्येन रूपेण असिद्धत्वग्रहसंभवात् तदेकज्ञानं · ज्ञानद्वयं वेत्यन्यदेतत् सामान्यलक्षणाप्र

श्री
४३ हत्वेनाप्रसिद्धत्वस्यानुमातुमशक्यत्वाच्च वनुवनुसामान्यलक्षणां विनापि अयं कालः सुखप्रागभाववान् सुखोत्पादकालीनध्वंसप्रतियोगि
ना वाकालत्वादेतादृशाकालत्वादेरनुमानादसिद्धसुखस्य तदसिद्धत्वस्य च ज्ञानं सुलभमेव निपुणतरमुपपादयिष्यते चेदं शब्दमणिदीधितौ
विविक्तं पक्ष[illegible] घटःस इत्यादि संशयसमानाकारो हि निश्चयस्तद्विरोधि घटो न वेति संशयस्य कोटितावच्छेदकघटत्वांशे निष्प्रकारकः न च ति
प्रमेयवानिति निश्चयस्तथा अत एव जातिमानिति निश्चयेऽपि घटो न वेति संशयः घटत्ववानिति निश्चयस्तु घटेतरावृत्तित्वविशिष्टघटत्वमव
गाहमानो घटान्यतासंदेहं विरुणद्धि पुरुषाकृतिवक्रकोटरादिनिश्चयवत् पुरुषत्वसंशयं [illegible]सामग्रीविरहादिति घट इति निश्चयं प्रति
घटत्वांशे निर्विकल्पकं ज्ञानं कारणं आप्तिसत्त्वादिना घटत्वज्ञानेऽपि तदनुदयात् सामान्यलक्षणायाञ्च सामान्यप्रकारकज्ञानजनकत्वनिय
मात् विशिष्टज्ञानसामग्रीसत्त्वात्॥ ॥इति सामान्यलक्षणारहस्यं॥ ॥प्रसंगादुपाधिं निरूपयन्नुमाह उपाधीति सोपाधौ साध्यत्वसा
धनत्वेन सम्भवत्यभिमतेति यो यद्व्यापकत्वे सति यद्व्यापकः स तत्रोपाधिरिति निर्गलितोऽर्थः व्यापकत्वाव्यापकत्वे एकरूपेण विव
क्षिते [illegible]पाधेः साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं सा च यावदुपाधिव्यापकव्यापककत्वरूपा नोपाधिकत्वज्ञानादेवग्राह्या
उपाधिव्यापकयावदर्थान्तर्गतस्योपाधेः साध्यव्यापकत्वग्रहः साध्यनिष्ठव्याप्तिग्रहादित्यन्योन्याश्रय इत्यत आह अनौपाधिकत्वेति
व्यापकत्वं व्याप्तिनिरूपकत्वं सा चानौपाधिकत्वग्रहात् गृहीतव्यातत्वविष्ठव्याप्तिज्ञानमपि अनौपाधिकत्वान्तरग्रहादित्यनवस्थेत्यत आ
ह अनौपाधिकत्वेति अन्योन्याश्रयपदमनवस्थापरमिति संप्रदायः अव्याप्यवृत्तिनां व्यापकत्वमुपपादयितुमाह प्रतियोगित्वेति ४३

तदधिकरणानधिकरणत्वं तदधिकरणाधिकरणत्वविरोधिधर्मप्रतियोगित्वं प्रतियोगिव्यधिकरणाभावप्रतियोगित्वं तदितिगृहीतव्यं प्रतियो
गिव्यधिकरणत्वेनाभावो विशेषणीय इति फलितार्थः अथ नेति अनयोरसंकरोऽग्रे दर्शयिष्यते पक्षेतरेति पक्षः इतरो यस्मादिति बहुव्रीहिः
भावप्रधानश्च निर्देशः अस्तमितरयति व्यावर्तयतीति व्युत्पत्तेस्तदवृत्तिधर्मवचन इत्यपि केचित् तादात्म्येन धर्मिणो व्यापकत्वमिति तु पर
मार्थः अत एवाग्रे पर्वतेतरान्यत्वादित्यादि साधु संगच्छते इतरथा तु व्यापकाभावस्यैव व्यापकवेदन्योन्याभावस्यापि गमकत्वमाप्तिस्तु संग
मनीयं व्यतिरेक इति यद्यपि व्यापकाभावमुद्रया गमकत्वे तथा वैयर्थ्येन दोषाय तथापि वास्तवतथावैयर्थ्यम् न्यत्वं विशेषणं देयमित्यर्थः
अनुपयोर्व्यतिरेकव्याप्तिः तयोरेव व्याप्यवृत्तिव्यति रेकिणोरन्वये व्याप्तिरिति नियमः इत्यर्थविशेषणं तथा व्यतिरेके व्याप्त्यभावादन्वयेपि
न तथा अतः साध्याव्यापकत्वान्नायमुपाधिरिति भावः अहेतुकत्वशरीरहेतुकत्वयोर्व्यभिचारात् एवमपि संयोगादौ केवलान्वयिनि च साध्ये प
क्षेतर तिव्याप्तितादवस्थ्याच्च वस्तुगत्येति तथा च पक्षे साध्यवत्तितद्भिन्नत्वं साध्याव्यापकं तद्रहिते बाधोन्नीतस्तु उपाधिरेवेति भावः यद्वि
षयतया ज्ञानस्यानुमितिप्रतिबंधकत्वं तदेव प्रकृते उपाधित्वं वाच्यं नान्यदनुपयुक्तत्वात् तच्च दुष्कल्पं न दोषदुष्टतया पक्षेतरस्यापि
ग्रहादनुमितिमात्रोच्छेद इत्यभिप्रायवानाह अस्त्विति उपाधिमात्रमिति सत्प्रतिपक्षोन्नायकतया दूषकत्वमिति मते इतरथा
तु पक्षावृत्तेरुच्छेदो बोध्यः विपक्षेति विपक्षव्यावर्तकधर्मान्तरविशिष्टपक्षेतरत्ववारणाय निवेशद्वयगर्भता विपक्षाव्या
वर्तकविशेषणानवच्छिन्नसाध्यव्यापकत्वसाधनाव्यापकत्वशालित्वं तद्विवक्षितमित्याशंक्य पक्षेतरस्योपाधित्वमनंगीकुर्व

शि
५२

तन्न वमते नान्ति व्याप्तिरभिहिता वस्तुतो दूषकताप्रयोजकत्वमेव तत्ः तस्यानुपाधित्वाभ्युपगमो वारणाय च विशेषणो पाहान
दूषणमपि न युक्तमित्यभिप्रायेणाह तथापीति यावन्मात्रस्य साध्यव्यतिरेकोन्नयनक्षमसाध्यव्यापकतामात्रस्य दूषकत्वात् दो
षोन्नयनोपयोगित्वात् आर्तित्वादिति तदुत्तरस्येत्यादिः उपाधित्वाभावेपीति उपाधित्वानंगीकारेपीत्यर्थः दूषकताबीजस
त्वे च तस्योपाधित्वे दूषकताबीजं च न व्यभिचारोन्नायकत्वं अपितु सत्प्रतिपक्षस्य तच्च तत्र नास्तीत्यतो न स उपाधिरित्याशंकते
अथेति व्यभिचारोन्नायकतया व्यभिचारानुन्नायकतया अव्याप्यतया अव्याप्यत्वादिना अव्याप्यत्वं अव्याप्यत्वादि सत्प्र
तिपक्षांतरवदिति व्याप्तिपक्षधर्मतारूपबलसत्वेन एकेनापि बहूनां प्रतिरोधसंभवात् बहुत्वस्याबलत्वात् प्रमाणान
ते बोध्या दोषवत्त्वमपि बलमुक्तं तन्न सत्प्रतिपक्षतायां किं त्वेकत्वांगभंगप्रसक्तौ बहुषु तत्कल्पने गौरवं एक एव च लाघवमिति तत्कौ
व्यापकतयेति नोपाधेः सत्प्रतिपक्षमुद्भाव्य तत्र दूषणत्वसंभव इति भावः एवं सत्प्रतिपक्षोन्नायकतया दूषकत्वे बाधस्यापि
निश्चये असाधारण्यात् निश्चये च वैयर्थ्यात् माभूत्सोपि उपाधिरित्याशंकते नन्विति हेतुमतीति अन्यासंकीर्णबाधस्थले व्य
भिचारः प्रतियोगिव्यधिकरणसाध्याभावस्यैव प्रकृते बाधत्वात् तदनभ्युपगमाद्वा आर्द्रेन्धनत्वं विनेति तत्समशीलं विना शुद्ध
साध्यव्यापकस्योपाधेरभावादित्यर्थः तेन भास्वररूपशून्यत्वादेः रूपवत्त्वावच्छिन्नसाध्यव्यापकगुरुत्वादेः सत्वेप्यदोषः ५२

[illegible]तद्व्यतिरेको नासाधारणः पक्षे साध्यस्यासिद्धौ पक्षाभावात् सिद्धौ तु तत्रैव पक्षे वर्तमानत्वादिति वा [illegible] पक्षमात्रवृत्तिरसाधा
रण इत्यभिप्रायात् [illegible]वृत्तित्वभ्रमदशायां तथात्वभिमपरे [illegible]ष्मग्निगतेजस्त्वाग्रहदशायां अप्रतीतसाध्यतदभा
वसहचारत्वरूपमसाधारण्य[illegible] असाधारणो हि साध्यसहचाराग्रहप्रतिबंधेन व्याप्तिग्रहप्रतिबंधः व्यतिरेकव्याप्ता
दरे तु साध्यतदभावयोर्द्वयोरपि तद्विशेषात् सत्प्रतिपक्षो दूषकताबीजं [illegible] व्यतिरेकित्वाद्[illegible]: सत्प्रतिपक्षेत
दनव[illegible]काशात् अतः पक्षेतरोति [illegible] सत्प्रतिपक्षोन्नायकतयोपाधिरेवेत्याह [illegible]ना [illegible] न चैवं प्रागुक्तरीत्या
व्यभिचाराद्युन्नायकत्वस्य सत्प्रतिपक्षोऽनुन्दावनीयतापत्तेः सत्प्रतिपक्षोन्नायकत्वस्य च दूषकताया मबीजत्वे उपाधेर्दूष
णत्वमेव न स्यात् बीजाभावादत आह तस्मादिति तद्वक्तमुपाधेर्व्यभिचारशंकेव [illegible] भवतु वा पक्षेतरो नोपाधिः उपादी
यतां च तद्व्यावृत्तये च विवक्षाव्यावर्तकेत्यादिकं तथापि लक्षणमतिव्याप्तमेव अणुवे जन्यावरण वो वासकर्तृकाः कार्यत्वा
दित्यादौ अणुभिन्नत्वादौ ननु व्यभिचाराद्युन्नायकमात्रेणोपाधित्वे व्यापकव्यभिचारादावतिप्रसंग इत्यत आह [illegible]
स्यो नहूपेण त्वव्यभिचारेण व्यतिरेकेण वा दूषकतायां व्यभिचारस्य सत्प्रतिपक्षोन्नायकतायामतिप्रसंगनभंजकायां
साध्यव्याप्यत्वस्यव्यर्थत्वात् साधनाव्यापकधर्मस्योपाधित्वे साध्यान्वयव्यतिरेकोन्नायकान्वय

व्यतिरेकशालित्वरूपं साध्यप्र योजकत्वं नियामकं अन्यथातिप्रसंगादित्याशंकते अपेति अभवतः
अ सतः मकारः सतः मेवं पक्षेतरत्वेतिप्रसंगः तत्रापि पक्षेतरसाध्यवत्त्वादावतिप्रसंगात् विषमव्या
प्तस्यानुपाधित्वे योगाभावं नियामकमाशंकते नन्विति उपस मीपवर्त्तिन्यादधातिस्वीयरूपमितितु पाधिः यद्धर्म
बोधकशब्दसमभिव्याहारेणचोपाधिपदं प्रयुज्यते तद्धर्मसंक्रा मकत्वं तद्बोधयति यथास्फटिकलौहित्येजपाकुसुममु
पाधिरित्यत्र लौहित्यसंक्रामकत्वात् प्रयुज्यते चशास्त्रे व्याप्यत्व बोधकशब्दसमभिव्याहारेणतत् यथाअत्रसाधने सा
धुपाधिरित्यतो व्याप्तिसंक्रामकत्वलाभः यदभावइति अस्तितावद्विहहेतावुपाधिर्नहोपाधिरितिप्रतीतिः व्यवहारश्च
तावतां व्यवहे लक्षणवाक्यं अवयद्धिसाधनेउपाधिव्यभिचारात् व्यभिचारोनदव्याप्यत्वेव्याप्यत्वेवा यदि यात्तेन संबं
धेनतद्धत्यवृत्तीएवतद्धालंबनमुभयथापिने ह्ययतिः यदभावशब्देनापितथैवचक्तुंशक्यत्वात् तदभावस्य चव्यभिचार
विरोधित्वं तत्सत्वेअवश्यं व्यभिचारविरहः तद्धिरहिणिधर्मेचावश्यं व्यभिचारसत्वेनतत्सत्वेवश्यं व्यभिचारविरहः व्यभि
चारविरहिणिधर्मेचावश्यंनतत्सत्वमितिया दृशाभ्नविरोधोनविषमव्यापकाभावस्य नतत्सत्वेपिव्यापकएवव्यभिचा
रसत्वात् नापिविषमव्याप्याभावस्य साध्यएवतद्धिरहेपिव्यभिचाराभावात् तादृशधर्मस्यचोक्तसंबंधेनोक्तसंबंध ४५

स्वव्यापकवृत्तिस्तत्राप्युपाधिः स एव च सोपाधिः अतएव तदभाववत्त्वलक्षणमनौपाधिकत्वं व्याप्तिरिति जिगीषवे विरोधघ
टकदलद्वये चैकैकस्य व्याप्तिशरीरघटकतादूषकतावानस्यादिति उभयोपादानमिति सर्वसुस्थं यत्समव्याप्ताकाशोभय
मात्रवृत्तिधर्मेणाकाशस्योपाधित्ववारणीयं तदायस्त्वं वृत्तिमत्त्वं बोध्यं अतएव व्यभिचारस्य घटकत्वे अग्रे मेयत्वपदं व्य
तिरेकिधर्मोपलक्षितं अथैतादृशोपाध्यभावस्य व्याप्तिलक्षणत्वे यत्र व्यभिचारित्वेन निर्णीतत्वं तत्र व्याप्तिः न स्यात्सं
तमसत्वेनाभावानिरूपणीतु तत्रासद्धेतावव्याप्तिरित्याह व्यभिचारेति यस्य यद्व्यभिचारस्य यद्व्याप्यत्वस्य वा अभा
वः साध्यव्यापके व्यभिचारविरोधिसमसाध्यव्यापक उपाधिरित्यपि वदन्ति यद्व्यभिचारित्वाभावः साधने साध्यव्यभिचा
राभावापादकः समसाध्यव्यापकोपाधिरिति केचित् न तु व्यतिरेक इति यद्व्यतिरेके अनुमितिप्रयोजकरूपव्याप्त्याद्यन्य
तमं [redacted] भयस्यैव यथाऽसिद्धिव्यतिरेके सिद्धिरित्यपरे: विरुद्धत्वादेरिति विपक्षमात्रगामित्वसपक्षविपक्षगामित्वल
क्षणविरोधव्यभिचारयोरेकैकविरहेपि व्याप्तेरनियमादित्यपरे: यत्र पक्षे हेतुमत्तिं च साध्यं हेतुश्च पक्षावृत्तिः तत्रैकः प
क्षावृत्तिर्हेतुसमानाधिकरणः अपरस्तु पक्षनिष्ठसाध्यवति हेत्वसमानाधिकरण एवोपाधि
त्त्वसाधनपक्षधर्मावच्छिन्नसाध्यव्यापका संकरो बोध्यः यथा घटः प्रत्यक्षो नित्यद्रव्यत्वाद्विभुत्वाद्वेत्यादौ साधना

प्रि
४८

यद्धिन्नसाध्यव्यापकमात्रत्वं पक्षधर्मावच्छिन्नसाध्यव्यापकमुभ्दूतरूपवत्त्वेऽप्यपक्षस्य शोभत्वं वा मिथोऽसंकीर्णमुपाधिः
[redacted]भ्यावगोमि घटोमेयो द्रव्यत्वादित्यादौ गंधवत्त्वावच्छिन्नसाध्यव्यापकं पृथिवीत्वाद्यवत्तिव्याप्तिर्दृष्ट[redacted]ने नरूपेण ज्ञातस्य
दूषकत्वमिसनआह[redacted] [redacted] विरुद्धस्थलीयोपाध्य[redacted]व्याप्तिरपि दृष्ट[redacted] साध्याभावच्छि[redacted] स्तावच्छिन्नेस्यात्
साधनवतीति विशेषणाद्धूनव्यभिचारः नमुभ्द्रुसाध्यव्यापकस्य लएवासिद्धिशंकानिरासायावच्छेदकांशेऽनिवेशनी
यः एवं चाभावस्य घटकतया च न वैयर्थ्यं येन रूपेणोपाधिता विशेषणावत्तिन्नरूपावच्छिन्नव्यभिचारस्यैव वा
हेतुत्वं भुद्रुसाध्यव्यापकस्थले तु साध्यव्यापकव्यभिचारो व्यापकतावच्छेदकार्द्धधर्मतावच्छिन्नव्यभिचारो वा हे
तुरूपन्यसनीयः प्रायशस्तद्धर्मवत्तितद्धर्मविशिष्टसाध्यव्यापकव्यभिचारित्वस्य हेतुत्वेऽपि न वैयर्थ्यं एवं चाभाव
स्यातिरिक्तत्वात् [redacted]पाधिनाऽसाधकत्वासाधनेऽपि न क्षतिः उभ्यावित्तयावद्दोषैरेव तत्साधनीयमिति नि
यमाभावात् तद्धीनव्यभिचारेण तत्साधनसंभवात् संदिग्धोपाधिसमशीलश्च संदिग्धो व्यभिचार इत्यत आह
[redacted] केवलेति तथा च केवलस्यैव साध्यस्य व्यभिचारो व्यतिरेको वा जिज्ञासितो विरोधित्वात् ननु विशिष्टस्य अ ४८

विरोधित्वादिति भावः उक्तान्ताः विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यभिचारेण साधनीयः नन्वविशिष्टसाध्य
व्यभिचारे असिद्धावुक्तादिविवक्षायां तत्सिद्धये उपाधिरुच्यत इति नहीति प्रकृतानुमानविरोधित्वमुक्तसाध्यव्यभिचारस्य सा
धकत्वादिति भावः यत्र वक्ष्यमाणरीत्या अवच्छिन्नसाध्यव्यापकेनापि उपाधिना आह त्वेवसाध्यव्यभिचारः साध
नीय इत्यत आह किंचेति पक्षधर्मावच्छिन्नसाध्यादिकमुपाधिमात्रव्यभिचारो पलक्षकं नो इति न प्राधान्येनोपाधिः
व्याप्त्यादिविरहेण हेतुत्वात् पर्यवसितेति अत्र लक्ष्यतानियामकं दूषकताबीजं सत्यन्तिपक्षोन्नायकत्वं व्यभिचारोन्ना
यकत्वस्य तत्ते साध्यवत्पक्षावृत्तौ व्यभिचारोन्नायके अव्याप्तिः वक्ष्यमाणकृतकत्वोपाधेरदूषकतापाताच्च नहि
तद्व्यभिचारेण हेतोः शुद्धसाध्यव्यभिचारः शक्योन्नयनः बाधानवतारदशायां तादृशव्यभिचाराप्रसिद्धेः न च पर्यव
सितसाध्यव्यभिचारः साध्यव्याप्यताबोधविरोध इति न चैवमपि तत्रसद्धेतावुपाधिसंभवः मीमांसकमतेन तद्भि
धानात् शब्दशब्दयोर्भावप्रधानत्वात् पक्षतावच्छेदकादेरुपाधितावारणाय पक्षावृत्तित्वे सतीति विशेषणं यद्विचेति ए
तद्ध्वस्तत्वं तत्र कृतकत्वसाधनदशायां बोध्यं अनित्यत्वसाधनोपयोगितया कृतकत्वसाधने द्वयोरपि संदिग्धत्वेन एक

शि
४७

तरव्यतिरेकस्य अन्यतरव्यतिरेकासाधकत्वात् एवं हीत्यादि असमवेतत्वेन द्रव्यासमवेतत्वेन वा अर्थान्तरवारणाय साध्य
कत्व इति साध्ये द्रव्यपदं नित्यद्रव्यवृत्तित्वायाः स्फुटतरसिद्ध्यर्थं द्रव्यसमवेते अनित्यद्रव्यासमवेतत्वस्य नित्यद्रव्यसमवेत
त्वमादायैव पर्यवसानात् हेतौ च जन्यपदं परमाणुनित्यत्वासिद्धिदशायां आकाशादौ व्याप्तिग्रहाय विशिष्टाभावस्य चाति
रिक्तत्वान्न वैयर्थ्यं नित्यमहत्वव्याप्ततानित्यथा वन्महत्ववृत्तिजातिपरिचयाय तदित्तिगुण तादृशजातौ प्रमाणाभावात् वै
भवापेक्षिकापकर्षव्यवहारस्यानुगतजातिभिरेव संभवात् तुल्यन्यायतया त्र्यसरेणुत्वापेक्षिकोत्कर्षैरौकजात्या संकरप्रसंगात् च
[illegible] साध्योपाध्यो व्याप्तिदार्ढ्यप्रदर्शनाय द्रव्यपदं गमकतात् तेन विनापि पर्यवसितसाध्यसमव्याप्तत्वोपाधिरिति भ
तेनेदमिति कश्चित् ननु भवतां स्पर्शसाध्यव्यापकं स्पर्शवदसमवेतत्वं कथं नोपाधिः अनवस्थाभिया कस्यचिन्निरवयवस्य स्पर्श
वतः सिद्धौ तत्समवेतद्रव्ये साध्याव्यापकत्वादिति चेन्न तुल्यं भवापीत्यत आह किं चेति सोपाधौ सोपाधिनयानिश्चिते ननु
लभ्यं त्वाभयोग्यतापक्षीयादृशसाध्यं सेद्धुमर्हतितद्व्यापकत्वे सति पक्षावृत्तित्वं पक्षे साध्यसिद्धिविरोधिव्यापकताशालित्व
६ मितियावत् स्वव्यतिरेकेण पक्षे साध्यसिद्धिविरोध्युन्नायकत्वमितिनिर्गलितार्थः भवति च शाब्दधर्मातिरिक्तधर्मरहिते शब्दे अ
नित्यत्वाभावसिद्धिः प्रयोक्तसाध्यसिद्धिविरोधिनी तथासाधनादिमति द्रव्यत्वावच्छिन्नसाध्याभावसिद्धिरपि वस्तुतस्तु पक्ष ४७

धर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वमेव विरोधित्वं सिध्यति च विशेषणवत्ताविशिष्टसाध्यव्यापकव्यतिरेकेणाप्रसु
द्धसाध्यव्यतिरेकः तादृशश्च साधनव्यापकः संग्राह्यः व्यभिचारोन्नायकत्वं च पक्षावृत्तित्वमिति इतरेषां परेषां सत्प्रतिपक्षोन्नयन
क्षमस्य साधनव्यापकस्यैवास्माकमपि व्यभिचारोन्नायकस्य पक्षवृत्तेरसंग्रहो न दोषाय परेषां साधनभेदाद्वास्मा
कमपि पक्षभेदादुपाधिभेदादिति चेदत्र वक्ष्यते ग्रंथकृतैव ॥ ॥ लक्ष्यतावच्छेदकमाह व्यभिचारित्वेनेत्यादिना उ
न्नीयते इति शेषः उन्नायकत्वं च योग्यता सा च व्याप्तिपक्षधर्मते तथा च यद्व्यभिचारो यद्धर्मावच्छिन्नाभावाधिकरणीभूत
यत्किंचिदधिकरणवृत्तित्वं साध्यव्यभिचारव्याप्यं साधनवृत्ति च तद्धर्मावच्छिन्नं तत्रोपाधिरित्यर्थः तेनार्द्रेन्धनाभाववद्वृत्ति
त्वेन वह्नौ धूमव्यभिचारसाधनेप्यार्द्रेन्धनं द्रव्यत्वादिना न तत्रोपाधिः तद्रूपावच्छिन्नाभाववद्वृत्तित्वस्य वह्न्यवृत्तित्वात् प्रसु
द्धसाध्यव्यापके तदभाववन्मात्रवृत्तित्वं साध्यव्यभिचारव्याप्यं अवच्छिन्नसाध्यव्यापके तु अवच्छेदकाधिकरणीभूत
तदभावाधिकरणवृत्तित्वमित्युभयत्रापि संगतिः द्रव्यत्वेन रूपवत्त्वे साध्ये सत्ताद्रव्यत्वजलत्वमात्रविशेष्यकाया धीः
तद्विशेष्यकत्वे सति जलसमवेतनित्यत्वे वा सति पृथिवीत्ववद्वृत्तित्वादित्यादिप्रकारेण व्यभिचारोन्नयनसमर्थोपि पृ

त्रि
४८

थिवीत्वाभावादिर्नोपाधिः नहि पृथिवीत्वात्मकतदभावाधिकरणं तादृशं किंचिदस्ति यद्वृत्तित्वसामान्यं साध्यव्यभिचारव्या
प्यं पृथिवीत्वाद्यावेव व्यभिचारात् न च व्यभिचारोन्नायकतामात्रेण प्रकृतोपाधितानिर्वाहः अपि तु रूपकानां तांत्रिकाणां
च तथाविधव्यवहारविषयत्वेन तदवच्छेदकं च यथोक्तरूपं व्याप्यत्वासिद्ध्युन्नायकं संभवदपि न तथा गौरवात् अत
एवेदं जलमाकाशादित्यत्र स्वाव्याप्यत्वेन जलत्वाव्याप्यत्वोन्नायकस्यापि द्रव्यत्वादेरसंग्रहो न दोषाय अथैवं स्वव्य
भिचारेण व्यभिचारोन्नायकत्वमेव तथास्तु लाघवात्तच्चोक्तोपाधावप्यस्तीति चेन्न एवं तर्हि साध्याभाववत्साधनोभयाधि
करणवृत्त्यभावप्रतियोगित्वमेव तथास्तु अतिलाघवात् अस्तु सहार्थतृतीयाश्रवणे नास्यापि सत्त्व एवार्थः तद्रूपप्र
कारकज्ञाने तेषां नोपाधित्वव्यवहार इति चेन्न तुल्यमिदं त्वदुक्तेपि अत एव वस्तुतः साध्यव्यापकस्य स्थले साध्ये व्याप्यतावच्छेदकं
नियमतः तादृशधर्ममनुसरंतीति यद्वृत्तिसाध्यव्यभिचारनियमोभयवत्त्वमुपाधिव्यवहारस्य वस्तुतस्तु यदभावेन यद्वृद्
न्यत्वेन वा साधनवत्तिसाध्याभाववदुन्नीयते स उपाधिर्लाघवात् अत एव जलत्वतेजस्त्वयोर्न तदुभयत्वेन रूपेण वृ
त्तिदप्युपाधित्वं पक्षव्यभिचारित्वेनैतस्यापि सत्त्व एवार्थः तथाहि पक्षव्यभिचारित्वेन हेतुमद्वृत्तित्वविधया साधनस्य पक्षवा ४८

वच्छेदकीभूतसाध्याभाववद्रूपसाध्यवत्त्वस्य वृत्तित्वं सिध्यति इत्यत्र च साध्यसमानाधिकरणत्वेनावच्छिन्नोपधर्मी साध्यासमाना
धिकरणाद्धूमादिव्यक्तेरर्द्धं धनत्वादिनाउपाधित्वे पुनरवच्छेदकधर्मेण साध्यसमानाधिकरणवृत्तित्वेन विशेषणीयः
तेन जलह्रदत्वाभावाधिकरणायोगोलकवृत्तित्वस्य धूमव्यभिचारव्याप्यवन्हिवृत्तित्वेपि जलह्रदत्वादौ नातिव्याप्तिः नना
द्रव्यत्वेन तैजसत्वसाधने शीतस्पर्शजलत्वाद्यात्मकस्याभावेन तद्वृत्तित्वेन वा द्रव्ये द्रव्यत्वे वा साध्याभावस्य व्यभिचारस्य वा
साधके स्पर्शाभाववज्जात्यभावे [illegible] द्रव्यत्वादिनानुकं बुद्धौ वादिमत्वादौ साध्ये स्वव्यभिचारेण स्वाभावेन वा हेतौ तद्वृत्ति वा
व्यभिचारस्य साध्याभावस्य वा साधके घटत्वादिव्यभिचारित्वमुपाधिरेव घटत्वादेस्तदभावस्य वा गमकत्वेपि धूमप्रागभा
ववद्वैयर्थ्यं [illegible]भावस्यानुपाधितापत्तिः प्रतियोगिनस्तद्वृत्तित्वस्येव या हेतुत्वादित्यवां तस्याप्रवेशेपि वस्तुतो
यस्तदभावस्तस्य तद्वृत्तित्वस्य हेतुत्वानपायात् यदभावाभाववद्वृत्तित्वेनोपस्थितावपि तद्वृत्तित्वेनानुपस्थितेर्व्य
भिचारसाधनेन च न वैयर्थ्यमित्यपि वदन्ति तल्लक्षणमाह पर्यवसितेत्यादि पर्यवसितपदार्थमाह यद्धर्मेति यद्धर्म
वतीत्यर्थः ननु एवं सद्धेतौ पक्षैकदेशवृत्तिधर्मेति प्रसंगः [illegible] यद्धर्मावच्छेदेन साधनवत्ति साध्यं प्रसिद्धं तद्धर्मावच्छि

शि
४१

न्नसाध्यव्यापकत्वं साध्यसाधनसंबंधव्यापकत्वमितियावत् विरुद्धमात्रे चोपाधेर्विरहेपि न क्षतिः लक्ष्यतावच्छेदके च साध्य
सामानाधिकरण्येन साधनतादृशवृत्तित्वेन वा साधनतावच्छेदकं विशेषणीयं साधनव्यापकीभूतधर्मावच्छिन्नसाध्यव्या
पकत्वं वा विवक्षितं विरुद्धेपि साधनव्यापकेनानन्तोन्यतरत्वादिनावच्छिन्नस्य साध्यव्यापकत्वमस्त्येवोपाधीनां प्रमेयत्वा
दिना च वायौ प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वादिकं नोपाधिः लक्ष्यतावच्छेदकस्य प्रयोजकत्वं वा चिन्तनीयाबलाद्व्यभिचा
रिस्थले साधनस्य साध्यव्यभिचार इत्यर्थपर्यवसानात् [illegible] जनकत्वेन वन्हौ कार्यानुकूलत्वा [illegible]त्मकशक्तिसाधने वहि
त रिन्द्रियाप्रत्यक्षत्वस्योपाधेः ग्रंथकृतैव वक्ष्यमाणत्वात् तस्य गुरुत्वात्मकसाध्यस्य साधनस्य चाधिकरणे घटादाववृत्तेरुक्त
रूपाभावात् एवंविधवकुलग्रंथविरोधात् दूषकताबीजस्य तत्रापि सत्त्वाच्च [illegible]ः यद्धर्मावच्छिन्नसाध्यव्यापकत्वं
तद्धर्मावच्छिन्नसाधनाव्यापकत्वं अवच्छेदकत्वं च सामानाधिकरण्येन नचैवं च घटोत्पत्तिकालीनत्वसामानाधिकरण्य
विशिष्टरूपवत्ति तद्घटे अवर्तमानमपि तद्घटान्यत्वं तद्व्यापकं येन पृथिवीत्वेन रूपे साध्ये तद्घटोत्पत्तिकालावच्छिन्नधू
मव्यापकतयोपाधिः स्यात् स्वानधिकरणीभूतसाधनाधिकरणावृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा यत्रापि शुद्धसा ४१

साध्यव्यापकस्य तेऽवच्छिन्नसाध्यत्वेनन व्याप्यता तथा चैतद्धर्माधिकरणीभूतसाध्याधिकरणनिष्ठान्योन्याभावप्रतियोगिता
नवच्छेदकत्वादिरूपं तद्व्यापकत्वमस्त्येव गुणत्वादिना प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वे द्व्यणुकजन्यत्वावच्छिन्नसाध्यव्यापकं
भवत्येवोपाधिः एवं च यत्र यस्यानधिकरणे साधनस्य साध्यव्यभिचारः यत्र च यस्याधिकरणे साध्यं तद्भिन्नमात्रवृत्तिर्यो धर्म
स्तद्वृत्तित्वव्यभिचारेण साधने साध्यव्यभिचारः साधनवृत्तिर्वा तद्धर्मवत्त्वे सति तदभाववत्त्वेन साध्याभावः साधनीयः
साध्यासमानाधिकरणस्य साध्यव्यापकाभावस्याप्यधिकरणं यत् साधनवत् तन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रति
योगिव्यधिकरणात्यन्ताभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्मवत्त्वं वोपाधित्वं एवं च साध्यसमा
नाधिकरणत्वेनैव साध्यवदवृत्तित्ववारणसंभवे पर्यवसितसाध्यव्यापकत्वाभिधानं तु व्यापकाभावेन व्याप्याभावस्य
आवश्यंभावप्रदर्शनार्थं तत्साध्यकतत्साधनकसकलोपाधिसाधारणं चेदं साध्यव्यापकत्वसाधनाव्यापकता
वच्छेदकरूपानतिरिक्तवृत्तिसाध्यसमानाधिकरणयत्किंचिद्धर्मव्यापकतावच्छेदकरूपवत्त्वं अवच्छिन्नसाध्यव्या
पकरूपोपाधौ चान्तः साध्योपाधिशून्यासाधनवतीया व्यक्तिस्तदवृत्तित्वमेव तादृशरूपमित्यपि वदन्ति रू

व्या
५०

पादिसाध्यकद्रव्यत्वादिहेतौ पृथिवीत्वाभावादेरुपाधितापत्तेस्तुत्वविशिष्टसाध्यानधिकरणीभूतसाधनाधिकरणावृत्ति
धर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वं [illegible]: वेदलप्रविष्टायासाधनव्याप्तिस्तद्व्यापकत्वं बोध्यं [illegible]स्या
दिनागुरुत्वादौ साध्ये पृथिवीत्वाभावादौ नातिप्रसं[illegible]: विवेचि[illegible]ष्यते चेदमुपरिष्टात् साध्यासमानाधिकरणधर्मस्य
साध्यव्यापकाभावस्य वा समानाधिकरणं यत्साधनं तन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणासं
ताभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्मवत्त्वं वा [illegible]चावगतेः साधनवत्ति साधने वा साध्यास
मानाधिकरणधर्मादिना तत्सामानाधिकरण्येन वा साध्याभावो व्यभिचारो वा शक्यते ऽनुमितिर्ध्येयं उपाधिशरी
२ रभानस्य साध्यनिष्ठसाध्यव्यभिचारादिविषयत्वसहिष्णुतायांस्तु साध्यव्यभिचारित्वेन साध्याव्याप्यत्वेन वा साधनं वि
शेषणीयं [illegible]यद्व्यभिचारित्वेनेत्यादौ व्यक्षणं पर्यवसितमित्यादिकं तु व्यभिचारोन्नायकताप्रयोजकरूपप्र
दर्शनं तत्र पूर्वप्रतीकं व्याप्तेः द्वितीयं पक्षधर्मतायाः प्रदर्शनार्थं एवं चायमेतत्साधननिष्ठसाध्यव्यभिचारोन्नाय
कव्यभिचारप्रतियोगीत्यर्थके अयमत्र हेतावुपाधिरित्युक्ते कथमस्य व्यभिचारोन्नायकत्वमित्याकांक्षायां व्य ५०

भिचारो ऽयमपि साधुसंगच्छत इत्या[illegible] नन्वास्तु संयोगवदन्यत्वेन द्रव्यत्वाभावस्येव संयोगाभावाभावेन संयोगेन द्रव्यत्वाभा
वाभावस्य द्रव्यत्वस्य साधनसंभवादेकशेषस्य च दुष्करत्वात्तस्याप्युपाधित्वं लक्षणं तु साधनवृत्तिसाध्याभावो ऽत्रायक व्यति
रेकप्रतियोगितावच्छेदकरूपवत्त्वं प्रतियोगिवृत्तद्भाववत्त्वं कुत्याद्भिन्नं च प्रतियोगितावच्छेदकस्येवान्योन्याभावाभाव
त्वं शेषं पूर्ववदित्ति वदंति [illegible]षणाव्यभिचारित्वेनेत्यादि सामान्यतो दृष्टमेव एकविशेषबाधे भावयन्तिविशेषांतरप्रकार
कामनुमितिं न चातिरिच्यते विशेषणविशेष्यभावाभ्यां विशिष्टाभावइत्तिमतेनेदं स्वमतेनाह यद्वेति प्रत्यक्षस्पर्शाश्रयत्वमि
त्यादि — प्रत्यक्षस्पर्शपरिमाणवत्त्वाद्युपाध्यभिप्रायेण यथाश्रुतमेव साधु आत्मैकत्वादेरपि प्रत्यक्षत्वांगीकारात् उद्भूतरू
पादिपरत्वे च साध्ये हेतौ च प्रत्यक्षपदं बहिरिंद्रियप्रत्यक्षपरं द्रव्यपदे चाबहिरिंद्रियपरे महत्त्वपदं चजन्यमहत्त्वपरमिति द्रव्य
व्यापकव्यभिचारित्वं च व्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वं न च द्रव्यपदवैयर्थ्यं विशिष्टाभावस्यातिरिक्तत्वा
त् द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूपव्यभिचार एव हेतुः व्यापकत्वोपन्यासस्तु तर्कप्रदर्शनायेति वुक्तत्वं द्रव्यत्वाव्य
भिचारो द्रव्यत्वाभाववद्वृत्तित्वं भिन्नानन्यत्वमिति इदमनुमानमुपाधेः प्रमाणांतरेण साधनव्यापकतानिर्णय द

शायां न तु तद्व्यभिचारित्वं तद्ध्वंसाभाववद्वृत्तित्वं तथा च साधनविकलः साध्याभावे दृष्टान्त इत्यत आह अव्यभिचारश्चे
ति न चैवं शब्दे वैधर्म्यं घटप्रागभाववद्धर्मिभेदाद् वैधर्म्यमिति चेन्न तथापि मित्रातनयत्वव्यापकत्वविशेषितं वृत्तित्वमेव
गमकमिति चेन्न यत्किंचिदधिकरणनिष्ठाभावप्रतियोगित्वस्य फलतः सामानाधिकरण्ये पर्यवसितत्वोक्तत्वात् तथा
चायमर्थः मित्रातनयत्वाधिकरणयद्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगित्वं तत्र शाकपाकजत्वव्यभिचारित्वात् मित्रातन
येशाकपाकजत्वव्यभिचारित्वादिति यावत् तेन श्यामत्वादेन व्यभिचारः अव्यभिचारश्चेत्यादि तथा च बहुव्रीहिः
यद्धर्माव्यभिचारित्वेसति यद्धर्मावच्छिन्नस्य साध्यव्यापकव्यभिचारित्वं तत्साध्यव्यभिचारीति सामान्यव्याप्तौ अघ
टत्वं दृष्टान्तदुस्थात् प्रमेयत्वादावपि विशेषणवत्तिविशिष्टसाध्यव्यापकोपाधिव्यभिचारेणशुद्धसाध्यव्यभिचारः सा
धनीयः एवं विशिष्टसाध्यव्यापकस्यापि साक्षाच्छुद्धसाध्यव्यभिचारोन्नायकतयोपाधित्वसमर्थ्य साक्षात्परंपरासाधा
रणतद्व्यापकत्वमात्रेण तथात्वं व्यवस्थापयति यद्वेत्यादि अत्र पूर्ववत् विरुद्धकारणाय साध्यसमानाधिकरणे
ति बोध्यं व्यभिचारोन्नायकत्वं च यत्र कुत्रचित् एवं च पृथिवीत्वादिना गुरुत्वादौ साध्ये द्रव्यत्वादौ व्यभिचारोन्नाय ५१

कस्य रूपवत्त्वादेर्वारणाय साधनव्यभिचारीति बहुव्रीहिः न चैवमपि गुरुत्वादिसाध्यकरूपवत्त्वादिहेतौ द्रव्यत्वं गुरुत्वादिव्यभि
सा चारि जलभिन्नपृथिवीत्वादिव्यभिचारित्वादिति व्यभिचारोन्नायके पृथिवीत्वादावतिप्रसंगः साधननिष्ठव्यभिचारित्वं साध्यव्यभिचारोन्नाय
कं न त्वस्योन्नायकत्वात् उक्तिवैचित्र्याच्च पूर्वस्माद्भेदः केचित्तु व्यभिचारोन्नायकत्वमिह न व्याप्यतानाकोटिप्रविष्टतामात्रेण इत्थं च जलत्वे
न करकात्वे साध्ये जलत्वं करकात्वव्यभिचारि स्नेहव्यावर्तकत्वात् घटेन वा घटत्वे साध्ये घटो घटत्वव्यभिचारी अन्यद्रव्यत्वादिति व्यभि
चारोन्नयनसमर्थस्य स्नेहस्य द्रव्यत्वस्य च वारणाय साधनव्यभिचारीति अयं घटः सत्त्वादित्यादौ सत्त्वं घटत्वव्यभिचारि शब्दादि
वृत्तित्वादिति व्यभिचारोन्नायकस्य शब्दादेर्वारणाय साध्यसमानाधिकरणेत्यपि वक्तव्यं एवं च रूपेण गुरुत्वादौ साध्ये रूपं गु
रुत्वादिव्यभिचारि जलभिन्नपृथिवीत्वाभाववद्वृत्तित्वादिति व्यभिचारोन्नायकस्य गुरुत्वादिव्यभिचारित्वेऽपि रूपनिष्ठव्यभि
चाराप्रतियोगिनः पृथिवीत्वाभावादेर्वारणाय यत्राधिकरणे साधनाव्यापकत्वं तत्र व्यभिचारोन्नायकत्वं वक्तव्यं यथा क
थंचित् स्वव्यभिचारेण व्यभिचारोन्नायकमात्रस्य तुल्यत्वे यत्साधनव्यक्त्यव्यापकत्वं तद्व्यक्तौ व्यभिचारोन्नायकत्वं वाच्य
मित्याहुः न चास्तु पारिभाषिकमुपाधित्वं तथापि साक्षाद्व्यभिचारानुन्नायकत्व [illegible] या दोषत्वाभावेन तदुद्भावनेऽ

शि

५२ र्थान्तरं स्यादेवेत्याह किंचेति आभासान्तरस्य तदानीं ज्ञायमानस्य तथात्वे तस्यावश्याभ्युपेयदोषभावत्वेन दुष्टत्ववचनेनार्थान्तर

मिति भावः अत्र वदन्ति साध्योपन्यासानन्तरं तत्साधकस्यैव साधनोपन्यासानन्तरं तद्दोषस्य व्यभिचारादेरेवाकांक्षितत्वाच्च म

त नुद्भाव्यमसाक्षात्साधकस्य प्रकृतसाध्यव्यापकस्योपाधेरुद्भावने एवाप्राप्तकालत्वात् एवकृतापरंपरया तत्साधकस्याविच्छिन्न

साध्यव्यापकस्य अन्यथा तत्साधकपरंपरया अपि प्रथममुपन्यासे तथात्वं न स्यात् न च निग्रहस्थानत्वेन विशेषः प्र

तिज्ञाहान्यादितो हेत्वाभासाच्च बहिर्भूतस्य तथात्वायोगात् न च विभाजकसूत्रस्येन हेत्वाभासाश्चेति चकारेणानुक्तसमु

च्चायकेन साक्षात्परंपरया वा अनुमितिदोषोन्नायकस्य संग्रहः तथा सति व्यभिचारस्येवाश्रयासिद्ध्यादेरपि उन्नायकस्य तदु

भयोर्बाधकपरंपरयाश्च तथात्वापातात् न चाप्राप्तकालतापातादयं च पि प्रथममुपाध्युपन्यासः कथकसंप्रदायानुरोधा

द्देवकर्तव्यः तादृशसंप्रदायमननुरुंधानस्य तदुद्भावकं प्रत्यभवतः शपथनिवारणीयत्वापत्तेः तस्मात् प्रथमं प्रकृतसाध्यव्यभि

चारएवोद्भाव्यः तत्र कथन्तायां तद्धेतुत्वेन प्रकृतसाध्यव्यापकोपाधिव्यभिचारः विशेषणव्यभिचारित्वे सति विशिष्टसाध्य

व्यापकस्योपाधेर्विशिष्टसाध्यस्य व्याप्यव्यभिचारः अत्र च विशेष्य कथन्तायां विशिष्टसाध्यव्यापकोपाधिव्यभिचा ५२

र इति वक्ष्यते च व्यभिचारादेरिव तद्व्याप्यत्वादेरपि ज्ञानं व्याप्तिग्रहप्रतिबंधकं तथा च साध्यव्यभिचारव्याप्योपाधिव्यभि
चारवान् यथा पक्षेतरे वोद्भावनीय[illegible] साध्यव्यापकत्वानिश्चयात् उपाधित्वोपेक्षकतदनिश्चयात् अनुकूलतर्कादिना ता
दृशव्यापकत्वनिश्चयेतु बाधोन्नीतवत्प्रभवस्येव निश्चितोपाधिः न च स्वव्याघातकत्वाच्चायमनुपाधिः तद्धि न सर्वानुमा
नसाधारणं अनुकूलतर्कादिना निश्चितसाध्यके हेतौ तदभावात् नापि तद्व्यभिचारेण व्यभिचारानुमानेपि पक्षेतरां
तरस्योपाधित्वसंभवः अनुकूलतर्कादिना तस्य साध्यव्यापकतानिश्चये व्यापकव्यभिचारिणः व्याप्यव्यभिचारावश्यं
भावेन तदयोगात् अत एव पक्षेतरस्योपाधित्वे सर्वत्रैव तादृशोपाधित्वसंभवेनानुमात्रविलोपे व्यभिचारानुमापकत्वे नभा
गर्भस्योपाधित्वस्य व्याघात इति परास्तं कथकसंप्रदायानुरोधात् बाधानुन्नीतः पक्षेतरो नोपाधित्वेन कथायामुद्भाव्य
इति तु वदंति पक्षमात्रेति यद्यपि पर्वतावयववह्न्यादेरपि व्यावर्तकं तत् तथापि तस्य व्यावृत्तिर्नोपाधितायामुपयुज्य
ते अपि तु पक्षस्यैवेति तन्मात्रव्यावर्तकत्वमुक्तं इदं चानुपाधितायां न बीजं परिभाषामात्रत्वात् किं त्वनुकूलतर्का
भावेन तादृशसाध्यव्यापकत्वानिश्चय इति द्रष्टव्यं अत एव व्यापकताग्राहकप्रमाणासंभवादेव आर्द्रेंधनेति

शि
५३

अथ तत्र त्वत्तन्त्रान्वयव्यतिरेकाभ्यां आर्द्रेन्धनत्वादिनैव कारणत्वं न पुनरार्द्रेन्धनप्रभववह्नित्वेनेति चेत् किं चातः नहि कारणता
वच्छेदकं व्यापकतावच्छेदकं तादृशाभावप्रतियोगितानवच्छेदकस्यैव तत्त्वात् तदवच्छिन्नप्रतियोगिताकाभावस्य चातिरिक्ततया
तद्वृत्तित्वेन साध्यव्यभिचारसाधनेवैयर्थ्याभावात् सत्यपि चार्द्रेन्धनेन तत्संयुक्तेन वह्नौ दाहप्रतिबन्धकसत्त्वे धूमानुत्पादा
त् क्लृप्तकारणाभावस्य वह्नेर्विशेषरूपेण कारणत्वकल्पनयैवोपपत्तौ क्लृप्तकारणाभावानां दाहप्रतिबन्धका
भावानां तत्कारणत्वकल्पनानौचित्यात् एकस्मादार्द्रेन्धनव्यक्तेरुत्पत्तिवह्नौ यां तत्रैव व्यक्त्यन्तरादुत्पन्नोऽस्या दान्तवदिन्धन
प्रभवधूमप्रतीतितदभावानां कारणत्वस्य वाच्यत्वेऽतिगौरवाच्च महति चार्द्रेन्धनेतत्प्रभवे चारोपितसि वह्नौ महति व
ह्न्यन्तरे विद्यमानेपि आर्द्रेन्धनमहावह्नेरनुत्पाददशायां प्रकृष्टधूमानुत्पादादार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमित्यपि
वदन्ति तदुत्कर्षेणेति आर्द्रेन्धनप्रभववह्निसामान्यं विना धूमसामान्यस्य प्रकृष्टतादृशवह्निं विना प्रकृष्टधूमस्यानुत्पा
दनियमेनार्द्रेन्धनप्रभववह्नेरेव धूमोपधायकत्वं तत्रार्द्रेन्धनप्रभववह्नित्वं कारणतावच्छेदकमर्थवशात्संपन्नं नान्तरीय
कमेवास्तु फलतः न कश्चिद्विशेष इति भावः अनन्यथेति तादृशान्वयव्यतिरेकाभ्यामुपस्थितरूपस्य तद्वतो द्रव्यस्यैव कार
णत्वप्रभवस्यापि व्यापकत्वमुपस्थितरूपात्वेन तत्त्वं च पुनरुपवर्णितमेव घटोऽन्यजनेति ध्वंसप्रागभावानधिकरण ५३

कालस्यप्रतियोग्यधिकरणत्वनियमात् नचप्रागभावस्यप्रतियोगिध्वंसद्वत्तध्वंसोपिप्रतियोगिनःध्वंसवृत्तितयाऽप्र
प्राभातिकध्वंसत्वकारणाधारकल्पनानोध्वंसानंतत्वकल्पनायाएवोचितत्वादितिभावः कार्यकारणयोरेव कार्यकार
णभाववग्राहकप्रमाणाक्रोडीकृतयोरेव रस्येति नुसंदिग्धोपाध्यंतरवत्पक्षेतरेपिव्यभिचारशंकाभा दधानःकेनवारणीयः
स्वव्याघातकत्वंचनिराकृतमेव त्रकश्चिदुपाधिर्भविष्यतीतिशंकाशंकापिशाचीतावपानव्यभिचारशंकाधायिकातथा
पक्षेतरस्योपाधित्वशंकापितद्राहितापिव्यभिचारशंकापक्षेव्यभिचारशंकेवनप्रतिबंधिकाऽन्यथानिरुपाधिसहचारभं
गप्रसंगमात्रबलप्रवृत्तानामनुमानानांविलयप्रसंगादितिचेन्न संदिग्धोपाध्यंतरसाधारणव्यभिचारशंकाधानप्रयोजक
रूपवत्तापक्षेतरेणतदाधानेप्रयोजनस्वत्तेःप्रतिबंधकत्वासंभवात् व्यभिचारज्ञानत्वेनचप्रतिबंधकतायांकारणविशेष
जन्यत्वादिकंननिविशतेगौरवात् प्रागभावाच्च कथमन्यथाकरवह्निसंयोगःसर्वसंयोगोवाप्रत्यक्षसंयोगधर्मातिरिक्तधर्म
समवायीसमवायित्वादित्सतोनशान्त्यादिसिद्धिः निरुपाधित्वेप्यप्रयोजकत्वादितिचेन्न निरुपाधित्वस्यैवप्रयोजकत्वात् तथांहु
त्वेपिवाप्रयोजकत्वेनिरुपाधित्वाभिमतानामितरेषामपितत्वात् त्रवकुत्रपक्षातिरिक्तेव्यभिचारशंकाकस्मायेव्या
मोहोयथाप्तिग्राहकदृढतरप्रमाणविरहिणोनिरुपाधित्वमितिपरः तत्रनव्याःतत्तःपक्षस्यपक्षैकदेशवृत्तिधर्मा

वह्निव्याप्यव्यापकानां स्वपक्षैकदेशवृत्तिधर्माणामुपाधितासंभव इति इत्थं च यथा नातिप्रसंगः तथात्र वक्ष्याम इति
सत्यं कथं कर्मप्रदायानुरोधात्कथायां संदिग्धोपाधित्वेन पक्षेतरे नोऽन्द्राव्यन्ते इत्येवं परे ग्रंथ इत्याहुः सोपाधौ चैकत्रे स्या
दि उपलक्षणमेतत् व्यभिचारिण्युपाधेः स्वरूपाभावमात्रे तात्पर्यं उपजीव्योपजीवकभावो हि न कार्यकारणभावः
प्रसंभवात् व्याप्यव्यापकभावस्त्वकिंचित्करः विशेषतस्तु ज्ञायमानदूषकतायामेकप्रविज्ञायाप्यन्यतरज्ञानाद्वन ज्ञाप्यज्ञापक
भावः न चानुकूलतर्कविरहादेव व्याप्तेरग्रहे कृतमुपाधिज्ञानेन विनाप्यनुकूलतर्कं व्यभिचाराग्रहे व्याप्तिग्रहसंभवादिति भा
वः यद्वा वृत्तेति अत्र पक्षवृत्तिपूरणात्स्वपक्षनिष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः सत्प्रतिपक्षोन्नायकत्वं
चात्र दूषकताबीजं तत्र चाप्रयोजकत्वात् साधनाव्यापकत्वं नोपात्तं साधनस्य सोपाधित्वव्युत्पादनायैव केवलं यद्वस्य साधन
स्येति यद्वा साधनस्येत्यनंतरं अधिकरणे इति पूरणात् साधनवन्निष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमित्यर्थः
तथा च यद्वाभिचारित्वेनेत्यादेरुपवर्णितार्थनिष्कर्ष एवायं शुद्धसाध्यसाधनावच्छिन्नसाध्यस्य च व्यापकानामुपाधीनां प
क्षे क्वचित्साधनवत्ति वा साध्याभावस्यैकमुन्नयनप्रकारमाह सच्चेत्यादि साधनवत्त्वेन ज्ञायमाने पक्षे साध्यसाधनसंबं

भावः सिध्यन् पक्षधर्मताबलात् साध्याभावप्रमादाय पर्यवस्यति वस्तुतस्तु साध्याभावोव्यापकस्यार्द्रेंधनवत्त्वादेः रूपं साध्य
साधनसंबंधाभावोव्यापकत्वमत आह आर्द्रेंधनेति अत एवेति साध्याभावसत्वे साध्यसाधनसंबंधाभावस्यावश्यकत्वात्तदु
व्यापकत्वमक्षतमेवेति भावः द्रव्यत्व इति द्रव्यत्वस्य हेतुत्वाभिप्रायेणायं प्रकारः प्रायशः संभवतीत्यभिहितः वस्तुतः प्रव
रभेदेऽपि न क्षतिः तथा च शुद्धसाध्यव्यापकोपाधिस्थले शुद्धसाध्याभावः अवच्छिन्नसाध्यव्यापकस्थले तु अवच्छेदकत्वव
त्तिअवच्छेदकतावच्छिन्नसाध्याभावोऽवच्छेदकत्वविशेषितेनोपाधिविरहेण शुद्धसाध्याभावः साधनीयः अत एव गगना
दैस्पर्शवत्त्वेन प्रमेयत्वेन च प्रत्यक्षत्वे साध्ये बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकस्योद्भूतरूपस्य तादृशसाध्याभावोन्नयनहेतुत्वमि
ति पक्षेप व्यावृत्यापक्षस्य साधनस्य संबंधि यत् साधनविशिष्टं साध्यं निवर्ततेत्यस्य यस्तु यथाश्रुतत्वं पक्षस्वरससिद्धः तत्र दूषक
त्मावीजं यदि सत्यमिति पक्षो व्यापकत्वं तदा साधनानुप्रवेशो व्यर्थः जलं द्रव्यं गंधवत्त्वादित्यादौ पृथिवीत्वादावतिव्याप्तेश्च अप
यत्वसिध्युव्यापकत्वं तदा साध्यानुप्रवेशो निरर्थकः जलं गंधवद्द्रव्यत्वादित्यादौ पृथिवीत्वादावतिप्रसंगाच्च [illegible]पार्थं
भवप्रसिद्धः सत्यमिति पक्षस्य चोव्यापकत्वं तदा वायुः स्नेहवान् गंधवत्त्वादित्यादौ जलत्वपृथिवीत्वादावव्याप्तिः साधनविशि

शि
५५

ष्टसाध्याप्रसिद्धेः साध्यसाधनत्वप्रकारकबोधविरोधिबुद्धिकाभावो ज्ञापकत्वमर्थः विहरणद्धि चैकैका बुद्धिरुभयबोधं विरु
द्धत्वहेतुधर्मादिरूपतया विधबोधप्रसिध्यासमन्वयदूरत्यपि व यत्तु साध्यावृत्तित्वे सति साधनावृत्तिर्यः तच्छून्यत्वेन साध्य
साधनेऽनुगमय तदभावो ज्ञापकत्वं वाच्यमिति तन्न यत्र भिन्नभिन्नसंबंधेन साध्यसाधनभावस्तत्र सद्धेतुके हेतुसंपादकेन संबंधेन
साध्यस्य साध्यतासंपादकेन च हेतोरव्याप्तेश्च यथाकथंचित्संबंधेनोभयस्या भावो ज्ञापक इति व्याप्तिः तादृशधर्मस्त्रू
न्यत्वेन रूपान्तरेण वा तदभावस्यो ज्ञापकत्वमभिमतं चः साध्यसाधनान्यतरवृत्तित्वसंभवात् : धूमेन पर्वतादौ व
ह्नौ साध्ये महानसीयवह्नित्वाद्यवच्छिन्नाभावो ज्ञापके महानसत्वादावति व्याप्तिः पक्षावृत्तित्वे सति ये साधनवद्वृत्तयः त
च्छून्यत्वेन पक्षसाधनवत्तावित्तिप्रमाविशेष्यत्वेन वा द्वावनुगतीकृत्य तत्र साध्यव्यावर्तकत्वमर्थमाहुः तत्र यद्दि सत्प्रतिपक्ष
म व्यभिचारयोरन्यतरमात्रो ज्ञापकत्वं दूषकताबीजं तदा द्वयोरनुगमनैष्फल्यं यथासंभवो ज्ञापकत्वं तदा अवृत्तिहेतुके सत्प्रति
पक्षो ज्ञापके अतिव्याप्तिरिति च पक्षतावच्छेदके साधने च वर्तते यत् तच्छून्यस्य पक्षतावच्छेदकसाधने इति प्रतीतिविशे
ष्यस्य वा आश्रये साध्यव्यावर्तकत्वमर्थमाहुः तत्रापि किं येन संबंधेन हेतुता तेन अथ येन पक्षतावच्छेदकं वर्तते तेन उभयेन के ५५

नचैतादृशधर्मोऽत्रयेसाध्यव्यावर्त्तकत्वमभिमतं [illegible]: जलपक्षके वह्निसाध्यके संयोगसंबंधेन साधने धूमादौ वह्निसामग्र्यादाव
व्याप्तेः पक्षतावच्छेदकस्य संयोगेनावृत्तेः संयोगेन धूमवत्त्वञ्च वह्निमत्त्वनियमात् द्वितीयः घटोजातिमान्मेयत्वादित्यादौ समवायि
८ त्वांशव्याप्तेः वह्निमत्त्ववत्पक्षके पर्वतो वह्निमान्धूमादित्यत्र धूमाव्यवर्त्तके वह्निव्यावर्त्तके वह्निसामग्र्यादावतिव्याप्तेश्च अत एव
नैतद्दोषपीत्यादिस्वयमूहनीयमितिकृतं [illegible] आपाद्यप्रसिद्धेः आपाद्यस्य वह्निव्यापकत्वे सति धूमाव्यापकत्वस्याप्रसिद्धेः
अनुमितेति अस्मदुक्तं व्यभिचारोन्नायकत्वं तदुपधनस्वरूपयोग्यत्वं तद्व्याप्तिपक्षधर्मतारूपं पर्यवसितं साध्यव्यापकत्वादिकं चानु
मितिप्रति[illegible]बंधकज्ञानविषयतावच्छेदकमेवेतिभावः अनुसामान्यलक्षणमिदं व्याप्त्यौपैकं विशेषलक्षणं तु दूषकता
याम्रुपयुज्यत इत्यत आह विरोधीति यथाश्रुते अवच्छिन्नसाध्यव्यापकोपाध्यव्याप्यायत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वमे
वक्तव्यं तथा च वह्निना धूमेन वा धूमस्य वह्नेर्वा साधने पक्षेतरस्य तद्रूपत्वानादनुमितिप्रतिबंधापत्तेरित्यर्थः व्यवहारोपे
कत्वेच तत्रोपाधिव्यवहारापत्तिः पर्यवसितेत्याद्यभिधाने वास्मन्मत एव प्रवेश इति भावः व्यवहारोपैकस्य व्यभिचारेणसा
ध्यव्यभिचारोन्नायकत्वं लक्षणं तु न तत्साध्यसमानाधिकरणत्वे सति तत्साधनाव्यापकत्वं साध्यसाधनभेदाभिन्नमेव क
स्तुतो व्यभि [redacted] चारिणः साधनस्यानुप्रवेशान्नातिप्रसंगः न च रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावादेरुपाधितापत्तिः गुरु

त्वव्यभिचा[redacted]रिरूपव्यक्तेस्तद्व्याप्यत्वात् तद्व्याप्यरूपव्यक्तेश्च गुरुत्वाव्यभिचारित्वादिति दूषणोपेक्षं तु यत्पाक्षे भूवमननुगत
मेवेति पत्तमिदं परे परिष्कुर्वन्ति तत्रस्वभावः तथाहि साध्यसाधनव्यक्तिस्वरूपगर्भे नोपाधित्वं अपितु साध्यतावच्छेदकसाधन
तावच्छेदकधर्मगर्भं तत्र द्रव्यत्वेन सकलगुणव्यक्तिषु सोपाधेरपि द्रव्यत्वस्य गुणत्वेन सकलगुणेष्वेव निरुपाधित्वात् गुण
त्वेन गुणे साध्ये सत्तात्वेन रूपेण सोपाधेरपि सत्तायाः गुणकर्मान्यत्वविशिष्टसत्तात्वेन निरुपाधित्वात् तथा च तद्रूपावच्छिन्ने
साध्ये तद्रूपावच्छिन्ने साधने च क उपाधिरित्यत्र तद्रूपावच्छिन्नसाध्यसमानाधिकरणत्वे सति तद्रूपावच्छिन्नसाधनाव्याप
कत्वमनुगतं लक्षणं वाच्यं न तु तद्रूपावच्छिन्नतत्तत्साध्यव्यक्त्यव्यापकत्वमननुगतत्वात् तथा च गुरुत्वावच्छिन्नसमाना
धिकरणस्य रूपत्वावच्छिन्नाव्यापकस्य पृथिवीत्वाभावादेरुपाधित्वं दुर्वारं व्यभिचारित्वेन साधनविशेषणं तु उपदर्शितमे
वेति संक्षेपः उपाधिलक्षणे साधनाव्यापकत्वं न विशेषणं दूषकतायामनुपयोगात् अव्याप्तिकत्वाच्चेति सत्प्रतिपक्षोन्ना २
यकत्वेनोपाधेर्दूषकतावादिनामभिप्रायं प्रकाशयन्ति केचिदिति साध्यतावच्छेदकावच्छिन्नं साध्यं च नोपाधिः परं प्रत्युन्ना
यः साध्याविशिष्टत्वात् पक्षे साधनस्य निश्चये अनुमानस्य वैयर्थ्यात् अनिश्चये च तस्यायोगात् संदिग्धोपाधित्वेनापि

नतदुभयवत्त्विसाह[illegible]दिनामिति हेतौ साध्यव्यभिचारः संदिग्धश्चेत्तत्त्वं संदिग्धोपाधिना अ संदिग्धश्चेत्कथं तस्य संदिग्धोपा
धित्वमितितत्त्वं हेतुव्य[illegible]कारेति व्याप्यसंशयस्य व्यापकसंशयहेतुत्वादिति भावः नच तत्र मानाभावः कोटिस्मरणादित्त
एव तदुपपत्तेः क्वचित्तदनुविधानस्यापि व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यस्य गृहीतत्वेन तत्स्मरणएवोपक्षीणत्वा
त्वात् तदत्र हेतुत्वसंशयाद्व्यापकसंशयस्याप्यभावादिति वा[illegible]स्य महानसे हुताशनो नजलहृद इतिस्मरणां पर्वतादिकमपि
पक्षपतां धूमादिसंशयाभावाभावाभ्यां हुताशनसंशयाभावाभाव दर्शनात्तस्यापि तद्धेतुत्वात् अतएवोत्कटकोटिकाद्व्याप्य
संशयात् व्यापकस्याप्युत्कटकोटिकः संशयः कारणोत्कर्षेणैव कार्योत्कर्ष इति समानेत्यादिसूत्रं तु उपलक्षणपरं तत्रस्य
श्चकारो वा अनुक्तसमुच्चयार्थक इति वदन्ति कोटिद्वयसहचरितत्तद्धर्मवत्तया धर्मिज्ञानं हेतुः धर्मस्यैकत्वं ज्ञानस्य च निश्चय
त्वं नोपयुज्यते गौरवात् अवगाहते च लिङ्गसंदेहो लैङ्गिकतदभावसहचरितौ लिङ्गतदभावौ धर्मिणि तथा च साधारणधर्म
एवास्यान्तर्भाव इति[illegible]याः लिङ्गतदभावयोः प्रत्येकमेकैककोटिसाधारण्येपि मिलितयोरसाधारण्यं सत्प्रतिपक्षस्थले वि
रुद्धयोरिव हेत्वोरिति टीकाकारानुयायिनः [illegible]साधनाव्यापकत्वसंदेहे साध्यव्यापकव्यभिचारसंशयात्साध्यव्यभिचा
रसंदेहः हेतौ स्फुट एव साध्यव्यापकत्वसंदेहे तु साधनाव्यापकव्याप्यत्वसंदेहात्साध्ये साधनाव्यापकत्वसंदेहो बोध्यः

उपाधेः साध्यव्यापकत्वसंदेहे नाहितत्वात्साधने साध्यव्यापकव्यभिचारसंदेहात् साध्यव्यभिचारसंदेहः इत्थमेव च बहलदूष्यसंशय
स्थले व्यभिचारसंशयस्योक्तिसंभवद्रूपापि वदंति उभयेति एकांशेऽपरस्य एकविशिष्टापरस्य साध्यतायां त्वेकैकस्योपाधित्वमि
तिवृत्तत्वं दूषकेति वस्तुतः सद्धेतावपि नत्वाग्रहदशायामुपाधिसंदेहेन व्यभिचारसंदेह इति भावः संदिग्धेति नचानैकांतिक
त्वसंदेहः प्रतिबंधकः नत्वनुमितिविरोधित्वेन तदुद्भावनमफलमिति वाच्यं अनैकांतिकत्वसंशयान्मम व्याप्तिग्रहो माभूदित्य
भिप्रायेण प्राचां हेतुदोषत्वेनासाधकतासाधकतयाजिज्ञासादिद्वारा परंपरयासंदेहोपयोगित्वेन च तदुद्भावनस्य संप्रदायि
कत्वात् उपाधित्वस्य संशये निश्चये च ज्ञायमानं यत् ज्ञानमनुमितिं विरुणद्धि तदेवास्य दूषकताबीजमित्यभिप्रायेणाह
संदिग्धेति तद्व्यतिरेकस्य क्वचित्साध्यत्वेन क्वचिच्च पक्षधर्मत्वेन संदिग्धत्वात् बाधोन्नीतेति ननु बाधेऽवतीर्णे तत
एव हेतोरसाधकत्वात्कृतमुपाधिना न वासाधारण्यं पक्षस्यैव सपक्षत्वात् अनवतीर्णे तु नोपाधित्वं पक्षेतरांतर
वत्साध्यव्यापकताया एवाग्रहादनुकूलतर्कादिना कथंचित्ग्रहे च नासाधारण्यं व्यतिरेकितया अन्वयव्याप्त
ग्रहस्य सत्प्रतिपक्षतया च सत्प्रतिपक्षांतरस्याप्यकिंचित्करत्वादित्यरुचेराह पक्षवृत्तिमात्रेति पक्षेतद्ग्रहदशा
यां तदभावग्रहासंभवादिति भावः व्याप्तिविरहरूपांनिरस्य व्याप्तिज्ञानाभावद्वारकतां निरस्यति मापीति अनौपा ५७

धिकत्वादित्यत्र औपाधिकत्वज्ञानाभावस्य कारणविघटकतया कारणाभावरूपतादृशज्ञानविषयतया अनौपाधि-
कत्वज्ञानस्य कारणत्वेनान्वयव्यतिरेकसिद्धं परं तु सोपाधित्वज्ञानस्य प्रतिबंधकताया: विनाकारणीभूतज्ञानविघटनमसं-
भवितेन कल्पनीयं सैव तत्सिद्धेति दूषणोत्तास्य यो यथाश्रुतमेव साधीयः स्वयमपि वदंति व्याप्यत्वासिद्धे व्याप्यत्वाज्ञाने
अंतर्भाव: तद्द्वारा दूषकत्वं भिन्नधर्मिकत्वं परिहरन्नाह नचेति न हीति विरोधिविषयकत्वाभावे साक्षादप्रतिबंधकत्वादि-
त्यभाव: साध्यव्याप्यत्वव्यभिचारित्वेन साध्यव्यभिचारित्वमित्युभयत्रैव बहुव्रीहि: तस्मादित्यादेर दूषणं वेति शेष: दूष-
कताबीजं चिंतनमिति निश्चयदशायामपि कृत्यायनिश्चयद्वारोपाधित्वनिश्चयस्य दूषकत्वेन तत्संशयद्वारा तत्संशयस्यापि त-
थात्वमितिभाव: व्यभिचारज्ञानद्वारेति मानसे व्यभिचारनिश्चये उपाधिज्ञानं विशेषदर्शनरूपत्वेनोपयुज्यते व्यभिचारानु-
मानं पुनरग्रे वक्ष्यते व्याप्तीति साध्यसंबंधितावच्छेदकरूपविरह: साधनतावच्छेदके साध्यसंबंधितानवच्छेदकत्वपर्यव-
सन्न: साध्यवदन्यावृत्तित्वविशिष्टसाध्यवद्वृत्तिविरहो ज्ञेय: ननु स्वसमानाधिकरणात्यंताभावप्रतियोगिसाध्यकत्वस्य
स्यानुगतस्याभावेन तत्तत्साधनपर्यवसाने साध्यप्रसिद्धिमात्रेणैव कृतार्थत्वात् साध्यव्यापकोपाधिव्यभिचारित्वेन हेतौ
साध्यव्यभिचारित्वं साधनाव्यापकोपाधिव्याप्यत्वेन साध्ये साधनाव्यापकत्वमनुमेयमिति चेन्न व्यतिरेकिणि साध

धनं व्याप्तिविरहस्य व्यभिचारस्य चोन्नयने उपाधिः साधनाभाववद्वृत्तित्वं व्यभिचारः स्फुटतादशायां उपाध्यनुसरणाद्यत्राधिकरणे
हेतोः साध्यव्यभिचारित्वं तद्वृत्तिधर्मादौ नास्य साध्यव्यापकत्वग्रह इति भावः उपाधिमात्रेति तेनापि व्यभिचारानुमानेनत्रापि
तथाविधोपाधिसंभवादिति भावः वस्तुतस्तु व्यापकव्यभिचारिणो व्याप्याव्यभिचारित्वे व्याप्यव्यापकभावव्याघातापत्त्या हेतोः
साध्यव्याप्यत्वेन साधनाभाववद्वृत्तित्वस्य साध्याव्यापकत्वान्नोपाधित्वमिति व्याप्यत्वाभावसाधनाभिप्रायेण सा
धनाव्याप्यत्वस्योपाधित्वे च नैष दोषः साधनेति यथाश्रुताभिप्रायेण प्रतियोगिव्यधिकरणसाधनाभाववद्वृत्तित्वस्य साधनवदन्य
वृत्तित्वस्य चोक्तत्वात् तथात्वासंभवात् एवं च सत्प्रतिपक्षेति निश्चितोपाधिवत् संदिग्धोपाधिरुद्भाव्यः तत्कर्तृत्वस्य व्यभिचारसंदेहस्य
प्रतिहेतुसमाजादेव सिद्धेः किं तेनेति वाच्यं परस्परप्रतिबंधेनैवानुमित्यनुत्पादे तत्र व्यभिचारसंदेहस्यावश्यमुत्पत्तौ मानाभावात्
दि उपाधिसंदेहाद्दृशिष्येकत्र व्यभिचारसंदेहेन तुल्यबलत्वाभावात् न चातुल्यबलेन सत्प्रतिपक्षो व्यभिचारांशे कोधाने वा स्वरसतः सं
दिग्धे व्यभिचारादिनापि तथात्वप्रसंगादिति क्वचिदुपाधेस्तुल्यबलत्वे सत्प्रतिपक्षोन्नायकत्वं तथात्वे कदाचित्साधनाव्याप्यत्वादधिक
बलत्वे बाधोन्नायकत्वं तथापि दूषकत्वं व्याप्त्यादिप्रतिसंधानेन तदुन्नयनस्यानुमितिप्रतिरोधस्य च दुर्वारत्वात् परं तु
सार्वत्रिकत्वेन तस्येति ध्येयं असाधारण्यविपर्ययस्येति इदं सत्प्रतिपक्षोन्नायकत्वमभिप्रेत्य यद्यपि व्यतिरेकेण स
त्प्रतिपक्षत्वे सत्प्रतिपक्षे सत्प्रतिपक्षान्तरस्यादोषत्वाद्धेत्वाभासान्तरं दोषाय तथापि सत्प्रतिपक्षोन्नयनोपेक्ष्य साध्य ५८

व्यापकत्वग्राहकप्रमाणाभावेनात्वयं बह्वयं निष्कर्षः यत्र यादृशदोषोन्नायकतया दूषकत्वमुपाधेस्तत्र तदुन्नयनौपयि
कत्वमेव तस्याभासत्वे प्रयोजकं एवं च यत्र स्थापनायां पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरुद्देश्या तत्र प
क्षाव्यापकविपर्ययस्याभासत्वं तद्विरहेण पक्षैकदेशे सत्प्रतिपक्षेपि एकदेशान्तरे साध्यसिद्धेरप्रत्यूहत्वात् यत्र तु पक्ष
तावच्छेदकावच्छेदेन तथा तत्र तादृशस्यैवोपाधित्वमेव एकत्र प्रतिपक्षस्यापि तादृशासिद्धिविरोधित्वात् साध्यविपर्यय
स्याभासत्वमनुपाधित्वे प्रयोजकं न त्वज्ञातं ज्ञातं न स्थापितस्य व्यापकव्यतिरेकेण सिद्धिसंभवात् पूर्वसाधनव्यतिरेकि
त्वं तु नोपाधित्वेनाप्यनुपाधित्वेन नियतं वह्निना धूमस्य स्थापनायां प्रतिहेतावार्द्रेन्धनाभावे वन्ह्यभावस्योपाधितापत्त्या धू
माभावस्याप्यार्द्रेन्धनाभावेन स्थापनायां प्रतिहेतौ वन्ह्यार्द्रेन्धनस्यानुपाधितायाश्च प्रसंगात् परं तु पूर्वसाधनव्यतिरेक
स्य प्रतिहेतुतायामुपाधित्वेनोद्भावने सत्प्रतिपक्षमात्रमुद्धिद्धं तेन सर्वत्रैव न संभवात् आभासत्वेपि स्थापनायामविशेषाच्च
हदृशायां नैव सत्प्रतिपक्षोपन्यासात् वस्तुतः साध्यव्यापकस्यापि पूर्वसाधनव्यतिरेकस्य तदानींतनत्वेनाग्रहादुपन्या
ससंभवात् नोपलब्धाननुकूलतर्कं विना पूर्वसाधनव्यतिरेको नोपाधित्वेनोद्भाव्य इति कथकसमयवशादेवासावुपाधित्वेनो
पन्यस्यत इति यथा अकर्तृत्वेनेति कदाचित्केन सकर्तृकत्वस्थापनायामजन्यत्वे प्रतिहेतावित्यर्थः ॥ ॥ ॥ ७ ॥ ७ ॥

शि
५९ अनुमितिलक्षणैककार्य॰॰रित्यनुकूलत्वसंगत्या पक्षधर्मतां निरूपयन्नुमाह बाधीति सिषाधयिषेति यत्र साध्यस्य यादृशसंबन्धावगाहिनि
णीयनिवर्त्त्यः संशयस्तत्र सत्तादृशसंबन्धेन साध्यानुमितौ पक्षतेत्यर्थः तेन न पक्षसाध्यविशेष्यकसंशयाननुगमो ॰॰संबन्धान्तरेण
संदेहेऽपि निर्णीतसंबन्धेन पक्षत्वं ॰॰तमःप्रभृतिषु समवायेनाकाशादिसाधनेऽतद्वैकल्यं संशययोग्यतां निरस्यति बाधीति साधक
बाधकमाने॰ सिद्धिबाधौ केवलान्वयिनि च पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभो बाधः ननु तत्रापि पुनरनुमित्सातत: पराम
र्शान्तरं स्मरणात्मकात्तु परामर्शादनुमितौ च साधनताविषयादनुमितीच्छातोऽनुमितिरिति फलबलात्कल्पनीयमित्यत आह सि
साधयिषेति नचानुमितिजनिकेच्छैकपक्षतासा च क्वचित्स्वनिष्ठेव सर्वत्रेश्वरनिष्ठैव सुलभेति वाच्यं तस्या नित्यत्वेन सिद्धौ सत्यामपि प
क्षताप्रसंगात् ॰॰नस्यास्तदानीं तज्जनकत्वं तद्धि न तद्योग्यताऽनपायात् तथा तदुपधानं अनुमितेः पूर्वं तदभावात् अन्यत
त्सामग्रीसमवधानं कारणमात्रस्य पक्षताकुक्षिनिक्षेपप्रसंगात् शेषवैयर्थ्यात् तदानीं सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगि
नः कारणस्य च कार्यव्याप्यतायाश्च सिसाधयिषेति यत्रानुमित्सानंतरं साध्यव्याप्यवत्त्वविशिष्टपक्षस्मरणं अनुमितौ च साधनता
विषयकतादृशस्मरणाद्वा अनुमित्सा अनुमित्सापूर्वकालोत्पन्नविशेषस्मरणाद्वा अनुमित्साकालोत्पन्नेन्द्रियसन्नि कर्षसहि
तात्साध्यव्याप्यविशिष्टपक्षप्रत्यक्षं तदनंतरं चानुमितिस्तत्र पक्षतासंपत्तये सहकृतान्तं साधकमानविशेषणं सिसाधयिषा
यत्र साध्यविशिष्टत्वस्य पक्षविषयत्वप्रकारिकाऽनुमितिविषयिणीच्छा यत्किंचिद्दोषवशात् जायते मितीच्छायामपि सिद्धिसत्वे ५९

अनुमित्यनुत्पादात् अनुमितित्वाप्रकारिकायामपि प्रत्यक्षाद्यतिरिक्तं पर्वते वह्निज्ञानं जायतामितीच्छायां प्रत्यक्षाद्यनन्तरम
नुमित्युत्पादाच्च यादृशयादृशेच्छासत्त्वे सिद्धौ सत्यामनुमितिस्तत्तदिच्छाभावसमुदायस्य वा विशेषणत्वादिच्छाया अननुगमेऽपि न क्षतिः
धूमेनानुमिनुयामितीच्छायां मालोकपरामर्शादसत्त्यामपि सिद्धौ यदि नानुमितिः तदा तदन्यमात्रलिंगकानुमितीच्छा कामिनीजि
ज्ञासा च तत्कृप्तप्रतिबन्धिका यत्र च तत्रानुमितिस्तदा सिद्धिसत्त्वे तत्रानुमितेर्वारणाय तल्लिंगकानुमितीच्छा तदन्यमात्रलिंग
कानुमितीच्छातिरिक्तानुमितीच्छा वा वाच्या लिंगविशेषेणापि च नियंत्रितं पक्षत्वं तल्लिंगकानुमितौ सिद्धिकालीनातल्लिंगकानुमि
तीच्छाविरहविशिष्टान्यलिंगकानुमितीच्छैव वा प्रतिबन्धिका बाधकमात्रं साध्यवत्त्वनिश्चयः पाषाणमयत्वादिना पर्वते तेज
स्त्वादिना च वह्नेः सिद्धावपि पर्वतत्वेन तत्र वह्नित्वेन च तस्यानुमितेर्भिन्नत्वसाध्यत्वयोरवच्छेदकावनुप्रवेशनीयौ यदि च प
र्वतत्वसामानाधिकरण्येन एकत्र साध्यसिद्धावपि विनानुमित्सामन्यत्र तादृशानुमितिरानुभविकी तदा धर्मिविशेषोऽपि निवे
श्यो नान्यथा पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदे
नानुमितिं प्रति तदवच्छेदेन सिद्धेः तत्सामानाधिकरण्यमात्रेणानुमितिं प्रति तु सिद्धिमात्रस्य विरोधित्वं इत्थं च लिंगभेदन्या

दि

६० योनुसर्त्तव्यः साध्यविशेष्यकसिध्यनंतरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वेनां प्रति पक्षविशेष्यकैवसिद्धिर्विरोधिनी एवं च पक्ष
विशेष्यकसिध्यनंतरमपि साध्यविशेष्यकानुमितिर्जायते तुल्यन्यायात् समानाकारसिद्धेः प्रतिबंधकत्वे पर्यवसानात् तादृशा
नुमितिं प्रति सिद्धिमात्रं विरोधि साध्यसिद्धिरेव वा अत एव प्रसिद्धसाध्यस्थले पक्षविशेष्यिकैवानुमितिरनुभूयत इति अत्र च
व्याप्तिस्मरणादिना पूर्वानुमित्साविनाशे परामर्शकाले च सिद्धिसत्वेनुमित्सांतरोत्पत्तौ वानुमितिस्तत्पैव कारणीभूतस्य विशि
ष्टाभावस्य संपत्तेरित्युपाध्यायाः अन्ये तु द्वित्रिक्षणांतरितायामप्यनुमित्सायामनुमितेर्दर्शनात् अनुमित्सायोग्यता वा व्यापा
वेनस्योत्पत्त्यनंतरं स्वविषयसिध्यनुत्पादः अनुमित्सोत्तरमंतरानुमित्यनुत्पादे दिवसादिविलंबेनं द्वित्र्यादिना निर्णीतेपि साध्ये
ता लिंगपरामर्शादिनानुमितिप्रसंगात् किंत्वनुमित्सानंतरं लिंगपरामर्शानुक्रमेणायावत्कालेनोत्सर्गतः परामर्शो जायते
तावानेव कालः फलबलेन तथा कल्पनात् अथ वा अनुमित्सोत्पत्त्यनंतरं अनुमित्सानाशेपि सिद्धौ सत्यां यावत्कालम
ध्ये अनुमितिर्जायते तावानेव कालः अनुमित्सयोपलक्षितः यदि च सिध्यनंतरं तन्नाशेपि द्वित्रिक्षणमध्ये विनानुमि
त्सामनुमित्यनुत्पादोनुभवसिद्धः तदा सिध्यातावानेव कालः उपलक्षितः विशिष्टलक्षणनियमः त्वविहितैः कारणी
यइति वदंति अत्र च यत्र साध्यनिर्णयेप्यनंतरं पूर्वोक्तन्यायेन साध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा यत्र च ६०

साध्यतद्व्याप्यवत्तादृशाध्यक्षान्तरविशिष्टपक्षस्य तल्लिङ्गकसाध्यतद्व्याप्यवत्तानुमित्योरिष्टसाधनतायामप्येकस्मरणान्ततस्तयो
रनुमित्सा ततः साध्यतद्व्याप्यवत्तानुमितिस्तत्र तदनन्तरमनुमितिप्रसंगः योग्यताविवक्षणेऽन्यस्तु तत्र सम्भवेदिति तदिच्छाविषयसि
ध्यनुपहितत्वं तद्विशेषणं पक्षसाध्यभेदेन च पक्षताया भेदात् पृथक् पृथगेव कार्यकारणभावः तथा च यत्र सिध्यनन्तरं कदा
प्यनुमितिर्न जाता तत्र सिध्यभावः कारणं न तु तत्रेच्छानिवेशोपि गौरवात् प्रयोजनाभावाच्च तेन यत्पक्षकयत्साध्यकानुमितौ
कस्यापीच्छा न जाता तत्रोक्तिमात्रसाधारण्यसम्पादनायेश्वरेच्छाया निवेशनायासो नोपादेयः किन्तु सिसाधयिषाविरहविशिष्ट
स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नायाः सिद्धेः सिसाधयिषाविरहविशिष्टायास्तस्या अभावः पक्षता अथ
तृतीयक्षणाव्यवधायकद्वितीयक्षण एवाव्यवहितत्वपर्यवसानात् यत्राविरलक्रमेण सिद्धिसिसाधयिषानुमितयः तत्र पक्ष
तासंपत्तये द्वितीयः सिसाधयिषाविरहो विशेषणमस्तु सिद्धेः प्राथमिकस्तु स्वक्षणास्य किमर्थमिति चेत् यत्र क्रमेण सिसाधयि
षाप्रात्यक्षिकीसिद्धिपरामर्शानुमितयः तत्र तृतीयक्षणे पक्षतासंपत्त्यर्थमिति तन्न यत्रानुमित्सानाशकाले प्रात्यक्षिकी सि
द्धिरप्यन्यपरामर्शानुमितौ तत्र पक्षताविरहप्रसंगात् अथ प्रथमक्षणमपेक्ष्य द्वितीयस्येव द्वितीयमपेक्ष्य तृतीयस्या
पि अव्यवहितोत्तरत्वं स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वं वा तादृशा

शि
६१ व्यवहितोत्तरत्वं वाच्यं [illegible] प्रथमक्षणे सिद्धिसिसाधयिषानुमितयः तत्र प्रथमक्षणोपस्थिता कारणयोत्तरक्षणस्य विशेष
णां प्रथमविशिष्टत्वं द्वितीयं तु सिद्धेस्तत्रैव द्वितीयक्षणोपस्थितासंपत्तये यदि पुनरिच्छाजनिकासामग्रीप्रतिबंधास्यनुमितिं त
दानुमित्यव्यवहितपूर्ववर्तिसिद्धिभिन्नसिध्यभावमात्रं पक्षतेति चेन्न तादृशसिद्धीनां तत्तद्व्यक्तित्वेनाभावः कारणं निरु
क्तकूटविशिष्टत्वेन वा [illegible]ः आनंत्यकार्यकारणभावप्रसंगात् तादृशसकलसिद्ध्यनुमित्यादिविरहविशेषणदानस्य वैय
र्थ्यात् तत्तत्क्षणसंबंधव्यक्तीनां तत्तत्समयावच्छिन्नत्वमनोयोगादीनां वा प्रतिबंधकत्वप्रसंगाच्च [illegible]ः सत्यपि परामर्शा
दौ कस्याश्चित्सिद्धेरनंतरमनुमितिः कस्याश्चिन्नेत्यत्र नियामकाभावात् न चाकारणतावच्छेदकावच्छिन्नसमाजाधीनकार्योत्पादादि
कं कारणतावच्छेदककोटौ निविशते [illegible]सति उत्पत्तिकालावच्छिन्नत्वविशेषितेन स्वक्षणाव्यवहितोत्त[illegible]त्पत्तिकस्वसमा
नाधिकरणानुमितिकसविषयत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पन्नसविषयत्वेन स्वक्षणाव्यवहितो
त्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नसविषयत्वेन वा किंच स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्ष
णवृत्तित्वविशिष्टज्ञानत्वादिना कारणत्वं स्यात् अव्यवहितोत्तरश्च द्वितीयएव क्षण इति नातिप्रसंगः न चादिमेषु परामर्श
र्शस्थितिक्षणे यत्र विरोधिसिध्यादिविनाशस्तत्रोत्पत्तिक्षणेऽनुमितिर्न स्यात् परामर्शस्यातथात्वादिति वाच्यं अनुमिति ६१

सामग्र्याविरोधित्वाविरहेणतदानीमुत्पन्नानुव्यवसायादेरंतरतः संस्काराद्वा तत्संभवात् संस्कारजन्यत्वेन स्मृतित्वस्य प्रागेव निरा
सात् स्याद्वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तिभिन्नत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वत्वान
धिकरणक्षणवृत्तित्वविशिष्टत्वेन स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वे
न वा प्रतिबंधकत्वं तदव्यवहितपूर्वत्वं च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वं न चात्र प्रथमे यत्र सिध्याद्यात्मकपराम
र्शानंतरं सिसाधयिषाया उत्पादकाले तत्पुरुषीयस्य कस्यापि धर्मस्य विनाशो ऽनंतरं पुनरनुमितिस्तत्र तदुत्पादसमयेपिसा
स्यात् तत्पूर्वकालीनानां सर्वेषां तादृशपूर्ववृत्तित्वेनाविरोधित्वादिति वाच्यं अनवरतपरिस्पंदमानापरिमितपवनादिपरमा
णुचेतनसंयोगसंतानांतःपातिव्यक्तीनामविरतमेवोपरमात् फलानुसारबलेनापितादृशकल्पनासंभवात् कारणांतर
कल्पने गौरवात् अन्वयव्यभिचारसंदेहस्य च कारणत्वग्रहाविरोधित्वात् उपादीयमानं वा तत्तदात्मसमयविशेषसंबंधा एव ता
दृशपूर्ववर्त्तिभिन्नाः भवेद्वा तत्तत्पुरुषीयानुमितिं प्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादिना तादृशक्षणवृत्तित्वविशि
ष्टत्वादिना वा कारणत्वं तथा चोपमानादेः प्रमाणांतरत्वभंग्येन सर्वत्रानुमितिसामग्रीसंभवात् विलीयेत च परामर्शत्वा
दिना कारणत्वं अन्यथैव रीत्या कार्यांतरेष्वपि क्लृप्तानां कारणानां प्रतिबंधकानां चातथात्वं अक्लृप्तानां च तथात्वं अतएव

त्रि
६२ तृतीयोपिप्रकारोवैयर्थ्यात्सिद्धेः सिसाधयिषाविरहविशिष्टस्यसिध्यनुमानातिरिक्तसाधकमानयोरन्यतरस्याभावःकार
णमितितुकेचित् तन्न साधकंहिमानंसिद्धिस्वरूपयोग्यं तदुपहितं नसामग्रीवा [illegible]वः चक्षुरादिसत्वेविनानुमित्सामनुमित्य
भावप्रसंगात् नद्वितीयः सिद्धेःपूर्वंतदुपहितत्वाभावेनप्रत्यक्षसामग्रीसत्वेप्यनुमित्सापत्तेः अनुमानातिरिक्तस्यवैय
र्थ्याच्च नतृतीयः अनुमितिसामग्र्यभाववत्वेनप्रत्यक्षकारणत्वेअनुमित्साविरहविशिष्टप्रत्यक्षसामग्र्यभाववत्वेनचानुमि
तिकारणमित्यन्योन्याश्रयात् स्थाणुत्वाभावव्याप्यदर्शनक्षणेप्रतियोग्यारोपविरहेणाभाप्रत्यक्षसामग्रीविरहस्यक्ष
तासत्वेस्थाणुत्वारोपक्षणेतदभावानुमित्सापत्तेश्चेतिकश्चित् वस्तुतः स्वतंत्रान्वयव्यतिरेकशालित्वान्नियमेनप्रथममु
पस्थितत्वाल्लाघवाच्चप्रत्येकमेवतथात्वे अन्यथावाधादेरप्यंतर्भावप्रसंगात् नचानुमित्साविरहस्यप्रत्येकविशेषण
त्वेगौरवं शाब्दसिद्धौसत्यामपशाब्दज्ञानंजायतामितीच्छायामनुमितेरुत्पादात्सिद्धावनुमितिविषयेच्छाविरहस्य प्रत्यक्षसाम
ग्रीसत्वेतादृशेच्छायामप्यनुमित्यनुत्पादात्साधकमानेअनुमितित्वादिप्रकारिकेच्छाविरहस्यपृथगेवविशेषणतायाःत्व
यापिवाच्यत्वात् स्वनिवर्तकप्रत्यक्षादिसामग्रीसमवहितान्यत्वादिनातादृशेच्छयोरनुगमेतिगौरवं अन्यतरत्वघटकयो
रन्योन्याभावयोर्मिथोविशेषणविशेष्यभावेविनिगमकाभावाच्च आत्मनिष्ठस्वसमवायेनसिद्धेरभावः कारणं भिन्नमि
न्नेनचसंबंधेनतदसाधारणकारणत्वापत्त्यात्तत्सामग्र्यामपि विशिष्टवन्हेरिवेतरविशिष्टस्यमनोयोगादेःप्रतिबंधकत्वायो ६२

मानं तथा च कथमनुगतरूपेण तयोरभावः कारणमिति सिद्धेः सिसाधयिषाविरहविशिष्टस्यैककालावच्छेदेन एकात्मवृत्तित्वं
प्रत्यक्षादिकारणचक्षुःसंयोगादेस्तन्यादृशमिति सामग्रीविशेषाभावस्य हेतुत्वेपि लाघवात्सिध्यभाव एव पक्षव्यवहारनि
मित्तं एतदेवाभिसंधाय प्रवृत्तिनिमित्तमुक्तमिति वक्ष्यति फलानुपहितसिद्धेश्चाविरहविशिष्टसिध्यभावापेक्षया बाधाभा
वस्य लघुत्वेपि सिद्धसाधनस्थले पक्षव्यवहारविरहेण तादृशसिध्यभावस्यावश्यकत्वे बाधाभावेन निविशते गौरवात् वि
शिष्टसिध्यभावस्य चात्मनिष्ठस्यैवानुमितिहेतुत्वेपि तस्य परंपरासंबंधादेव पर्वतादौ पक्षव्यवहार इति तु ध्येयं एकस्य पुं
सोऽनुमित्सासत्वेऽन्यस्य तद्विरहेण प्रत्यक्षसामग्रीसत्वेऽनुमित्युत्पादात्तत्पुरुषीयानुमितिं प्रति तत्पुरुषीयानुमित्सा
विरहकालीनतत्पुरुषीयसिद्धिसामग्रीविशेषविरहोऽनन्यगत्या हेतुरूपेतव्य इति सिध्युत्तरानुमितौ सिषाधयिषा
हेतुरस्तु न चैवं मण्यादिस्थलीयदाहं प्रत्युत्तेजकस्य हेतुतापत्तिः उत्तेजकाभावमननुगत्वाच्च तावदभावविशिष्टमण्याद्य
भावस्य चानुगतत्वादिति इहापि दर्शितोऽननुगमः सिसाधयिषायाः सिध्युत्तरानुमितित्वे चानुगमानतिप्रसक्तं दुर्वचं सिद्धि
स्थितिकालीनत्वेन तरसिद्धिकालीनत्वं वाऽनुमितिं प्रति हेतुत्वकल्पने च विनापि सिसाधयिषां सिद्धिनाशकालेऽनुमित्युत्पादो दु
र्वारः एकस्य च पुंसः सिद्धिसत्वेऽन्यस्य सिसाधयिषाभून्यस्यानुमित्सनुत्पादप्रसंगः तत्तत्पुरुषीयतादृशानुमितिं प्रति सिसा

शि
६३ धे यथा हेतुत्वेऽनंतकार्यकारणभावप्रसंगः अविनसिद्धौ सत्त्वां विनापि सिसाधयिषां सामान्यसामग्रीतोऽनुमानोत्पत्तिप्र मिति
संगात् न हि दृष्टा विशेषसामग्री विना सामान्यसामान्यसामग्र्या अनुमितिजनकत्वं नास्ति न चान्यत्रापि तद्विशेषसामग्र्यं
तरमस्ति च कल्पने चातिगौरवं इच्छा यथा नासिद्ध्युत्तरस्यात् सा च न जायते तत्कारणाभावादिति चेत् सामाजनिष्ठानुमि
तिसामान्यं तु स्यादेव कार्यानुत्पादस्य विना कारणाभावमसंभवात् करणव्यापारत्वेनावश्यककारणाभावस्य परा
मर्शस्य कारणतावच्छेदिका पक्षतानकरणमिति तु भ्रमः प्रतिबंधकाभाववदन्वयव्यतिरेकशालित्वेन हेतुत्वात्
अन्यथा यथासंभवं निमित्तकारणस्य समवायिकारणत्वावच्छेदकत्वप्रसंगात् अथानुमितिसाधारणसिद्धेः प्र
तिबंधकत्वे तदभावस्य मरण्या यभाववत्प्रतिबंधकाभावत्वेन कार्यकालवृत्तेरेव हेतुत्वादनुमितिकाले च तदसंभवा
त्सानौ सत्त्वेनेति चेत् यस्य मरण्या यभावादेः कार्यसमकालतया अन्वयव्यतिरेकित्वं तस्यैव तथात्वेन हेतुत्वं न तु सर्वस्य गौ
रवात् अन्यथा समवायिकारणस्य कार्यसहभूतस्यैव हेतुत्वात्कारणमात्रस्य तथात्वप्रसंगो प्राभाकराणं च विजयेरन्नि
ति प्राभाकरास्तु विनाप्यनुमित्सां क्वचित्परामर्शादनुमितिप्रवाहस्याविरललग्नस्यानुभविकत्वात्कालभेदकल्पनायां
मानाभावाच्च पक्षतानानुमितिहेतुः परार्थानुमाने तु सिद्धसाधनमर्थांतरविषयाद्दूषणमित्याहुः ॥ ॥ ॥ ॥ ॥ ६३

परामर्शः

लक्षणोपोद्घातेन विशिष्टज्ञानस्य कारणत्वं व्यवस्थापयन्ति पक्षे स्यादि व्याप्तिस्मरणेति स्मरणत्वमविवक्षितं अव्यापकत्वात्
लाघवात् प्रथमोपस्थितत्वलाघवात् कल्पनालाघवमाह परामर्शेति परामर्शहेतुत्वादिनाप्यनुमितिपूर्वं तादृशज्ञानमवश्यं
मन्तव्यं तथा चातिरिक्तधर्मिग्रहः तत्रानन्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोः कल्पनामपेक्ष्य उभयवादिसिद्धनियतपूर्ववर्त्तिनो
अनन्यथासिद्धत्वमात्रकल्पनालघीयसी ननु धूमत्वावच्छेदेन व्याप्तेरालोकत्वावच्छेदेन च पक्षधर्मताया ग्रहेऽप्यनुमितिः स्यादित्यत
आह एवमिति यद्धर्मावच्छेदेन व्याप्तिज्ञानं तेनैव रूपेण पक्षधर्मताज्ञानं हेतुरिति नातिप्रसङ्गः ज्ञानद्वयादिति द्वित्वमविवक्षितं
लाघवात् अवच्छेदकलाघवात् आवश्यकत्वात् व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानस्य हेतुत्वे व्याप्तिज्ञानहेतुताया आव
श्यकत्वात् क्वचिदुपजीव्यत्वादिति पाठः उपजीव्यत्वं च व्याप्तिज्ञानं विना यद्धर्मावच्छेदेन व्याप्तिज्ञानं तत्प्रकारकपक्षधर्मताज्ञान
स्यासम्भवात् एवं च सिद्धव्याप्तिज्ञाने हेतावतिप्रसङ्गभङ्गाय पक्षधर्मताविषयत्वमवच्छेदकं कल्पने लाघवात् ननु कारणान्त
रं गौरवादिति भावः सिद्धस्य व्याप्तिज्ञानस्य न पक्षधर्मताविषयत्वमित्याशयेनाह तस्येति यद्वा व्याप्यत्वज्ञानमिति व्याप्य
त्वप्रकारकं पक्षधर्मताज्ञानमित्यर्थः ननु विशिष्टस्मरणान्यथानुपपत्त्या ज्ञानद्वयस्यावश्यकत्वात्तयोरेव हेतुत्वं युक्तं
तदिदमुक्तमावश्यकत्वादत आह उपजीव्यत्वादिति विशिष्टज्ञानान्यथानुपपत्त्या तत्कल्पने विशिष्टज्ञानस्योपजीव्यत्वादिस

र्थः स्वसंवेदनसिद्धमेवज्ञानद्वयमावश्यकत्वं चोभयवादिसिद्धत्वेन तस्यैवाश्रयेनाह तस्यैवेति अप्रसिद्धिं परिजिहीर्षुराशंकते अथेति
अथ पक्षवृत्तिः हेतुमिति लाघवादिति शेषः अनुमितिसामग्र्या इति स्मृतिहेतुतावादिनां न व्यानानये दूषणमिदं ननु संस्कारका
रणतावादिनां प्राचामिति अपेक्षादि अथ यत्र प्रथमं पक्षग्रहे गृहीतधूमे स्मृतव्याप्तिवैशिष्ट्यभानमनंतरं च गृहीते पक्षे नाद
शविशिष्टधीस्तत्रेत्यपि द्रष्टव्यं प्रथमतइति विशिष्टज्ञानात्पूर्वमनुमितिसामग्रीविरहप्रदर्शनाय एवं च सिद्धे पूर्ववर्त्तिनि वि
शिष्टज्ञाने तस्यैव तत्त्वेन हेतुत्वं गुरुधर्मद्वयावच्छेदेनानन्यथासिद्धत्वकल्पनामपेक्ष्य लघ्वेकरूपावच्छेदेन नियमानन्यथासिद्ध
त्वकल्पनाया एव न्याय्यत्वात् गृह्यमाणव्याप्यवच्छेदकताकधर्मप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताग्रहप्रकारीभवद्भाव
च्छेदेन व्याप्तिज्ञानत्वेनैकरूपेण कारणत्वे त्वतिगौरवात् विनिगमनाविरहाच्च न वापि च नियतपूर्ववृत्तित्वं कल्प्यमित्यत आह यत्र
नेत्यादि तेन विनेति तथा च व्यभिचारात्कारणत्वं बाधितमिति भावः स्वतो व्यभिचारं निरस्यति अस्मदुक्तेति अनवस्थानादिति
न च धूमांतरसंनिकर्षे तद्व्यक्तिवृत्तिधूमत्वं वह्निव्याप्तिव्याप्यमिति लिंगविशेष्यकपरामर्शाद्वास्यानुमितिसंभवः धूममात्रासन्निक
र्षेऽपि तत्रैव त्वनुमानात्तद्व्यक्तिवृत्तित्वधूमत्वत्ववैशिष्ट्यग्राहकविरहाच्च असाधारणमिति शरीरादिव्युदासः आलोकादिवारणा
य प्रमाणांतरासहकारीति वाच्यं तदपि प्रमाणांतरं भवत्येव प्रत्यक्षादिप्रमाकरणत्वेन विभागात्तद्व्याघात इत्यपि कश्चित् ॥ 

असाधारणमसम्भवद्वृत्तित्वं तथा च यज्जातीयप्रमायाः मनोऽन्यकरणेनासम्भवद्वृत्तित्वं तत्र यत्र बहिर्विषयप्रमोत्पादकं यज्जातीयप्रमासा
मग्रीविरहे वा यत्प्रमोत्पादकं तत्तज्जातीयप्रमाहेतुरित्येव व्याप्तिः तत्तच्च सिद्धं यां किल स्मरणप्रमायां विलक्षणलोचनत्वकरणे कल्पनीये आ
वश्यकत्वाद्बाधकाभावाच्च तस्यैव तथात्वं पर्यवस्यति संशयस्त्वालोचनविशिष्टानुभवरूपो येनोपनयादिवशाद्बहिर्विषयानुभवजनन
नेकसदृशशक्तिकेन मनसा दोषवशाद्भ्रमेव तदभावादिवशात्प्रमाऽपि जनयितव्येत्याशंक्येत किंतु धर्मिज्ञानकोटिस्मरणादिरूपो धं
मिज्ञानं पुनरनुभवरूपं यथासंभवमक्षादेः स्मरणं च संस्कारादिसाध्यमेनाह संशयेति व्याप्यत्वानुमानादिति धूमत्वादौ वन्ह्यादिव्या
प्तिं व्याप्यत्वं जानतो धूमत्वत्वादिना तद्रूपनिश्चयदशायां अन्यदा त्वसंसर्गाग्रहादेवेति अतीन्द्रियादौ लिंगे व्याप्यत्वप्रकारकज्ञानस्या
संभवेऽपि अनुमितेः सर्वानुभवसिद्धत्वात्तस्य कारणत्वे बाधिते परिशेषाद्दोषेऽपि व्याप्यतावच्छेदकप्रकारकज्ञानस्य हेतुत्वे सिद्धे शाब्द
व्याप्यत्वावबोधस्थलेऽपि तत्कल्प्यते कारणं विना कार्योत्पत्तेरभावात् तेन विना च तत्रानुमितेरसिद्धत्वान्न तस्यापि हेतुत्वबाधः तथा
तीन्द्रियलिंगादौ सर्वानुभवसिद्धाया अनुमितेः सर्वथैवापलापः परन्तु क्वचित्कालविलंबमात्रकल्पनमित्याशयेनाह अत्रे
वेति तुल्यमित्यभ्युपगमवादः यत्र यदवच्छिन्ने यत्राहितदभावेन तदभावव्याप्यत्वाग्रहो तेन वा विशिष्टेन तत्संशयः तथा च
दवच्छेदेन यद्व्यावर्तकदर्शनं तद्धि द्वेष्यनुभवबलात् व्यावर्तकं च तदभावो यदवच्छेदेन यदभावावगतो यो वा तदभावव्या

श्रि

६५ प्यत्वेन गृहीतः यथा स्थाणुत्वाभाववत्पुरुषत्वावच्छेदेन ग्रहे पुंस्त्वस्य स्थाणुत्वाभावव्याप्यत्वेन गृहीतस्य करादेर्वा इदंत्वावच्छेदेन ग्रहे पुरुषोयं

स्थाणुर्न वेति संशयः तदभावादिवत्त्वन्तदन्योन्याभावादिः तादात्म्येन संशयेत्तदन्योन्याभावादिरपि द्रष्टव्यः एवं तद्भ्रमोपि विशेषदर्शन

स्य विपरीतज्ञानमात्रविरोधित्वात् इत्यग्रे व्यक्तीभविष्यति नन्वित्यादि इदं नीलत्वेन प्रतीयमानं भावो अभावो वा भावत्वाभावत्वयोः तत्व

योरित्यर्थः लिंगत्वाभावात् अप्रसिद्धत्वेन तत्त्वासंभवात् भावत्वाभावत्वेत्यादि किं केवलान्वय्यनुमानमतिरिक्तं चाभावमभिप्रेत्य के

वलान्वयिनः साध्यस्य धर्ममात्रमेव व्याप्यमिति ध्येयं एवमिति लिंगं व्याप्यत्वे लिंगतावच्छेदकं वा वन्हौ व्यतिरेकेति यत्संशयव्यति

त रेकनिश्चयावित्यत्र व्याख्यानत्वमेतत् महायव्यतिरेकनिश्चये कार्यानुत्पत्तौ तद्व्यतिरेकनिश्चयाभावस्य कारणतापत्त्येष्यतन्निश्चयस्यैव

कारणत्वं युक्तं लाघवादित्यभिप्रायकमिदं [illegible] वक्लृप्तनियतपूर्वभावतयाभेदग्रहाभावस्य वानुमिति हेतुरित्यभिप्रेत्यास्तु वेति वस्य

ति सामान्यतो विशेषदर्शनात् सामान्यतो भ्रमो न स्यात् विशेषतस्तु स्यादेवेत्यभिप्रायिकामाशंकां निरस्यति नन्वेति अस्तु वेत्यभ्युप

गमवादः नन्वित्यादि अभेदज्ञानस्याहेतुत्वे भेदग्रहः प्रतिबंधको न भवितुमर्हति अभेदेति तथा च तथाभूतस्यापि प्रतिबंधकत्व

मनापत्त्या यत्कृव्यमिति भावः अतथाभूतत्वस्य संदिग्धत्वे व्यभिचारमाह तथापीति विशेषणांतरदाने चाप्रयोजकत्वमिति भावः

गोत्वे गोपदशक्यतावच्छेदकत्वं विशेषितं वा तदस्तीत्यतो मधुरत्वेति मधुरत्वव्याप्यो धर्मो जातिरखंडोपाधिर्वेति फलतो न विशेषः गो

रिति ज्ञाने गोत्वप्रकारकत्वं विशेष्यमाशंक्याह अन्यथेति व्यक्तेः प्रकारत्वेपि लिंगतावच्छेदकत्वासंभवादाह गवेतरेति गोत्वत्वस्याप्रवे ६५

वेशान्नात्माश्रयः न्वयव्याप्ताव्यंगवेत्तरासमवेतत्वादिकमेवोपादेयं कालादौ व्यभिचारवारणाय समवायसंबंधेन हेतुत्वस्यावश्य
वाच्यत्वेनाभावसाधारण्येप्यदोषात् व्यतिरेकेपि हृद्यांतरे णासंबंधांतरेणान्वयगोत्वाभावस्यापि व्यभिचारित्वात् गवेतरासमवेतत्वस्य त
त्वेन समवायसंबंधेनाभावस्यैव गमकत्वात् लिंगतावच्छेदकं तथा च न व्यभिचारः न तथा न तेन व्यभिचारवारणं न हीति धूमा
न्यान्यत्वमिति दृष्टांतार्थं नैकधर्मस्यावच्छेदकत्वापेक्षया धर्मद्वयस्यैव लाघवगौरवमिति वाच्यं तादृशैकधर्मघटकानेकभेदादिघट
कतया धर्मद्वयस्यैव प्रथमोपस्थितत्वेन चावच्छेदकत्वौचित्यात् अन्यथा वह्न्यादीनामपि व्याप्यतया तावदन्यतमत्वस्यैवावच्छेदकत्वं
स्यात् न्यथेति विशेषदर्शने हि विपरीतज्ञानविरोधित्वमात्रं पक्षेऽनुपयुज्यते तत्त्वे चान्यतरत्वदर्शनस्यापि व्याप्यधर्मदर्शनत्वेनाक्ष
तं तत्र च तदन्यान्यत्वस्यातिरिक्तत्वे धूमत्वत्वादेः तदघटितत्वाच्च धूमत्वादिरूपत्वेपि धूमत्वत्वादेरप्रवेशात् लिंगत्वेपि न वैयर्थ्यमित्या
दि द्रष्टव्यं एवं चान्यतरत्वस्य व्याप्यतावच्छेदकत्वेप्युक्ते तदवच्छेदेन तद्ग्रहोपगमेत वान्यथा व्याप्तिस्वीकारप्रसंगः स्तु वा गुरुर
पि धर्मोऽवच्छेदकः तथापि शुद्धव्याप्तिप्रकारकज्ञानस्थले व्यभिचाराज्ञानस्य हेतुत्वमित्याह किंचेति वह्नीत्यादि व्याप्तेर्व्याप्यतव
च्छेदकत्वादिति भावः भावादिति वस्तुतो विशेषव्याप्त्यवच्छिन्नाग्रहाद्व्याप्तिरतिरिच्यतां किं तेन न हि वस्तुतो व्याप्यतावच्छेदकप्रकारकं
पक्षधर्मताज्ञानं हेतुरतिप्रसंगात् परं तु यदवच्छेदेन व्याप्तिर्गृहीता तत्प्रकारकं न च तद्वाहानी व्याप्यतावच्छेदेन व्याप्तिर्गृहीता न च तादृग्ग्रहे

शि
६६ अनुमितिरुपलपनीयप्रमाणाभावात् कल्प्यत्वाविशेषेण गुरुरूपावच्छिन्नस्यैव नियतपूर्ववर्त्तितया कल्पयितुं युक्तत्वात् एतेन व्याप्तिग्रहविषय
धर्मिमात्रवृत्तिधर्मप्रकारकपक्षधर्मताज्ञानं हेतुरित्यपास्तं सामान्यलक्षणानंगीकारे धूमत्वादेरपि तथात्वायोगात् वह्निव्याप्यं सर्वं प्र
मेयं धूमवान् पर्वत इति ज्ञानादप्यनुमितिप्रसंगाच्च व्याप्तिसमानाधिकरणत्वेन तादृशधर्मभानोक्तौ च सा धूमव्यक्तिर्वह्निव्याप्येति ज्ञा
नसहितादुक्तज्ञानात्तत्प्रसंगो वह्निव्याप्यवानिति विशिष्टज्ञानासंग्रहश्च अत एव व्याप्यत्वभानांशे प्रकारतया पक्षतादृशोधर्मो भासते त
त्प्रकारकं पक्षधर्मताज्ञानं हेतुः व्याप्यवानित्यत्र वह्निव्याप्यत्वमेव तथा धूमवानित्यादौ च धूमत्वादिकं धूमसमानाधिकरणेत्या
दिव्याप्तिभाने तस्यापि प्रकारत्वादित्यपास्तं धूमसमानाधिकरणवह्निव्याप्यं सर्वं प्रमेयं धूमवानयं प्रमेयत्वव्याप्यसर्वमभिधे
यं समानाधिकरणकं चायमित्यादिज्ञानादप्यनुमित्यापत्तेश्च धूमत्वादेरतिरिक्तवृत्तित्वग्रहे स एव प्रतिबंधकः तदग्रहे त्वनुमिता
विष्टापत्तिरिति वा एवंविधेष्टापत्त्यैव सर्वत्र प्रतीकारे विशेषणानुसरणवैयर्थ्यात् व्यभिचारग्रहपक्षधर्मताज्ञानयोरेव हेतुत्वस्य
सुवचत्वात् किंच पुरुषान्तरस्य तस्यैव वा कालान्तरे वर्तमानं व्याप्तिग्रहमादायापत्तिप्रसंगभंगाय स्वसमानकालीनस्वसमानाधिकरण
व्याप्तिग्रहविषयधर्मिमात्रवृत्तिधर्मप्रकारकं पक्षधर्मताज्ञानं वाच्यं तथा च स्वत्वस्याननुगतत्वात् कारणतावच्छेदकस्य तत्तद्व्यक्ति
मात्रपर्यवसायितेति मिथो व्यभिचारः तत्तत्पक्षधर्मताज्ञानत्वेनैव हेतुत्वसंभवे आधिक्यवैयर्थ्यं च एतेन गुरुधर्माण व्याप्यवच्छे ६६

दृक्ताकेस्याद्युपदर्शितप्रकारद्वयमपि प्रत्युक्तं वेदितव्यं एवं यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरित्यपि निरस्तं त
तद्धर्मविशिष्टांतर्भूतिकत्वेनाप्यननुगतत्वाच्च यत्रैकज्ञानं तत्साधनताज्ञानस्य हेतुत्वेपि समानमिति चेत् सत्यं प्रतिवक्ष्यते हि तत्र तत्र लघुगुरुरूप्या
भ्यां युगपदुपस्थितौ लघुरूपावच्छेदेनैव कारणत्वं कल्प्यते लाघवात् नियमादेरेकतररूपावच्छेदेनाप्यकुसत्वादिसाधारणधर्मा ह[illegible] चेति
वह्नित्वसमानाधिकरणाभावेत्यादिव्याप्तौ स्वपदार्थस्यैकस्याभावेन धूमादिकमेव विशिष्यो [illegible] च धूमसमानाधिकरणाभावप्र
तियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणेंधनवानयमितिज्ञानादप्यनुमितिप्रसंगेन तादृशवह्निसमानाधिकरणधू
२ मत्वं व्याप्तिः तत्प्रकारकमेवं पक्षधर्मताज्ञानमननुगतमपि हेतुरिति वक्तव्यं तथा च यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितान
वच्छेदकत्वं साध्यतावच्छेदके गृह्यते तत्प्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वं अयं वह्निव्याप्यवान् धूमो वह्निव्याप्योयं धूमवान्वह्नि
धूमव्यापकोयं धूमवानित्यादिसकलवित्तिव्यापकत्वात् न तूपदर्शितव्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन अव्यापकत्वात् किं चान्यथा
व्याप्तिवादिभिः धूमादिसमानाधिकरणात्यंताभावाप्रतियोगिगगनसमानाधिकरणधूमादिमानयमितिज्ञानादनुमितिसंगीकाराद
खण्डव्याप्तेरप्रसिद्धतथाप्रकारत्वासंभवात् साध्यसाधनव्यापकत्वग्राहकमधिकरणादौ च साध्यीयत्वाद्यवगाहि पक्षे चैतादृश
साधनवत्तावगाहिमत्ज्ञानं तत्त्वेन कारणत्वं वाच्यं तथा च लाघवात् तादृशव्यापकत्वपक्षधर्मतावगाहित्वयोरेव कारणतावच्छे
दकत्वं अवृत्तिहेत्वनुरोधेन व्यापकत्वस्यापि खंडशो निरुक्तिः तेषाममपरमतिरिच्यते यथा च सामानाधिकरण्यज्ञानस्य हेतुत्वेपिन

शि
६७

नक्षतिः तथा वक्ष्यत इति चे[illegible]न गृह्यमाणव्याप्यवच्छेदकताकेत्यादिप्रकारद्वयोक्तदूषणग्रस्तत्वात् वह्न्यसंभावव्दद्दृष्टेति धर्मवत्
यमित्यादिस्थानादप्यनुमित्युदयाच्च व्यभिचारज्ञानविरोधिज्ञानविषयत्वेनैव व्याप्तीनामनुगमात् [illegible]न्यत्र कारणे कार्यमेव प्रमाणं तच्च
कार्यकारणभावग्रहे सति स्यात् स एव तु न संभवति गौरवज्ञानेन प्रतिबंधादित्यत आह कारणतायां ग्रहेति कारणतानिर्णयं विना तत्फल
स्य धर्मांतरनिर्णयस्याभावेन तद्घटितगौरवस्यानिर्णयादित्यर्थः संभाव्यते तावदिदं धर्मांतरकल्पनं विना कारणत्वस्यैवाशक्यनि
र्वाहत्वादिति चेत् संभाव्यतां न तु तत्प्रतिबंधकं सामान्यतः कार्यकारणभावग्रहस्य प्रायशो विलयप्रसंगात् तत्र तत्र कुसृनियतपूर्वव
र्तितावच्छेदकरूपांतरविरहेणानन्यथासिद्धगौरवमप्यास्थीयत इति चेदिहापि तद्विरहस्यासकृदावेदितत्वादिति कृतं पल्लवितेनेति
व्यभिचारनिर्णयेन कारणत्वग्रहासंभवं निरस्यति नचेति अनुमानयोरिति अनुमितौ क[illegible] साध्यनिष्ठसाध्यांतरानुमित्यासहचारग्रहो
ग पंमेपि नियमांशग्रहासंभवादितिभावः नियतव्यापारेति एकसंबंधिज्ञानाधीनसंबंध्यंतरस्मरणोदितः क्वचिद्दृष्टज्ञानोत्पन्नावप्य
नियतत्वेन न तस्य व्यापारत्वं पूंजनयित्वैव यस्य पज्जनकत्वं तस्यैव तत्र तद्व्यापारत्वादित्यर्थः वस्तु वस्तुतस्तदुपनयव्यक्त्यादेः तत्प्रमा र
व्यक्तिं प्रति करणत्वेपि नक्षतिः प्रमावैजात्यस्यैवात्र प्रमाणत्वनिमित्तत्वात् न चात्रापि प्रमावैजात्यं अनुपलंभबाधितत्वात् माना
भावाच्च उपनयस्य च विशिष्टज्ञाने विशेषणज्ञानत्वेन प्रत्यक्षे च संनिकर्षविधया पयोगित्वाजात्यव्यवस्थापकत्वात् अतएव बा
ह्याभ्यंतर प्रत्यभिज्ञासादृश्याभावादिप्रत्यक्षाणामनंतानामप्रतियोग्यादिविषयत्वं अन्यथाजातिसंकरप्रसंगात् ज्ञानद्वयकल्पने

६७

चस्थैर्यमात्रबुद्धिश्चेत व्यवस्थापितं च विशिष्टज्ञानस्य व्यवहारहेतुत्वं न च प्रमाणान्तरासहकृतोपनयजन्यतावच्छेदकतया वैजात्य
सिद्धिः इतरासहकृतत्वेनाजनकत्वात् असिद्धेश्च उपनयार्थसंनिकर्षवशेन मनसा प्रत्यक्षजननस्यैवोपगमात् इत्यपि नैवं धारावा
हिकोच्छेदः इतरमात्राविशेषणत्वेनोपस्थितिरेव तत्र स्यात् कोटिस्मरणस्य संशयेन तस्य च व्याप्तिस्मरणादिना नाशात् द्विशेषदर्शनका
ले च संशयायोगाद् हन्त चेति गौरवादिति नैवम् अभावविशेषणत्वेनोपस्थितस्यापि भावस्य अग्रहापत्तिः अभावग्राहकसाम
ग्र्याबलवत्त्वाप्रतिबंधात् अभावाविशेषणत्वेनोपस्थितिस्तत्रापि स्यापि कश्चित् वस्तुतस्तु स्वतंत्रविशेषणज्ञानस्य विशिष्टधी
हेतुत्वे अनुमित्यर्थमेव तथा स्वीकरणीयं न हि विशिष्टप्रत्यक्षं प्रत्येव तत्त्वे मानाभावात् तर्हीत्यादि वस्तुतो यत्र क्वचिदपि गृही
तस्य धर्मिणि साधारणधर्मदर्शनात् स्मृतस्य संशयादि साधारणी विशिष्टधीः इयांस्तु विशेषः यत् कोटिद्वयसहचरितधर्मदर्शना
त् कोटिद्वयस्मरणे संशयो अन्यथा त्वेककोटिनिश्चय इति एतेन धूमत्वादिना पक्षधर्मे व्याप्तिमनुमाय वन्ह्याद्यनुमितिरिति परास्तं
धूमत्वस्यानुपस्थित्या धूमत्वादेर्वन्हिव्याप्तिव्याप्यत्वाग्रहे वन्ह्यननुमितिप्रसंगाच्च अत एव यद्धर्मावच्छेदेन यद्वत्वं गृहीतं तु पनयव
शात्तद्धर्मविशिष्ट एव तत्भासते धूमत्वावच्छेदेन च वन्हिमत्त्वग्रहात् धूमवान् वन्हिमानिति बुद्धिः स्यात् न तु पर्वतो वन्हिमानिति परास्तं
मानाभावात् चंदनत्वावच्छेदेन गृहीतस्य सौरभादेः पुरोवर्त्तिनि चंदनत्वादिदर्शनादिंदसुरभीत्यादि बुद्धौ व्यभिचाराच्च यद्विच

अवच्छेदकधर्मवैशिष्ट्यमपि भासत इति नियमोपि प्रामाणिकः तथा धूमवानयं पर्वतो वह्निमानित्येव धीरस्तु नहि लिंगोपधाने भाने बाधकं
अन्यत्साधकविरहात् हेतुसाध्ययोः संबंधिद्वयनिरूप्यपदार्थप्रत्यक्षं प्रति संबंधिद्वयप्रत्यक्षस्य हेतुतायाः संयोगादिस्थले त्वयैव क्लृप्तत्वात् त
दनादरेपि साध्यघटितमूर्तिकव्याप्तिप्रत्यक्षस्य साध्यप्रत्यक्षसामग्रीं विनाऽसंभवादिति भावः विशेषणतादि विशेषणविशेष्यसंबंधः
तदंशे प्रमात्वे लौकिकत्वे वा विशेषदर्शनं च विपरीतज्ञानप्रतिबंधकतया क्वचित्सहचरितधर्मदर्शनत्वेन विशेषणस्मारकतया विशेषणस्यज्ञा
नसत्वेप्यतिरिक्तसंनिकर्षः तदंशे लौकिकतायामुपयुज्यते एकैवहीति वस्तुतो व्याप्तिभेदेप्यक्षतिः नहि बहिरिंद्रियेण द्रव्यस्याधेयतयातद्वत्त्वस्य
वाग्रहे तत्संयोगो हेतुः दंडीपुरुषो नास्तीत्यादौ व्यभिचारात् कथमन्यथा पक्षधर्मे वह्निमत्त्वगर्भितव्याप्तिरेव गृह्यते न चाधेयतयापु
त्यविशेष्ये साक्षात् द्रव्यग्रहे तत्संयोगो हेतुः अभेदारोपे च नाधेयतया रजतादिप्रकारः दंडाद्यात्मकतत्तावगाहिप्रत्यभिज्ञा
यां च तत्तावदभेदो भासत इति न दंडादेः साक्षात्प्रकारतेति वाच्यं मानाभावात् धूमवान्वह्निमानिति सामान्यलक्षणयाग्रहे
व्यभिचाराच्च तत्तासंसर्गस्यापि प्रत्यभिज्ञायां भानसंभवात् प्रकृतेपि वह्निमदभेदग्रहे शोधकतात्पर्यत्वाच्च ोन तत्ताकारानुप
नीतत्वात् शब्दग्रहे स हेतुरिति परास्तं चैत्रपदवाच्योपमितस्यादिवत् दंडयमभासीदयं डीत्यादिग्रहस्यानुभवविकलत्वाच्च त
नात्वस्यातिरिक्तस्याभावात् तद्वद्द्रप्रयोगजननाभावस्य च निमित्तांतरविरहप्रयुक्तत्वस्य जन्यतानवच्छेदकत्वात् तज्जनन ६८

योग्यतायाः प्रकृतेपीष्टत्वात् [illegible]रादिंद्रियग्राह्येविद्यमानद्रव्य[illegible]स्य तेन ग्रहे तत्संयोगो हेतुरिति पक्षे तु नयनादिनारजतादेरभाव
ग्रहे भेदारोपादौ व्यभिचाराच्च [illegible]पि वंशव्यवहितदण्डे पुंसि न कथं नायनो दण्डीति निश्चय इति चेन्न क्वचित्सहचरितधर्मादर्शनात्तदसम
र्णात् क्वचित्साधारणधर्मदर्शनाद्धि नासंशयस्यैवजननात् सति च विशेषदर्शनादाविष्टत्वात् पुरुषत्वेन न कथमन्यथा दण्डीन वे
त्यादिकः संशयः न हि नासीत्तद्दृष्टबुद्धिः नात्र निश्चय इति चेन्न किं तेन उक्तं हि संशयत्वे निश्चयत्वं वाऽजन्यतावच्छेदकमिति [illegible]तु
[illegible] तथापि विशेषस्यादर्शनात् संशयस्यैव तद्दर्शनात् निश्चयस्यापि संभवात् मा भूद्वा नायनादिरयं कुत्राशनादिनिर्णयो मानस्तु न
स्यात् तत्र तादृशानियमस्यानुपपत्तेबाधितत्वादिति उच्यते अस्ति तावदनुमिनोमीत्यनुभवसाक्षिको जातिविशेषो यत्र कारणमन्व
यव्यतिरेकाभ्यां परामर्शः मानसप्रत्यक्षविशेषो साविति चेत् कुतोस्य प्रत्यक्षत्वं अनुभवत्वादिति चेत् किमेवमनुभवत्वमन्य
त्रक्षत्वात् स्मृत्यन्यज्ञानत्वमिति चेन्न अप्रयोजकत्वात् अनुमितौ साक्षात्कारित्वग्रहप्रसंगाच्च [illegible]जकलौकिकसंनिकर्षासंनिक
र्षाजन्यत्वं वि[illegible]ति चेन्न आत्मानुमितौ तस्यापि संभवात् वह्निमनुमिनोमि न तु साक्षात्करोमीत्यबाधितसाक्षात्कारत्वाभाव
ग्रहाच्च आगत्यानुसौरभं न पश्यामीत्यादौ अन्यथात्वकल्पनं सामान्यलक्षणानंगीकर्तॄन् प्रत्येवाप्रसिद्धसाध्यकानुमितौ न प्रत्य
क्षत्वसंभावनापि संनिकर्षासंभवात् एतेन शाब्दादिकं व्याख्यातं व्यवस्थापयिष्यते तावदप्रसिद्धाभावसाध्यकानुमितिः न च

दि

६९

सासाध्यक्तारित्तौ तत्रोपनयाभावात् एवंच प्रसिद्धसाध्यकानुमितेरपि न साक्षात्त्वं जातिसंकरप्रसंगादित्यपि केचित् तत्र भेदत्वादिना
दुपस्थितेऽभावादिप्रतियोगिकत्वग्रहदशायां मानाभावाच्चेति तन्निष्ठावच्छेदकांतरग्रहणं तेन असंभवाच्चेत्यपि द्रष्टव्यं उपसंहरति न
स्माच्चेति यादृशेत्यनास्थायां दुर्भयथापि प्रकृतासंगतेः वस्तुतो व्याप्यपक्षयोर्वैशिष्ट्यावगाहिज्ञानत्वेन हेतुत्वं विनिगमनाविरहेणान्य
तरविशेषणविशेष्यभावस्यातंत्रत्वात् लाघवाच्चेति अथ व्याप्यवृत्तेर्व्यापकत्वसंपत्तये अभावस्य प्रतियोग्यसामानाधिकरण्यं वा
च्यं तच्च स्वप्रतियोग्यनधिकरणावृत्तित्वं एवं चावृत्तिगगनादेर्धर्ममात्रव्यापकत्वं स्यात् तादृशघटत्वाभावाप्रतियोगित्वात् तदधिक
रणाप्रसिद्ध्या च तदभावस्य प्रतियोग्यनधिकरणावृत्तित्वासंभवात् तथा च तत्र व्याप्तत्वये व्यापकहेतुसामानाधिकरण्यं वाच्यं न चैवं हे
तोर्व्यापकसामानाधिकरण्यापेक्षया लाघवमिति चेत् अस्तु तावदेवमापाततः तथापि वृत्तिमत्त्वमात्रमुपादेयं न चैवं हेतौ साध्यसा
मानाधिकरण्यस्य संशये व्यतिरेकनिश्चये वा अनुमित्यापत्तिरिति वाच्यं संशये दुष्टत्वात् व्यतिरेकनिश्चये च पक्षधर्मताग्रहे परामर्शावि
रहात् तद्ग्रहे च साध्यासामानाधिकरण्यधर्मांतरग्रहस्येव तस्यापि विरोधित्वात् अन्यथातिदृष्टत्वात् पर्वतो वह्निव्याप्यधूमवान् पाषाण
मयत्वाश्रयपाषाणमयावृत्तिश्च वह्निरिति ज्ञानेन च तुल्ययोगक्षेमं पर्वतवृत्तिधूमव्यापको वह्निर्धूमवदवृत्तिश्चेति ज्ञानं न च साध्याप्र
तियोगिकस्वसमानाधिकरणयावदत्यंताभावत्वकत्वं साध्याप्रतियोगिकत्वावच्छेदकस्वसमानाधिकरणात्यंताभावत्वकत्वं वा
व्याप्तिः साध्यप्रतियोगिकत्वं च केवलान्वयिनि साध्यस्यान्योन्याभावे संबंधविशेषावच्छिन्नात्यंताभावे वा प्रसिद्धिरिति वाच्यं गौरवात् ६९

व्यापकताज्ञानं नाभावेन यावत्त्वस्य दुर्वचत्वात् प्रमाणाभावेन स्वरूपसंबंधविशेषरूपत्वासंभवेनावच्छेदकत्वस्यानतिरिक्तत्वपर्यवसायित्वात्
व्यापकतायां च प्रतियोगित्वादेः स्वरूपसामान्याभावस्योक्तत्वाच्च संबंधादिनिष्ठसाध्यप्रतियोगित्वव्यक्तेरभावस्य व्यभिचारिसाधनसमानाधिकरणत्वा
वद्वृत्त्यंताभाववृत्तितया व्याप्तिस्यावश्यंवाच्यत्वात् साधनसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपं व्यापकत्वं त्वा
नमपेक्ष्य साध्यवद्न्यावृत्तित्वस्यानत्यलघुत्वात् तद्वृत्त्वादिनं निरस्यति अत एव साध्येति वीप्सासमभिव्याहारवशात् दुष्टस्य धर्मवद्वृत्तेरत्यंता
भावस्यान्योन्याभावस्य वा प्रतियोगिताभावो विधेयधर्मेत द्वृत्तिवाभासते ननु विधेयधर्मतद्वृत्तेरत्यंताभावान्योन्याभावानधिकरणवृत्तित्वबुद्धे
र्धर्मवति यद्वदभिधेयं तत्प्रमेयमित्यादावसंभवादिति भावः साध्येति अयोगोभावप्रतियोगित्वं तथा च साध्ये साधनवन्निष्ठाभावप्रतियो
गित्वव्यवच्छेदेनेत्यर्थः साध्यादीति तस्याश्च केवलान्वय्यनुमानमित्यपि द्रष्टव्यं साध्येति एतच्च विरोधस्यातिस्फुटत्वमभिसंधाय साध्याभाववद्वृ
त्तित्वबुद्धेरपि व्यापकताधीविरोधित्वादिति वदंति साधनस्येति प्रायिकत्वाभिप्रायेण तेन क्वचिद्दृशादिना क्वचित्साध्येंद्रियसंनिकर्षोस्य स
मर्थेपि न क्षतिः पक्षतावच्छेदकसाध्यसंबंधस्याग्रहाद ग्रहेप्यनुमित्सया अनुमितिसंभवात् व्यभिचारादिति नव्यपदुभयवैशिष्ट्यावगाहि
ज्ञानं कारणं तत्र तदेकतरोपसर्जनस्यान्यतरस्य ज्ञाने प्राधान्येन न भानमिति वाच्यं मानाभावात् अत्रेदमस्वरसबीजं पक्षधर्मसमानाधिकर
णाभावप्रतियोगित्वे नाभावज्ञानं वह्न्यादावभ्रांतमसंभवि तादृशाप्रतियोगित्वप्रतियोगिकाभावावगाहित्वात्ति प्रसक्तं पक्षधर्मधूमसमा
नाधिकरणाभावप्रतियोगित्वेन च तत्र तन्न व्यापकं येन रूपेण पक्षधर्मताग्रहस्तद्रूपावच्छिन्नव्यापकताज्ञानं च मीमांसकमतनिरासेन निरस्तमिति॥

शि ७०

परिचायकत्वं परिचयव्यावर्तकत्वं तच्चोपलक्षणतयेत्याह पक्षे चेति विशेषणतयात्वे पुनरित्यादि अवच्छेदकतामात्रेणान्यथा
सिद्धावाह अन्यथेति अपि चेत्यादि यावद्विशेषणसमानकालीनत्वेन तादृशी बुद्धिः साज्ञायमानतद्विशेषणजन्येति सामान्यव्याप्तौ पक्षधर्म
तासंपत्तये धूमविशेषणके त्यादि तादृशस्यानुभवविकल्पप्रदर्शनाय च धूमवानित्यादि ज्ञायमानेति च तज्ज्ञानस्यापि जनकत्वलाभाय साध्य
विशिष्टानुमितेः साध्याजन्यत्वात् विशेषणसमानकालीनत्वेति धूमकालीनवह्निमान् धूमध्वंसादित्यनुमितेर्धूमाजन्यत्वात् विशेष्येति वि
शेष्ये विशेषणाभावापन्नयत्तत्समानकालीनत्वेन धर्मान्तरवैशिष्ट्यावगाहीत्यर्थः तदानीं धूमवान्पर्वतो धूमकालीनवह्निमान् धूमध्वंसादि
व त्यादौ च विशेषणे विशेषणतापन्नस्यैव धूमस्य समानकालीनत्वं वह्नौ भासते न तु विशेष्यतापन्नस्य अनुभवसिद्धो ह्ययं विशिष्टवैशिष्ट्यबुद्धीनां
विशेषणताविशेषः विशेषणं धर्मितावच्छेदकं विशेष्यं च विधेयं तथा च विधेयतावच्छेदकावच्छिन्नं यद्धर्मविशिष्टं तत्समानकालीनत्वेनावगा
हते यादृशी बुद्धिः साज्ञायमानधर्मजन्येति पर्यवसितोऽर्थः धूमकालीनवह्निमानित्यादौ च विधेयतावच्छेदकधूमकालीनवह्नित्वावच्छिन्नेन
धूमकालीनत्वेन भासते परं तु वह्नित्वावच्छिन्ने धूमवान्पर्वतो धूमकालीनवह्निमानन्यो वह्निमानालोकादित्यादौ न धूमत्वविशिष्टे धूमकालीन
वह्निमत्त्वं भासते किं तु तादृशविशिष्टपक्षतावच्छेदकवत्ति वह्निमत्त्वे संबंधमर्यादया समानकालीनत्वमवगाहत इति वदन्ति अथवा विशि
ष्टत्वं व्यापकत्वं तच्च तत्समानकालीनत्वग्राहकज्ञ्यत्वं विशेषणविशेष्यपदे च धर्मद्वयोपदर्शके तथा च एकस्मिन् धर्मे यद्धर्मसमानका ७०

लीनत्वग्रहासम्भवप्रसंगादित्तदुभयसमानकालीनत्वबुद्धिः ज्ञायमानतदुभयमन्ये त्वर्थः एवं च न क्वापि व्यभिचारशंका साध्यस्य पक्षतावच्छेद
कसमानकालीनकालीनत्वं क्वापि नानुमितिविषयः मानाभावात् नवीननये तु काव्वादेः पक्षतावच्छेदकत्वे तदवच्छिन्नत्वं साध्यस्य भासते इत्यन्यदे
तत् दंडी पुरुषो गच्छतीत्यादिशाब्दधीवारणाय शाब्देति तुल्यन्यायतयोपनीतभानवारणाय तदन्यत्वमपि वाच्यमिति स्पष्टमिति ॥
एतन्नये चातीतसाध्यहेत्वतीतत्वादिलिंगकानामनुमितिरिति नातीतलिंगकालीनसाध्यावगाहन्यनुमितौ व्यभिचारः कालोऽत्र वर्तमानो विवक्षि
तः तद्विशिष्टांशे च प्रमात्वं वाच्यं वर्तमानत्वं यातादृशधर्मविशेषणमित्यपि कश्चित् केचित्तु विशेषणं विशेष्यतावच्छेदकं तथा च वर्त
मानविशेष्यतावच्छेदकसमानकालीनतया धर्मान्तरवैशिष्ट्यावगाहिशाब्दज्ञानत्वादित्यर्थः सतश्च पक्षतावच्छेदकस्य हेतुत्वमिष्टमेव
समानकालीनत्वानुस्मरणं तु तादृशविशिष्टविषयत्वं प्रतीयमानविशेष्यतावच्छेदकजन्यत्वस्य प्रयोजकत्वसूचनायेत्याहुः परामर्श एवेति
नवकारणतावच्छेदकस्य चस्य न व्यापारतापरामृश्यमानत्वेन परामर्शजननादिति वाच्यं व्यापारं प्रति ह्याग्नरेण हेतुत्वेऽपि फलं प्रति तादृप्ये
णहेतुतायां विरोधाभावात् लिंगत्वेनानुमितिहेतुता परामर्शस्तु व्यापारमात्रमित्यपि कश्चित् परामर्शविषयस्येति विनिगमनाविरहे
विशेषणत्वं वा तस्य हेतुत्वे बीजं न चेदमज्ञायमाने स्तीति भावः न च विशिष्टस्य कारणत्वे ग्रहेऽनुप्रमाणं विशेषणतावच्छेदकावच्छे
देनापि तस्य सिद्धिरिति तथा चापरामृश्यमानस्यापि लिंगत्वेन हेतुत्वमविरुद्धमिति वाच्यं यतो हि न लिंगत्वं साध्यव्याप्यत्वादिकं तद

त्रि
७१ प्रसिद्धावपि गगनाद्यनुमानात् नापि परामर्शविषयतावच्छेदकमात्रं तथा सति वस्तुमात्रस्यैवानुमितिहेतुतापत्तेः न चेदं प्रामाणिकं तथा
न्वयव्यतिरेकाद्विरहात् अन्यथा इच्छाशाब्दबोधादिकं प्रति इष्टसाधनताकांक्षादिकुक्षिनिविष्टस्य जगत एव हेतुतापत्तेः न वा वास्तवो
विनिगमनाविरहेऽपि मेयत्वादिना ज्ञानादपि लिंगादनुमित्यापत्तेः व्याप्तिवत्पक्षधर्मत्वेन ज्ञायमानत्वोक्तौ लाघवात्तादृशज्ञानैव हेतु
त्वात् किंच कालान्तरीयतादृशज्ञानविषयादपि लिंगादनुमितिप्रसंगः कारणतावच्छेदकावच्छिन्नकारणसत्त्वस्यैव कार्योत्पत्तिनियामकत्वा
त् न तद्विशिष्टसत्त्वस्य गौरवात् इतोऽपि प्रतिबंधकाभावादीनां कारणतावच्छेदकत्वं परामर्शविशिष्टसत्त्वस्यैवात्र प्रयोजकत्वाभिधाने लाघवा
त् आवश्यकत्वाच्च परामर्शस्यैव तथात्वे तत्र नातिप्रसंगशंकापि अथैवं संयुक्तेन्द्रियादीन्द्रियसंयोगाद्योः कारणतायामपीदमेव विनिगम
कं स्यादिति चेत् स्यादेवं यदि तस्यातीन्द्रियादेः स्वतंत्रान्वयव्यतिरेकौ स्यातां व्यापारेण व्यापारिणो व्यवधाने न चानुमितिमात्रे लिंगस्य
तौ न चातीन्द्रियस्यापि तस्य परामर्शो व्यापारः अपि च चैत्रेण परामृश्यमानलिंगादपरामृश्यतोऽपि मैत्रस्यानुमित्यापत्तिः तत्पुरुषीया
नुमितिं प्रति तत्पुरुषपरामृश्यमानलिंगत्वेन हेतुत्वे चानन्तकार्यकारणभावप्रसंगः इच्छाकृतिसुखदुःखस्मरणविशिष्टज्ञानशाब्दादि
युक्तानेच्छाधर्माधर्मनिर्णयविशेषज्ञानपदार्थज्ञानादीनामिवानुमितौ परामर्शस्याप्यैकार्थ्यप्रत्यासत्त्या हेतुत्वान्नातिप्रसंगशंकापीति
कृतं पल्लवितेन एकान्योन्याभावविशिष्टापरान्योन्याभावादिर्वर्त्तमान एव सर्वत्र हेतुः संभवतीत्यत आह यदि चेति किन्तु प्रागभाववदिति॥ ७१

एतस्य च विरोधि कालावच्छेदेन व्याप्यस्य ग्रहात् तत्कालीनाभावे दूरपरत्ववत्त्वेन धूमप्रागभाववत्त्वादिकं नावच्छेदकमिति चेन्न किं चातः [redacted]
न चैतदपि व्याप्तेर्वह्निव्यत्वनियमात् परिशेषेणात्तस्यैव तथात्वात् अन्यथा धूमादिष्वपि व्याप्तिनामपि धूमत्वादिकमवच्छेदकं न स्या
व्याप्यं त् अपरस्य व्यापकसमानाधिकरणं व्यापकत्वं च तद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छिन्नप्रतियोगिताका
भाववत्त्वादिकं स च विशेषणं धर्मो व्याप्यत्वच्छेदको न तु धूमप्रागभावसमानाधिकरणाभावप्रतियोगितात्वादिकं प्रतियोगितावच्छेद
कं गौरवात् अपि तु धूमसमानाधिकरणाभावप्रतियोगितात्वादिकमेव लाघवात् एवं च न धूमप्रागभावो व्याप्यो न वा तत्त्वं व्याप्यताव
च्छेदकं अत एव प्रमेयधूमत्वादिकमपि नावच्छेदकमिति चेत् गतं तर्हि जातिमत्त्वनियतोपाधिगुरुत्वादीनां व्याप्यत्वेन लाघवेन गोत्वा
दिनिष्ठाभावप्रतियोगितात्वादेरवच्छेदकत्वात् न तु सास्नादिमन्निष्ठाभावप्रतियोगितात्वादेर्गौरवात् अपि च गोत्वादिधर्माणामवच्छे
दकत्वेन आपत्तिं च नीलधूमत्वादेर्व्याप्यतावच्छेदकत्वेन नीलधूमसमानाधिकरणाभावप्रतियोगिताकाभावस्यातिरिक्तत्वात् प्रमेय
गुरु धूमत्वादिनावच्छिन्नव्यापकता [illegible] हत्यादिना व्याप्यत्वमपि लघुरूपसाधारणस्यावच्छेदकस्योपादानेपि कृतं तत्र शुद्ध
सद्वृत्ति तथा चेति तत्रैव कुसुमसामान्यकारणताभावस्य विशेषरूपेण हेतुत्वे यत्र कल्प्यकारणतावच्छेदकमपेक्ष्य न गौरवं अन्यथा
विशेषकारणताविलयप्रसंगादिति भावः धूमकालीनेत्यादि सामानाधिकरण्ये कालविशेषस्यापि संबंधघटकतया प्रविष्टत्वादि

शि
७२ त्यर्थः घटाद्यत्रेति कालिकदैशिकव्याप्तिज्ञानद्वयस्यात्र कालदेशयोः साध्यसिध्यदसत्तिबाधके लाघवादेकमेवास्ति व्याप्तीत्यपि वदंति
पक्षतावच्छेदकेति पक्षतावच्छेदककालाद्यवच्छिन्नमित्यर्थः किंतु व्याप्तीति न च स्मरणात्मकपरामर्शस्थले तदसंभवः तत्र व्याप्तिविशिष्टा
जनक नुभवस्य संस्कारद्वारापि परामर्शहेतुत्वात् फलाजनकव्यापारस्य फलजनकव्यापारत्वे विरोधाभावात् न च विशिष्टपरामर्शत्वेन न करणत्वं
व्याप्तिज्ञानत्वेन च तद्विशिष्टस्मृतिहेतुत्वं न वा तद्विशिष्टस्मृतित्वेनानुमितिहेतुत्वमिति वाच्यं व्याप्तिविषयकज्ञानत्वस्मृतित्वाभ्यां विशिष्टविषय
न ताभ्यां वा हेतुहेतुमद्भावेऽपि व्यापारव्यापारिभावाविरोधात् न हि येन रूपेण द्वारद्वारिणोः फलजनकत्वं तेन रूपेण तयोर्मिथो हेतुहेतु
मद्भावोऽपि नियतो मानाभावात् इंद्रियतत्संयोगपदज्ञानपदार्थोपस्थित्यादिषु प्रत्यक्षशाब्दादिकरणव्यापारेषु व्यभिचाराच्च न चैवं धारा
वहनस्थले पूर्वपूर्वेषां विशेषणज्ञानानामुत्तरोत्तरद्वारा विशिष्टप्रत्यक्षं प्रति करणत्वापत्तिः यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव त
द्व्यापारत्वात् प्रकृते तथा नियमेऽपि न क्षतिः विशिष्टस्मृतेरपि व्याप्तिविशिष्टज्ञानतया विशेषणव्याप्तिविषयकेण पूर्वानुभवेन
संस्कारेणोपजननात् व्याप्तिविषयत्वेनैव कारणत्वादिति तन्न जन्यत्वविशेषितेन संशयसाधारणेन व्याप्तिविशिष्टज्ञानत्वेन तज्ज
न्यत्वात् निश्चयसाधारणेन च व्याप्तिविशिष्टवैशिष्ट्यावगाहिपक्षनिश्चयत्वेनानुमितिहेतुत्वात् यदि च विशिष्टव्याप्तेः प्रथममनु ७२

पस्थितावपि विशेष्ये विशेषणं तत्र च विशेषणांतरमिति विशिष्टपरामर्शादनुमितिः तदा नियतपूर्वोपस्थितिकपदार्थोपस्थितेरेव
कारणत्वं वाच्यं यत्तु परामर्शजनकत्वेन तत्तद्विशेषणज्ञानानां जनकत्वमिति तन्न अन्यं प्रति पूर्ववर्तित्वग्रहे सत्येव तथात्वग्रहेणाप्य
न्यथासिद्धत्वात् न च तत्र फलानुगुण्यं प्रतीतिर्वाच्यं गौरवात् न चैवं भ्रमिजनकत्वलक्षणं दण्डत्वमपि घटजनकतावच्छेदकं न स्यात्
दृष्टत्वात् दंडत्वेनैव तथात्वात् कुत्रचिद्घटानुत्पादे भ्रमिरूपद्वारविरहात् दृढचक्रभ्रमिजननसमर्थात्मसहायचक्रसमवहितात् दंडात्
घटानुत्पत्तौ तत्प्रयोजकताया आवश्यकत्वात् भ्रमिविशिष्टत्वेनैव जनकत्वे चक्रादीनां पृथक्कारणता न स्यात् तस्माद्घटापत्तिर्या दंडे
निरुक्तापत्तिः प्रथमं भ्रमेरूपधानानिर्णयात् अस्तु वा भ्रमिप्रयोजकावयवसंयोगविशेषादिरेव तथा प्रथमोपस्थितत्वादावश्यक
त्वाच्च अन्यथा घटजनकत्वेनैव भ्रमिजनकता किं न रोचते अत एव सौवर्णवैणवादिदंडेषु अनुगतदंडत्वादेरभावेपि न क्षतिः किं
चैवं प्रवृत्तिं प्रतीष्टसाधनताज्ञानजनकत्वेन शाब्दादीनां शाब्दबोधं प्रति तज्जनकाकांक्षादिज्ञानजनकत्वेनानुमानसंस्कारतत्तद्विशे
षणज्ञानादीनां कार्यांतरं प्रति च तज्जनकतत्तत्पदार्थकारणानां तत्तत्कार्यकारणत्वेन हेतुत्वप्रसंगः तज्जनकत्वेन हेतुत्वे तत्वे
नैव हेतुत्वं प्रथमोपस्थितत्वादावश्यकत्वाज्ज्ञापवाच्चेति चेत् तत्किं प्रकृते यातोऽपि पिहितं इदं पुनरपि हादपेयं विशिष्टविषयक
त्वेन कारणत्वे केवलविशेषणादिविषयत्वेन न हेतुत्वं तदवच्छिन्नकार्यजनकतावच्छेदकांतराव्यापकरूपेणैव तदवच्छिन्नं प्रति

जनकत्वात् दर्शयिष्यते च तथान्यथासिद्धत्वं अन्यथा घटत्वावच्छिन्नं प्रति कपालतत्संयोगादीनां जन्यत्वविशेषितेन स्मृद्धेन वा द्र
व्यत्वेन गुणत्वादिना विशिष्टवैशिष्ट्यबुद्धिं प्रति च विशेषणतावच्छेदकविषयत्वेन हेतुत्वप्रसंगात् अनुमितिशाब्दबोधचिकी
र्षादिकं प्रति परामर्शाकांक्षाकृतिसाध्यत्वादिज्ञानविषयविशिष्टविशिष्टत्तत्स्वरूपविषयत्वेन हेतुत्वे नं तत्तत्कार्यकारण
भावप्रसंगाच्च न चात्र कारणं तत्संभवादगत्या परामर्शजनकज्ञानस्य तत्पात्वं कल्प्यते चिकीर्षादिकं प्रत्यपि कृतिसाध्यताज्ञा
नजनकज्ञानस्य तथात्वापत्तेः तत्र मन एव कारणमिति चेत् इहापि तदेवास्तु मनोसाधारणकारणकज्ञानत्वेन मानसत्वापत्ति
रिति चेत् चिकीर्षादिसाधारणतत्कारणकत्वस्यैव ज्ञानत्वविशेषितस्यापि तस्याप्रयोजकत्वात् किं तर्हि मानसत्वप्रयोजकमि
ति चेत् किं नाम प्रयोजकं कारणं चेत् न किंचित् कार्यं चेत् तत्स्वरूपं व्यापकं चेत् प्रमेयत्वादि व्याप्यं चेत् तत्सामग्रीजन्यत्वा
दि तदवच्छिन्नोत्पत्तिनियामकं चेत् तत्सामग्री करणभेदे कथं कार्यवैजात्यमिति चेत् सामग्रीवैलक्षण्यात् यथा मनःकरण
कानामेव चिकीर्षासुखादीनां यथा वाग्निकरणकानां पाकजानां कथं तर्हि प्रमाणविभाग इति चेत् करणविशेषकक्रियावैजा
त्यविशेषादिति विभाव्यतां परे तु व्याप्तिज्ञानत्वेन विशिष्टपरामर्शत्वेन वानानुमितिमात्रं प्रति हेतुता साध्यादिभेदेन व्याप्ति
भेदात् किंतु पक्षज्ञानत्वेन अभावज्ञानत्वेन ज्ञानत्वेन वा पक्षोपि धर्मिमात्रं पक्षताया अननुगमात् तत्तत्पक्षतावच्छेदकवि ७३

शिष्टे वह्न्यनुमितिं प्रति तद्विशिष्टवह्निव्याप्यधूमपरामर्शत्वेन हेतुताया आवश्यकत्वेन वह्न्यनुमितिमात्रं प्रत्यपि तादृशपराम
र्शत्वेन हेतुता गौरवात् किंतु वह्निव्याप्तिज्ञानत्वेन लाघवात् वस्तुतो वह्निज्ञानत्वेनैव तत्वात्किं लाघवात् एवं वह्न्यभावानुमितिं प्र
त्यपि एतेनानुमित्यंतरमपि व्याख्यातमित्यपि वदंतीति कृतं पल्लवितेन॥ ॥केवलान्वयीत्यादि केवलान्वयिसाध्यकादीत्यर्थः
तत्र तेषु मध्ये असद्विपक्षं अत्यंताभावाप्रतियोगिसाध्यकं केवलान्वयी एवमगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकी गृ
हीतान्वयव्यतिरेकिसाध्यकमन्वयव्यतिरेकी व्याप्तिग्राहकसहचारभेदाद्धेतु अन्वयसहचारमात्रग्राह्यव्याप्तिकत्वं केवला
न्वयित्वं तत्र प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वं तादृशसहचारत्वव्यापकप्रकृतव्याप्तिघ
टकसहचारत्वकत्वं वा गृहीतव्याप्तिभेदाद्धेतु प्रकृत[illegible] साध्यकानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यकव्याप्ति
त्वकत्वं तत्त्वं जलं निर्गंधं पृथिवीभावव्यापकाभावप्रतियोगिमत्वादित्यादौ हेतुतावच्छेदिका च व्याप्तिर्न प्रकृतसाध्यकानुमित्यौपयिकी
तद्विशिष्टपक्षधर्मताज्ञानेपि व्याप्त्यंतरबोधं विना निर्गंधत्वानुमि[illegible]त्यनुत्पादादिति ना व्याप्तिः वह्न्यभाववदन्यवह्निव्यापकाभावप्रति
योगिमत्वादित्यादावन्वयव्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिर्न तु सैवेति नातिप्रसंगः अतएवेतरव्यापकीभूताभावप्रतियोगित्वेन वा
यल्लिंगज्ञानं तत्प्रकृतसाध्यानुमितिहेतुः तत्केवलान्वयीत्यपि वदंति एवं केवलव्यति[illegible]रेकित्वादिकमपि निर्वाच्यं अभिधेय

शि
७४ त्वं शब्दशक्यत्वं विपक्षत्वव्याघातो विपक्षत्वासिद्धिः ननु व्याप्तत्वमन्योन्याभावप्रतियोगितावच्छेदकत्वं न च लघुगुरुसाधारण्यं ग
गनादिनिष्ठान्योन्याभावप्रतियोगितावच्छेदकं चेति न व्यभिचार इत्यत आह एवमिति नन्वभावप्रतियोगित्वादिकमभावव्यक्तिभे
देनानैवानुगतव्यवहारस्तु कथं चित् विशेषणतावच्छेदकधर्मानुगमात् एवं च लक्ष्याप्रसिद्ध्या लक्षणासंभव इत्याशंकते
तत्रेत्यादि यत्र हीत्याद्यभ्युपगमवादः वस्तुतो भूतलादिदेशे समये च तस्य वर्त्तमानत्वात् आकाशाभावतुल्यत्वाच्च अभावा
भावस्येति अवधारणं भावत्वात् प्रतियोगित्वात् यद्वा गुरुचार्याः अभावविरहात्मत्वं वस्तुनः प्रतियोगित्वमिति प्रतियोग्येवे
ति प्रागभावादेरत्यन्ताभावरूपत्वनयेपि न क्षतिः तन्मतेऽत्यन्ताभावस्यापि तदभावस्य तथात्वस्यापि प्रतियोगित्वात्
असाधारण इति प्रतियोगितावच्छेदकवृत्तित्वं अपान्योन्याभावात्यन्ताभावसाधारणप्रतियोगितावच्छेदकः संबंध एवा
भावाभावः स च क्वचित् तादात्म्यं क्वचित्संयोगादिरिति चेत् यद्यस्येहि सात्तेय इत्वं न प्रतीयते तदभाववत्त्वं च व्यवह्रियते त
स्यैव तदभावात्मकस्यानुपपत्ते प्रतियोगितदभावबुद्ध्योऽप्यभिपस्तत्वात्मानुभविकं न च तत्संबंध [illegible] वत्त्वे तद्विषयः सं
बंधसंबंधवत्ताबुद्धिवत् क्वचित्संबंधबुद्धिविशेषदर्शनतयाऽप्युपपद्यते न स्वतो मानाभावात् अपसंबंधांतरावच्छिन्नाभा
ववत्तिसंबंधांतरेण प्रतियोगिनो वृत्तेनेनस्याभावविरोधित्वमिति चेत् प्रतियोगितावच्छेदकसंबंधस्याभाववत्तिसंबं ७४

धांतरेण वृत्तेर्नियामकत्वात् संबंधविशेषेण च विरोधित्वं तुल्यमेव अनतिप्रसक्त्यै च स्वप्रतियोगितावच्छेदकसंबंधेनाभावत्वकल्प
नेक्यानुगमसंभावनापीति अधिकरणसंबंधस्यापि प्रतियोगितावच्छेदकत्वात् तद्वत्यभाववविलयप्रसंगो भयतो तद्भावव्य
लोपप्रसंगो वेति लघुत्वं परिष्कुरुते वृत्तिमद्दिस्यादि आकाशस्य तद्वत्त्ताभाववत्त्वमित्यभ्युपगममात्रं भाववत्तितद्भावा
सत्त्वप्रतीत्या हि भावस्य स्वाभावाभाववत्वं कल्प्यते न चेह तथा अभावप्रतियोगित्वं च स्वरूपसंबंध एवेत्युक्तमधस्तात् अभाव
प्रतियोगित्वं च प्रयोजकं एवं च यत्संबंधावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वं यस्य तस्य तेन संबंधेन केवलान्वयित्वमिति सू
चयितुं वृत्तिमद्दिति अत एव ज्ञानस्य ज्ञानत्वस्य च समवायेन ज्ञानविषयतादेश्च अधिकरणसमवायादिना संबंधेनाभावप्रतियोगि
त्वेपि विषयितया परंपरासंबंधेन स्वरूपसंबंधेन च केवलान्वयित्वं संयोगास्यतताभावोपग्रहाय च प्रतियोग्यसमानाधिकरणत्वे
न चाभावो विशेष्यः आकाशाभावोपि च यथा प्रतियोग्यसमानाधिकरणः तथोक्तमधस्तात् वृत्तिमत्तादृशाभावाप्रतियोगि
त्वमिति वार्थः अव्याप्यवृत्तितार्थकं वृत्तिमत्यदमभावविशेषणमित्यपि केचित् तादृशत्वेनाभिधेयस्य केवलान्वयित्वसंपत्तये व्या
प्तिपदखिलमालोकनीयं प्रमाजातीयेति तथा च तादृशाभावप्रतियोगितानवच्छेदकधर्मवत्वमित्यर्थः इदं च प्रतियोगिता

श्री ७५ वत्तावच्छेदकावच्छेदकावच्छिन्नासमानाधिकरणत्वमेवाभाववविशेषणं तेन द्रव्यगुणाभेदयोर्द्वित्वादिना न केवलान्वयित्वं नचैवं वि
रुद्धयोर्धर्मयोर्द्वित्वेन केवलान्वयित्वापत्तिः तदावच्छिन्नाधिकरणाप्रसिध्या तदवच्छिन्नाभावे प्रतियोग्यसामानाधिकरण्यस्यासंभ
वादिति वाच्यं तादृशधर्मावच्छिन्नस्य यत्किंचिदधिकरणवृत्तिवृत्तितया अपि विवक्षितत्वात् क्वचिदप्यतादृशोभयवत्वाप्रती
तेस्तस्यानभावत्वात् संदिग्धसाध्यकत्वं पक्षत्वमित्याशयेन शंकते तथापीति अस्तित्वसाध्यस्य घटवृत्ति[illegible]साध्यस्य साध्यसि
द्धिविरोधि साध्यसिद्धिनिवर्त्यत्वर्थः विशेषणविशेष्यभावभेदेपि च विरोधिविषयतामात्रेण प्रतिबंधकत्वमनुभवबलाद्दृष्टी
यते नहीदं साध्यवदत्र वा साध्यमित्येकतरनिश्चये अत्र साध्यं न वेदं साध्यं न वेत्यन्यतरः संदेह इति पक्षनिष्ठेत्यादि पक्षनि
ष्ठाभावप्रतियोगित्वज्ञानविरोधिज्ञानस्य साध्यसाधकत्वेन कथंचित् साध्यसिध्यनुगुणत्वेन पक्षनिष्ठाभावप्रतियोगित्वज्ञाना
भावस्य वा साध्यसाध्यसाधकत्वेन तदभावस्य तस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वज्ञानस्य साध्ये पक्षनिष्ठाभावप्रतियोगि
त्वावगाहित्वेन साध्यविशिष्टपक्षज्ञानविरोधित्वेन वा स्वरूपेणाभावस्य योग्यतात्वात् व्यतिरेकः विपक्षे हेतोरभावः व्यति
रेकव्याप्तौ साध्याभहेत्वभावयोर्व्यतिरेकौ साध्यहेतू तयोर्व्याप्तौ अत्र वदंति साध्याभाववदवृत्तित्वमेव व्याप्तिर्लाघवात्
प्रायशः साधनभेदेप्यभेदाच्च यत्संबंधावच्छिन्नसाध्याभाववद्वृत्ति हेतोरवृत्तित्वं गृह्यते तेन संबंधेन साध्यसिद्धिः फलं साध्या ७५

भाववृत्तियेन संबंधेन हेतोर्वृत्तिलिंगस्यतेन संबंधेन पक्षधर्मताधीः कारणमिति नातिप्रसंगः आकाशादेस्तथात्वेपि पक्षधर्मता
ज्ञानविरहान्नानुमितिः निविशतां वा तत्र साध्यसामानाधिकरण्यं वृत्तिमत्वं वा अथ साध्याभाववदवृत्तित्वं तद्वृत्तिभिन्नत्वादिरू
पं व्यभिचारज्ञानविरोधिज्ञानविषयत्वेनानुगमनीयं तच्च व्यापकसामानाधिकरण्यसाधारणमिति चेत् स्यादेवं यदि व्यापक
ताज्ञानं व्यभिचारबुद्धिं विरुंध्यात् नचैवं वह्न्यभाववद्वृत्तिर्धूम इति ज्ञाने हि वह्नित्वस्वरूपेण प्रतियोगित्वं तदवच्छेदकत्वं च संबं
धमर्यादया भासते धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यत्र वह्नित्वत्वेन वह्नित्वे प्रतियोगितास्वविशि
ष्टतदवच्छेदकत्वस्य विशिष्टाभाववृत्ति विषयविरोधविरहात् विशिष्टस्य वह्नित्वस्यावच्छेदकत्वेन प्रकारांतरानुसरणेच
सुतरां मणिमंत्रादिन्यायेन च प्रतिबंधकतायां मानाभावात् व्यापकताज्ञानादेवानुमितिरिति चनानुभविकं न वा यौ
क्तिकं ज्ञानत्वसत्वादिना ज्ञानत्वादेर्व्यापकतावच्छेदकत्वग्रहे ज्ञानादिमानित्यनुमितेरयोगात् अन्यथाजातित्वेनानुभव
त्वव्यापकगुणत्वव्याप्यजातित्वादिना वा तथात्वग्रहेपि तत्प्रसंगात् एतेन केवलान्वयिसाध्यकत्वं सा नमेवानुमिति
मात्रहेतुरित्यपास्तं सर्वजनानुभवसिद्धानुमितिभावे धूमादिदर्शनानंतरं आद्यमानेग्रहणमाणव्यतिरेकवन्नादिना

शि
७८ नेअसंभवाच्च प्रमेयत्वादेर्घटादिवृत्तित्वे केवलान्वयित्वेन कथं वह्नित्ववृत्तिधर्मव्यापकत्वेन वानुमेयं न तु ज्ञेयत्वादिहेतुका
तदनुमितिरनुभवविरुद्धा एवं साध्याभावव्यापकाभावप्रतियोगित्वमपि नानुमितौ विधेयं गौरवात् व्यभिचारज्ञानाविरोधि
त्वाच्च वह्न्यभावसमानाधिकरणाभावप्रतियोगिधूमाभाव इति ज्ञाने धूमाभावाभावत्वेन तत्र वह्न्यभावसामानाधिकरण्य
बुद्धिः कदाचिद्विरुध्यात् न तु धूमत्वेन भिन्नप्रकारत्वात् व्यतिरेकव्याप्तिज्ञानाधीना च नानुमितिः तत्त्वेनाननुभवात् कुत्रकारणा
भावाच्च सामग्रीभेदकल्पनायाश्चानुभवैकाधीनत्वात् किंतु विजातीयात् करणमपि प्रमाणांतरं अर्थापत्तिरेव कुत्रप्रमा
णद्वयसमाहारसमशीलं च युगपदन्वयव्यतिरेकिधर्मद्वयप्रतिसंधानं अपनिर्णीतिविना सिद्धौ ह्यर्थापत्तेरनुत्पाद्यस्य पक्षता
जन्यत्वात्तस्याप्यनुमितिः लाघवेन पक्षताजन्यत्वस्यैवानुमितित्वे प्रयोजकत्वात् न चैवं पक्षताप्रत्यक्षेपि तत्त्वापत्तिः इष्टासत्त्वे
पि कालांतरे प्रदेशांतरे च तद्विरहसत्त्वेन एककालीनत्वाद्यतीन्द्रियघटितप्रतियोगिकत्वेन तस्यातीन्द्रियत्वादिति चेन्न अनु
मितावेव पक्षताया हेतुत्वस्य निरस्तत्वात् साध्यादिभेदेनाननुगतत्वात् तज्जन्यत्वस्याप्रयोजकत्वात् प्रयोजकत्वे च न तज्ज
नकत्वं असंभवात् न व्याप्यत्वं मानाभावात् दुःखादेरसकृदावेदितत्वात् एतेन व्याप्तिज्ञानादिजन्यत्वमनुमितित्वे प्रयो ७८
जकमित्यपि परास्तं साध्याभावव्यापकाभावप्रतियोगिधर्मत्वेन साध्यव्याप्यत्वानुमानात् प्रसिद्धसाध्यकैवानुमितिरित्यपि

केचित् अणपयन्साध्य[illegible]भाववत्तिधूमादेः समवायेन तंतुत्वाद्यभाववत्ति च पटादेः संयोगेन वर्तमानत्वात् साध्याभा
ववत्तिसंयोगेन समवायेन वा वर्तमानत्वस्य विशिष्यैवाभावो वाच्यः तथाच जलत्वजातिमत्त्वगुणवत्त्वात् गुणवत्त्वं च पटादिस्यादिकं
विलीयेत जातिगुणाभाववत्तोः समवेतत्वसंयोगत्वयोरप्रसिद्धेरिति चेत् उपदर्शयत्तदपि केवलान्वयिनः सरणिं स्वीकृत्य
स्वाधिकरणावृत्तिसाध्याभाववत्त्वमेव व्याप्तिः स्वत्वाननुगमस्य प्रागेव स्वहस्तितत्वात् एतेन नीलेतररूपवान्नीलसमवेत
त्वे सति गोत्वादिकं विलीयेत विशेष्यस्य व्यभिचारित्वात् विशिष्टस्यानतिरिक्तत्वादिति परास्तं साध्याभावस्य विशिष्टहेत्वधिकर
णावृत्तित्वात् परंपरासंबंधेन विशेषणासंबंधस्यैव वा तत्र हेतुत्वादिति॥ ॥व्याप्तिग्रह इति साधारणोक्तिः तत्र केवलान्वयिन्य
भावाच्च साध्यव्याप्यत्वं तद्वदन्यावृत्तित्वं ततः साध्य एव प्रसिद्धं निरुपाधीति उपाधिज्ञानाहितव्यभिचारज्ञाननिरासाय
पृथिवीत्वमिति पृथिवीत्वमितरभेदव्याप्यमित्यत्र हि पृथिवीत्वविशिष्टे पृथिवीत्वेइतरभेदसामानाधिकरण्यं भास
ते पृथिवीइतरभिन्नेत्यत्र तु पृथिवीत्वविशिष्टेतदवच्छेदेनेतरभेद इति न सिद्धसाधनमित्यर्थः सर्वेति पृथिवीत्वस्याव
च्छेदकत्वस्फोरणाय अत्र च पृथिवीत्वं पृथिवीत्वसमवेतत्वमात्रं न तु पृथिवीवृत्तित्वघटितमित्यतोपि नोपनयवैयर्थ्यं
अथान्वयव्याप्तिघटकतावत्पदार्थोपस्थित्यादिकं विना न तद्ग्रहसंभवः तत्सत्वे च तत एव व्याप्तिग्रहसंभवे व्यतिरेकसहचा

७७ र्त्वानस्य हेतुत्वेमानाभावः न च व्यभिचारशंकानिवर्त्तकत्वेनैवान्वयव्यतिरेकसहचारग्रहयोरुपयोगित्वं तद्ग्रहेपि शंकाना
दवस्थानात् अधिकरणविशेषे च तन्निवृत्तौ साध्यवत्त्वसाधनाभाववत्त्वयोरन्यतरग्रहस्यैव तंत्रत्वात् व्यतिरेकव्याप्त्युपन्यासे
अर्थांतरतोदवस्थानात् यत्तु सहचारमात्रत्वाभावेपि सर्वत्रोदाहरणोपन्यास इति तन्न अर्थांतरव्यापत्तेर्दुर्वारत्वात् यच्च कृदि
वैयर्थ्याच्च वृत्त्यादध्यिष्यते च तस्य व्याप्तिबोधकत्वं न चान्वयिनइव व्यतिरेकिणोप्युदाहरणात् स्वरसिद्धान्वयव्याप्तिधीरनु
भविकीयेन तद्दर्थमपि प्रकांतरमास्थेयं मतआह यद्वेति साध्याभावेति न च विशिष्टोत्साध्ये आत्मत्वादेर्व्यतिरेकित्वं न स्यात् स्या
त्संयोगादेरात्मत्वे तथात्वमितिचेन्न साध्यतावच्छेदकावच्छिन्नसाध्यासमानाधिकरणत्वेन साध्याभावस्य साधनतावच्छेदका
वच्छिन्नसाधनासमानाधिकरणत्वेन च साधनाभावस्य विशेषितत्वात् संयोगाभावे साध्ये विभागाभावः केवलान्वयि प्रतियोगिवै
यधिकरण्यावच्छेदकावच्छिन्ने च तत्र तादृशो व्यतिरेकव्यपि व्याप्यव्यापकभावः साध्याभावत्वसाधनाभावत्वाभ्यां बोध्यः तेन न व्यभि
चारिण्यतिप्रसंगः साध्याभावत्वादिकं च वैज्ञानिकं न तु वास्तवं तेन मेयत्वाभिधेयत्वयोः व्यतिरेकव्याप्तिभ्रमादनुमानं व्यापकीय
त्वेनाभावस्य ज्ञानात् व्याप्तीयत्वेनाभावस्य सिद्धिः पुनरप्रसिद्धसाध्यकसाधारणीत्याह व्यापकाभावेनेत्यादि अभावे अभावनिश्च ७७

यो ऽवश्यंभावव्याप्तिप्रतिबंधके ऽत्र च यद्धर्मावच्छिन्नं प्रति व्यापकताग्रहस्तेन रूपावच्छिन्नीयत्वेनाभावसिद्धिः फलं येन रूपे-
ण व्यापकताग्रहस्तेन रूपावच्छिन्नीयत्वेन व्यापकत्वविशिष्टतत्तद्रूपावच्छिन्नीयत्वेन वा ऽभाववत्ताज्ञानं हेतुरिति मंतव्यं व्यापकप्र-
तियोगिकस्याभावस्यातिप्रसक्तत्वाच्च व्यापकत्वावच्छिन्नप्रतियोगिताकस्य च संबंधविशेषावच्छिन्नस्य संभवतोपि असार्वत्रिकत्वात्
कारणानुगमः परं चिंतनीयं एवं च वन्हिर्धूमव्यापको वन्ह्यभाववांश्चायमिति ज्ञानात् धूमव्यापकवन्ह्यभाववानयमिति ज्ञानाद्वा नि-
र्धूमोयमितिधीरिति धूमव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववानयमिति ज्ञानादित्यपि केचित् व्याप्तिज्ञानस्येति अत्र
व्याप्तिपदेनान्वयव्यतिरेकव्यापकताग्रहनियतविषयताकोर्थोभिमतः पक्षस्य पक्षतावच्छेदकस्य वा ज्ञानमनुमितिमात्रहेतुरित्य-
पि वदंति अन्वयीति अन्वयिनि ताद्रूप्येण वन्हित्वादिना व्यतिरेकिणि तु इतरप्रतियोगित्वेन वन्ह्यभावादिनिषेधनतया सिद्धिरित्यनु-
भवसिद्धः कार्यगतो विशेषः कारणविशेषजन्यतावच्छेदको ऽत एव व्यतिरेकिणि सर्वत्र तस्मान्नत्वेत्येव लिंगमनशरीरं अ-
न्वयिना वन्ह्यभावेन धूमाभावसिद्धौ धूमाभावत्वं प्रकारः व्यतिरेकिणि तु तत्सिद्धौ प्रसक्तइत्वप्रतियोगितया धूमः प्रकार इति वदं-
ति इत्थं च ह्रदो धूमाभाववान् न वा पर्वतो वन्हिमान्न वेति जिज्ञासायां विप्रतिपत्तावुद्देश्यायाः साध्यतावच्छेदकरूपेण साध्यवत्ता

अथर्वं

श्रि

७४ प्रतीतेरनुपयोगिनोऽतिरिक्तस्योदाहरणादेः कथमवतार इति विचारणीयं केचित्तु अन्वयव्याप्तिज्ञानानन्तरं स्वादिकमेवानन्यगतिकत
याऽनुमितावपेक्षितमित्याहुः अन्यतरत्वेन तादृशपरामर्शयोः कारणत्वमित्यपि कश्चित्॥ ॥ ॥ आनुपूर्वीकप्रतिज्ञादिपंचक
समुदायत्वं न्यायत्वं प्रतिज्ञात्वादिकं पुनरुदाहृतान्यतरवारकं न्यायान्तर्गतत्वमप्यमेयोपादेयमिति तेनान्योन्याश्रयः साध्यादिविशेषनियं
त्रिताश्च प्रतिज्ञाद्वयोर्वोदुर्व्याद्युक्तिनभिन्नसाध्यकादिप्रतिज्ञादिसमुदायेऽपि अतिव्याप्तिः व्याप्त्यादेरपि यसाध्याद्यननुगमात् अननुगमो
न्यायादेरपीत्यत एव एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवयोश्च नसंभूयैकार्थप्रतिपादकत्वं प्रागेव तु पंचानामवयवानां प
रं तु प्रतिज्ञाहेत्वोः कथंचिदुपनयनिगमनयोः एकवाक्यताव्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण तादृशपरामर्शप्रयो
जकत्वं वयदि तद्विषयतत्तत्स्वार्थोपस्थापकतया तदोदाहरणोपनययोरेव तत्संभवस्यात्ति अथ तदानुकूल्यमात्रेण तदा को वन्हिमा
नुपर्वतो वन्हिमान् कुतो धूमादित्यादेरपि तथात्वमित्यादिकं समाहितं अवयवत्वं तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञाद
घटकत्वे सति उभयघटकभागद्वयाघटितत्वं वा वक्तव्यं उभयं च प्रतिज्ञाहेतू हेतूदाहरणे उदाहरणोपनयौ उपनयनिगमने इति वि
शिष्यवक्तव्यमिति प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकज्ञानपंचकान्यतमज्ञानजनकवाक्यत्वं तत्त्वमित्यपि कश्चित् तस्यैवेत्ति ७८
तथा च तादृशज्ञानेनैव साधकाभाव इति भावः बाधकमप्याह अन्यथेति न्यायजन्यज्ञाने पंचावयवजन्यत्वात्संच द्वित्वादिजन्ये च द्वित्वा

त्वा एकैकजन्ये चैकैकाजातयः इति संकर इत्यर्थः तत्र तत्र भिन्नाजातिकल्पने च सुतरां मानाभाव इति भावः केचित्तु यद्दिव्यानुगतकारणतां
नरेणापि तादृशजातिमत्त्वसंभवस्तत्र कदाचित्तृणादिजन्येपि हेत्वादिजन्यवृत्तिर्हेत्वादिजन्ये च वृत्तिस्तादिन्यवृत्तिजातिः स्यादिति संक
र इत्यर्थः एवं सर्वस्य सर्वजातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः साध्यनिर्देशः प्रतिज्ञेति सूत्रं साध्यो विधेयधर्मविशि
ष्टो धर्मी तथा च पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदकवह्नित्वादिविशिष्टवैशिष्ट्यावगाहिज्ञानजनको न्यायावयव इति
पर्यवसितोर्थः उदाहरणाद्य साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानं न पक्षतावच्छेदकविशिष्टे उपनयाद्य पक्षतावच्छेदकविशिष्टे
न साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमिति तयोर्व्युदासः किंत्वित्यादि प्रकृतन्यायबहिर्भूतवाक्यवारणायप्रस्त्यंतं प्रकृतन्याया
वयवत्वपर्यवसितार्थकं उद्देश्येति प्रकृतेत्यर्थः वह्निसाध्यकन्यायोपनयस्य वह्निव्याप्यधूमसाध्यकानुमित्यन्यूनानतिरिक्तविष
यकज्ञानजनकस्य वारणाय प्रकृतद्वयं तथा च यादृशसाध्यपक्षकन्यायावयवत्वं तादृशसाध्यपक्षकानुमित्यन्यूनानतिरिक्तवि
षयकशाब्दज्ञानजनकत्वं पर्यवसितार्थः धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ अनतिरिक्तविषयकज्ञानजनकस्य हेतो
र्वारणायान्यूनेति निगमनवारणायानतिरिक्तेति यद्यपि निगमने साक्षात्पक्षवाचकपदं न श्रूयते तथापि न्यूनताभंगायोपन

शि ७१

पस्यायमादिपदस्यानुषंगात्तथा बोध्यं इत्थमेव च प्रसक्तापत्तिप्रसक्तिं निगमनं चेत्यादिना विशकरिष्यति तदर्थं च निगमनमन्यूनानतिरि
क्तविषयकज्ञानजनकः स च परामर्शहेतुर्येन निरुक्तन्यायावयवत्वं प्रतिज्ञात्वं तदपि व्याप्नुयात् अयापित्तसादेस्तद्बोधोपैकविशिष्ट
हेतुसंबंधस्य च बोधकतया तस्यातिरिक्तविषयकज्ञानजनकत्वादिति यत्तु पृथिवी पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र यत्र
पृथिवीतरेभ्यो भिद्यते तत्र पृथिवीत्युदाहरणवारणाय तदिति तत्तुच्छं तेन पृथिव्यामितरभेदस्याविषयीकरणात् तात्पर्यभ्रमे
णतादृशबोधजनकत्वस्यातिप्रसक्तत्वात् न च तावताप्युदाहरणस्य तथात्वसंभवो यत्रेत्यादिरनन्वयात् यदि च निगमने नायमा
दिपदं निविशते वाक्यैकवाक्यतयैव विशिष्टलाभादिति विभाव्यते तदा हेतौ साध्यसामानाधिकरण्यभाने सामान्यतः पक्षे साध्यव
त्त्वभानात्पक्षे हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताबोधकस्योपनयस्य यत्र च पक्षसाध्ययोः ताद्रूप्येण दृष्टान्तहेतु
भ्यामुपन्यासस्तादृशसिसाधयिषया च न्यायप्रयोगस्तत्रोदाहरणोपनययो यत्र वा पर्वतत्वावच्छेदेन साध्यसिद्धेरुद्देश्यतायां एतत्त्व
वेत्त्वादिना दृष्टान्तस्योपन्यासस्तत्रोदाहरणस्य सत्त्वं तस्य वा अवयवाघटकन्यायांतर्गतत्वपरतया हेत्वंतस्य अयमादिनिगमनां
त्तभागस्य च वारणाय तत् यद्यपि सर्वमभिधेयं प्रमेयमित्याद्यव्यतिरिक्ताप्रसिद्धिः न च केवलप्रसिध्या प्रमेयं न वेति विप्रतिपत्तिः संश ७१
पस्य चायोगात्तादृशी प्रतिज्ञा प्रकृतानुमितिविषयतासमव्याप्तविषयताकत्वं प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा

वह्निव्याप्तिरिति वाच्यं सकलाभिधेयवृत्तिधर्मवत्त्वकेवलाभिधेयेयनिष्ठात्यन्ताभावाप्रतियोगिआकाशाभाववद्वृत्तिद्रव्यमित्यादौ विशिष्टपक्ष
बोधके उपनयेऽतिव्याप्तेः तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयत्वं तदन्यूनविषयत्वं प्रकृतपंचम्यर्थपक्षकप्रतिज्ञादिस्थ
लेतु पक्षे प्रकृत्यर्थस्य वैशिष्ट्यबोधको हेतुर्नतु प्रकृतसाध्यस्य तादृशविषयताविलक्षणविषयतान्यूनत्वं प्रकृतहेतुकप्रकृतसाध्य
सिद्ध्यौपयिकव्याप्तिविषयत्वं वा तदनतिरिक्तविषयत्वं वह्निव्याप्यालोकवत्सधर्मा पर्वतो वह्निमान् धूमात् इंधनव्याप्यधूमवान् पर्वतो
वह्निमान् धूमादित्यादौ तस्याः संग्रहाय प्रकृतहेतुसाध्ययोरुपादानं वह्निव्याप्यधूमवान्पर्वतो वह्निमान् धूमात् सत्ताव्याप्यद्रव्यत्वव
द्द्रव्यं सत्तावद्द्रव्यत्वादित्यादिकस्तु नप्रयोगः विशिष्टपक्षोपस्थापकादेव तादृशव्याप्तिप्रतीतावाकांक्षादिविरहेणोदाहरणानुत्थाना
दिति अन्यथातिप्रसंगात् अत एवानैकदेशभयव्याप्त्युपन्यासोऽपि यद्वित्थायं मैत्रः पचति अयं गौरित्यादेरेव प्रतिज्ञायायथोपवर्णित
विशिष्टज्ञानजनकत्वं तादात्म्येन गोः साध्यत्वात् गोत्वाद्यनुपस्थित्यागोत्वादेः साध्यत्वानुपपत्तेः पदार्थतावच्छेदकजातौ हेत्वर्था
न्वयायोगाच्च अयं वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वह्नेः संयोगात्मकः संबंधो भासते तथैव वह्निव्याप्यधूमवानयमित्याद्यु
पनयसंगमात् शाब्दज्ञाने तु वह्निमतो भेदः अतो भिन्नाकारत्वं एवं भेदे साध्येऽपि यत्र भिन्नमित्याद्यावपि वैलक्षण्यमिति सूक्ष्म
मीक्ष्यते तदा यादृशपक्षसाध्यकाः पक्षे यादृशविशिष्टार्थवत्त्वबोधिकाः प्रतिज्ञाः संप्रदायसिद्धाः तादृशानां बोधानामन्यतमेना

शि
८०

प्यनिवर्तनीयस्यसंशयस्यअनिवर्तकोयः तावतां बोधानामन्यतमो यो बोधः तज्जनकत्वं वाच्यं एवं च तादात्म्येन गवि साध्ये पक्षे गवा
गे भेदस्य संयोगेन समवायेन च वन्हौ वन्हिमद्भेदस्य समवायेन पाकवृत्तौ पाककृतिमत्त्वस्य पाककर्त्रभेदस्य विशेषणतया तत्तद्रूपे अभावे हे
तुतरभेदवत्त्वस्येतरान्याभेदस्येतरभेदवत्त्वस्येतरभिन्नाभेदस्य च बोधाविशिष्टव्यक्तिव्यावृत्तिदिक् तावद्बोधानिवर्त्यसंशयानि
वर्तकतावद्बोधनिवर्त्ययावत्संशयनिवर्तकबोधजनकत्वं वाच्यमित्यपि कश्चित् चैत्रः पचति घटो नेतराणीति प्रतिज्ञायां सा
ध्ये विषयित्वानुयोगित्वयोः संबंधविधये वानुप्रवेशात्तयोः प्रदर्शितसाध्यगमकतौपयिकव्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे
उपनेयत्वात्तथा चायमिति आकारः सुवच एव प्राचामुपनयः नव्यानां पुनरनन्यगतिकतया तद्व्याप्यहेतुमान् तद्वान्वे
त्याकारः योग्यतावशात्तदा साध्यस्य तद्व्याप्यस्य वा परामर्शः केचित्तु वन्हिमान्नवेति विप्रतिपत्तौ संशये च वन्हिमत्तदन्योन्या
भावयोः तादात्म्यविशेषणत्वाभ्यां कोटित्वेन जिज्ञासितत्वात् तादात्म्येन वन्हिमानेव साध्यमित्युपचितो न तु वन्हिरजिज्ञासि
तत्वात् तथा च तथा चायमि त्याकारको वन्हिमद्व्याप्यधूमवांश्चायमित्याकारको वा उपनयो न तु वन्हिव्याप्यधूमवांश्चाय
मित्याकारकोऽर्थान्तरत्वादिति प्राहुः यत्र चांतरा तादृशबोधो न जातः तत्रापि तादृशाकांक्षायोग्यताशालित्वरूपं तज्ज ८०
नयोग्यत्वमक्षतं तच्चाभग्नव्याप्तिविशेषोपस्थापकशाब्दवाक्यपदयोरुपसंदानादेवेति अन्यूनेत्यादि तथा चोद्देश्यानु

मितिसमानविषयकलिंगादिविषयकशाब्दज्ञानजनन्याथावयवत्वादिहेतुके वोदाहरणस्यवारणाय समानविषयकांतं पक्षवि
शेष्यकांतं च उपनयवारणाय लिंगाविषयेति यद्यपि प्रकृतलिंगाविषयत्वं पृथिवीइतरेभ्योभिद्यते पृथिवीत्वात् गंधवत्त्वात् तथा
गंधादित्याद्यव्यापकं नचात्रोपनयासंभवः इदमागंधवत्त्वेन परामृष्टे हेतुभूतगंधवत्त्वान्वयप्रयोगादित्ति वाच्यं साध्याभा
वव्यापकगंधाभावाभावत्वेनान्वयात् अतएव व्यतिरेकिलिंगनिचनेयं पृथिवीत्यादिः प्राचां प्रयोगः यद्विचदंडवान् दंडवानि
त्यादिप्रयोगो नानुपपन्नः तद्विशिष्टे भूतद्विशिष्टान्वयस्ये वायुसन्नत्वादित्यभ्युपेयत्वेन तदानानुपपत्तिः गंधोपि पक्षाविशेष
णत्वेन तद्विषयत्वं चायं वह्निमान् वह्नेरित्यादौ पक्षाविशेषणत्वेन साध्याविशेषणत्वेन च तद्विषयत्वं इत्थं द्वयं द
ध्वः प्रमेयत्वमभिधेयं प्रमेयत्वात् गोत्वाभावेन सास्नावान् गोत्वाभावादित्याद्यव्यापकमतिव्यापकं चोपनयस्य तथापि पक्ष
तावच्छेदकविशिष्टे पक्षे पक्षसाध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वं तद्बहिर्भावेन लिंगविषयत्वाभावो वाच्यः वस्तु
तो लिंगं लिंगत्वं तथा च प्रकृतहेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतोपेकं यद्व्याप्तिविषयत्वं त
च्छून्यत्वमर्थः तच्च हेतौ साध्यव्याप्यतावगाहित्वं हेतुभूताभावप्रतियोगितावच्छेदकावच्छिन्नसाध्याभावव्यापकतावगाहित्वं च
द्रव्यत्वव्याप्यसंगवद्वृत्तिधर्मवानयं द्रव्यत्ववान् गुणात् गुणव्याप्यरूपवानयं स्पर्शवान् रूपादित्यादौ प्रतिज्ञासंग्रहाय वच्छे

शि
८१ दकद्वयोपादानं अन्यूनानतिरिक्तपदमिति चमूलयुद्धेश्यानुमित्यन्यूनानतिरिक्तविषयभागपरं हेतुत्वमभिधेयमेयत्वादित्यादौ पंच
म्यर्थपक्षकहेतुवारणाय पंचम्यंतान्यत्वस्य हेत्वन्यत्वस्य वा अवयवं वाच्यत्वात् संख्यातिरिक्तत्वं पंचम्यर्थस्य प्रादिपत्तिकार्थे विशेष्यत्वेनैवा
न्वयात् प्रादिपत्तिकार्थयोः क्रियाप्रादिपत्तिकार्थयोरभेदेन साक्षादन्वयस्याव्युत्पत्तेर्वक्ष्यमाणत् चैत्रस्येदं न मैत्रस्य मैत्रस्येदं न चैत्रस्य
द्वयोरिदं नेदमेकस्यापीत्यादौ चैत्रादिसंबंधाभावबोधस्य विनाविभक्त्यर्थविशेष्यतामनुपपत्तेः चैत्रो न पच्यतीत्यादौ तिङर्थस्येव वि
नाप्यनुयोगिनिसप्रमीसंबंधस्याप्यभावान्वयात् हेतुविषयकज्ञानजनकत्वव्याप्यावयवतावच्छेदकस्य शून्यत्वेऽप्युदाहरणा
न्यायावयवत्वं तत्त्वं तादृशान्यावच्छेदकं हेतुत्वादिकमिति केचित् हेत्वभिधानेति जिज्ञासाजनकत्वं तद्योग्यता वाक्यत्वं न्यायावयव
त्वं लिंगेत्यादि लिंगाविषयेति पूर्वोपदर्शितार्थकं अभावहेतुकव्यतिरेकिण्युदाहरणावारणाय लिंगीति लिंगिसाध्यं तर्हि
षयं तद्बुद्धिविशेष्यकं तेनेदं जलं निस्नेहत्वप्रकारकप्रमाविषयत्वशून्यत्वात् इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वा
दित्यादौ यत्तज्जलं तन्निस्नेहत्वप्रकारकप्रमाविषय इत्युदाहरणे नातिप्रसंगः लिंगाविषयेत्यस्य पूर्वोक्तव्याप्यविषयार्थकत्वे
नु हेतुवारणाय लिंगीति लिंगविषयत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयता बहिर्भावेन वाच्यं तेन
वह्निमान् वह्निसामग्रीमत्त्वात् अयं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रमीयमानत्वात् इत्यादौ हेतौ नातिप्रसंगः लिंगविषयकज्ञानज ८१

नकत्वानियतलिंगविषयकज्ञानजनकत्वनियतावयवतावच्छेदकरूपवत्त्वं तत्त्वमित्यादिकं तु तादृशावयवतावच्छेदकरूपाननुगमात्परिच-
ये दुर्ग्रहत्वादनुपादेयं अनुमितीत्यादि जनकान्तं न्यायावयववाक्यार्थकं निगमनवारणाय साध्याविषयकेत्यादि साध्यविषयत्वं च प्रकृतहे-
तुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयताबहिर्भूतत्वेन पूर्वोपदर्शितसाक्षात्त्वं परासाधारणप्रकृतपक्षविशेषणत्वेन वा
तेन पूर्वोदर्शितहेतौ नाव्याप्तिः अभावसाध्यके इदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वात् अयं न धूमादालोकवान् आर्द्रेन्ध-
क नशून्यत्वादित्यादौ व्यतिरेक्युदाहरणस्य हेतुत्वपक्षसाध्यान्वितस्वार्थबोधकेदंपदशालिन उपनयस्य च वारणाय हेतुः विभ-
क्तिमदिति तदर्थश्च प्रकृतसाध्यान्वयबोधसमार्थोपस्थितिजनकहेतुविभक्तिमत्त्वं हेत्वित्तिसंपातायातं यद्विच पर्वते पर्वत-
भिन्नत्वप्रकारकज्ञानस्य विशेष्यतयाभाववत्साध्यत्वं हेतुत्वं च सिसाधयिषया च न्यायप्रयोगः तत्र च पक्षतादृशज्ञानाभावाद-
त्यन्तं ज्ञानमिति दृष्टान्तशालिनि व्यतिरेक्युदाहरणे अतिव्याप्तिरित्युच्यते तदा अवयवान्तरोपस्थितार्थान्वितस्वार्थबोधकवि-
भक्तिमत्त्वं वक्तव्यं उदाहरणान्यत्वेन वा विशेषणीयं केचित्तु साध्यविषयकज्ञानजनकतानियतहेतुविभक्तिमत्त्वनियतावयवता-
वच्छेदकरूपवत्त्वं समुदितलक्षणार्थ इत्याहुः तच्चिन्त्यं हेतुत्वप्रतिपादकेति विभक्त्यर्थहेतुत्वविशेष्यकान्वयबोधजनकन्याया-
वयवत्वमर्थः हेतुत्वं प्रमेयमित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति तस्मादितरेभ्यो भिद्यते इत्यादिनिगमनवारणाय हेतुत्वेति

पि ८२ विशेष्येति च घटो दंडमत् वह्निर्धूमात् इत्यादिकाच न प्रतिज्ञा तदृष्टांतदा स न भवत उभे व्यापकत्वायोगात् संप्रदायविरोधाच्च तेन तत्रस्य
निगमनेनातिव्याप्तिरिति भावः उदाहरणेति क्वचित् जिज्ञासानुत्पादेपि न योग्यतासत्त्वान्नाव्याप्तिः अनुक्तोदाहरणस्थलेपि तादृ
शयोग्यतासत्त्वान्न हारणमन्यायावयवेति उदाहरणं चेह न्यायगर्भं वैयर्थ्यात् साध्याविषयेत्यादि अयं न दंडात् दंडसंयोगाज
न्य इद्धत्यादित्यादौ प्रतिज्ञानिगमनयोर्वारणाय साध्याविषयेत्यादि व्याख्यातार्थं उपनयविशेषवारणाय हेतुपंचम्यंतेति हेति
त्ति हेतुत्वबोधकार्थकं हेतुपंचम्योर्वैकल्पिकमपादेयत्वे उपनयस्य चांते अनुसंधीयमानाप्रपमैयांतः एवं दंडादित्यादेः स्वपर
स्यापि दृष्टांतस्य पंचम्यंतत्वे अन्वयायोगात् कस्यचिदतिरेकिणः उदाहरणस्य पंचम्यंतत्वसंभवेपि तद्वारणं पूर्ववत् अत्र चार्थ
वत्त्वागस्य पंचम्यंतत्वं बोध्यं तेन निरर्थकत्वसिलंत वह्निप्रमात् इत्यादौ नाव्याप्तिः एवं पंचम्यादेस्तु सिद्धादेशवादिनां नयेत्तु नानु
पपत्तिर्गंधोपि केचित्तु हेतुपंचम्यंतत्वं हेतुत्वप्रतिपादकपदशालित्वं पूर्ववत् साध्याविषयकज्ञानजनकत्वं चेतरनैरपेक्ष्येणाप्र
कृत हेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकत्वं साध्यं चेह न विवक्षितं वैयर्थ्यादित्याहुः पंचम्यंतेति अनुमितिपरवाक्यत्वम
वयवत्वं हेतुत्वादौ पंचमीलाक्षणिकी वृक्षाद्विजत्ते इत्यादौ लाघवेनावधित्वे अवधिमत्त्वे वाशक्तत्वात् द्रव्यनिष्ठमवधित्वमपि ८२
वृविभागनिष्ठमवधिमत्त्वमपि संबंधविशेषः स चातिरिक्तोनतिरिक्तो वेत्यन्यदेतत् तत्संबंधाग्रहे च व्यवहारः शक्तिभ्रमात्

वृक्षाद्यैन्तिपत्तीत्यादौ लाघवादिभागे शक्तिः तज्जनकत्वं च क्रियायाः संबंधमर्यादया भासत इत्यपि वदंति अतः पंचम्येवेति
तस्मादित्यत्र चतस्यैव लक्षणा शक्त्यैव तादृशज्ञानोपस्थितिसंभवात् पर्वतो वह्निमान्वह्निसामग्रीवान्वा तस्मादित्यादिकस्तु
न्यायप्रयोगः संप्रदायविरोधादिति वदंति वस्तुतो हेत्वर्थान्वयानुरोधेन वह्निमानित्यादावपि ज्ञाने लक्षणेति तदसत् पंचम्या ज्ञा
पकत्वे साध्यत्वे वा लक्षणायामेवोपपत्तौ तत्र लक्षणायां मानाभावात् अत एव व्युत्क्रमात्तौ सैव प्रतिज्ञेति अत एव व्याचक्षते यतो द्र
व्यं गुणा इत्यत्र हेतुत्वं यथासंभवमुत्पादकत्वे ज्ञापकत्वे चेति अत एव लौकिके किं वह्निमदिति पृष्टे तदहं वह्निमदित्युत्तरिते
कुत इति जिज्ञासायां धूमवत्त्वादित्युत्तरं च न हि तत्र ज्ञाने प्रश्नः येन लक्षणया ज्ञाने नोत्तरयेत् न वा परकीयभाविप्रश्नानुरो
धाद जिज्ञासिताभिधानं न वा कुत इति प्रश्ने ज्ञातमित्यध्याहारे मानाभावात् दाहाद्दहनात् न जलात् जलं स्पर्शवत् रूपात्
गंधात् नापि शब्दादित्यादौ नञर्थान्वयानुरोधात् जन्यत्वरूपं हेतुमत्त्वं जन्यज्ञानविषयत्वरूपं च ज्ञाप्यत्वमर्थः एवं च हेतुमत्त्वे
शक्तावपि ज्ञाप्यत्वे लक्षणैव न च धूमाद्यालोकवान् पर्वतो वह्निमान् धूमाद्वह्निमत्सधर्मा पर्वतो वह्निमानित्यादिप्रतिज्ञा
यां पर्वतो धूमाद्वह्निमानित्यादौ च तत्रत्यनिगमने चातिव्याप्तिरिति वाच्यं प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितप्रकृ
तसाध्यान्वितस्वार्थबोधकपंचम्यन्तत्वालाक्षणिकपदवदवयवत्वस्य विवक्षितत्वात् वस्तुतोऽयमात्मा ज्ञानादित्यादावव्याप्तिः

शि शाब्दे व्यस्तानोपस्थितिसंभवे न लक्षणाविरहादिति तन्न यद्विषयकज्ञानस्य हेतुत्वादिकमवगतं तस्य व्याप्त्यादिजिज्ञासायां उदाहर
८३ णादिप्रयोगो न चेह ज्ञानविषयत्वेनोपस्थितिर्विना लक्षणां अन्यथा तत्र सुखादेरपि व्याप्त्याद्युपदर्शनप्रसंगात् केचित्तु पंचम्यंत
लाक्षणिकपदत्वस्य नियतावयवतावच्छेदकरूपवत्वं तादृशपदत्वस्य व्यभिचार्यवयवतावच्छेदकभूतस्यावयवत्वं वा विवक्षित
मित्याहुः नव्यास्तु पंचम्या ज्ञानज्ञाप्यत्वलक्षणायैवोपपत्तौ न प्रादिपत्तिकेपि लक्षणा आकांक्षावैचित्र्याच्च पदार्थैकदेशेपि ज्ञा
नेप्रादिपत्तिकार्थो विषयत्वेनान्वेति कर्तृकृतीवत्तौ धारयः यद्धर्मविशिष्टस्य हेतुः प्रयुज्यते आकांक्षावशात्तद्धर्मविशिष्टस्यैव व्या
प्यत्वमुपदर्श्यते अ[illegible]पायस्यापि धूत्वानादिप्रयोगेपि धूमादेर्व्याप्यत्वेनोपदर्शनप्रसंगादित्याहुः इतरान्वितस्वार्थबोधकत्वे
सति स्वीयपदस्य भिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति अंत्यपदत्वे सति स्वीयान्यपदार्थविशेष्यकान्वयबोधा
जनकान्यत्वे सति वा न्यायावयवत्वं प्रतिज्ञात्वं प्रतिज्ञाहेत्वोरुपनयनिगमनयोश्चार्थैपि रस्परसंनिवृत्तौ भवतः ननूदाहरणस्य
केनापि पदविभक्त्यंतं तेन निगमनेनातिव्याप्तिः प्रकृतपक्षान्वितस्वार्थबोधकपदो[illegible]पस्थापितार्थान्वितस्वार्थबोधकन्याया
वयवत्वं हेतुत्वे निगमनवारणायोपस्थापितांतं प्रमेयत्वमभिधेयं प्रमेयत्वादित्यादौ प्रकृतस्यार्थपक्षान्वितस्वार्थबोधकपंचम्य
र्थान्वितो न प्रतिज्ञार्थोपि तु तदेकदेशार्थ इति स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वं विशिष्टवैशिष्ट्यबोधज
नकस्वार्थोपस्थितिजनकन्यायावयवत्वं विशिष्टबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयवत्वं वा तत्त्वं एकवाक्यतया ८३

हेत्वर्थविशिष्टसाध्यस्यैव विशिष्यं भासकत्वेन पुनरवयवांतरार्थविशिष्टस्यकस्यचिदिति इतराननिवितस्वार्थबोधकन्यायावयवत्वं यदा लक्षणत्वं
अन्वयव्याप्तिबोधकत्वे व्यतिरेकव्याप्तिबोधकत्वे च विशेषलक्षणद्वयं इतरोपस्थापितार्थविशेषणकस्वार्थबोधजनकन्यायावयव
त्वं स्वार्थविशेष्यकेतराण्यान्वयबोधजनकन्यायावयवत्वं योपनयत्वं अवयवार्थविशेष्यकस्वार्थविशेषणकबोधजनकन्यायावयव
८६ त्वं निगमनत्वं हेत्वर्थस्य न प्रतिज्ञार्थेन विशेषणत्वेनान्वय इति किंतु तद्दैशार्थे इत्युक्तप्रायं ॥ ॥ एतावता प्रबंधेन सपरिकरं हेतुं निरूप्य
तत्प्रसंगागतत्वविरोधादिरूपतत्कार्यकारित्वाद्वा हेत्वाभासनिरूपणं प्रतिजानीते अथेति अनुमितीति यथाश्रुतमिदं हेतुदोषसामान्यलक्ष
णं तद्दुष्टत्वं च दुष्टहेतूनां तदभिप्रायेणैवोपधेयसंकरेपीत्यादि वक्ष्यति तत्रानुमितिपदमनुमितिनिष्ठकार्यतानिरूपकसंबंधि
त्वेनानुमितितत्कारणपरं साध्यव्याप्यहेतुमान्पक्षः पक्षः साध्यवानित्याकारानुमितिपरं वा तेन एकत्र हेतौ व्यभिचारादि
ग्रहे अन्यत्रस्य परामर्शादनुमित्युत्पादेन व्यभिचारव्याप्याद्यज्ञानेनान्यथासिद्धत्वाच्च व्यभिचारादिग्रहाभावस्यानुमित्यजन
कत्वेपि न क्षतिरिति वदंति अत्र पर्वतो निर्वह्निः धूमो वह्नेः अभिधेयत्वात् प्रमेयत्वस्य व्यभिचारीत्यादिभ्रमादप्यनुमि
तिप्रतिबंधादाह यथार्थेति अनुप्रतिबंधकज्ञानविषयव्यभिचारादिघटकसाध्यादेरपि प्रत्येकं हेत्वाभासत्वापत्तिः अयथावि
शिष्टविषयकज्ञानप्रतिबंधकत्वादुष्टकं च न विशिष्टमिति चेत् तर्हि यथार्थेति व्यर्थं भ्रमविषयस्याप्रसिद्धत्वादित्यनुशयेनाह

त्रि
८४

पक्षेति केचित्तु दुष्टानामेव हेतूनामेतानि लक्षणानि तत्र तृतीयमिव प्रथममपि साध्यमानव्यभिचारादेः प्रतिबंधकत्वमभ्युपे
त्य तद्धर्मव्यक्तादृशाभावप्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थज्ञानविषयत्वं अग्रे च तत्त्वमित्यस्य तद्वत्त्वमर्थः
आद्यस्यैव वा दुष्टलक्षणत्वमित्याहुः बह्विविषयत्वेनेति लिंगत्वमविवक्षितं बह्विविषयकत्वेन यादृशविशिष्टविषयकत्वेन
तेनानुमितिप्रतिबंधकपक्षविशेष्यकभ्रमविषये साध्याभावादौ सद्धेत्वादिनिष्ठे नातिप्रसंगः अवच्छेदकत्वं चेहानतिरि
क्तवृत्तित्वं तेन विशिष्टस्यासत्त्वेपि भ्रमात्प्रतिबंधेपि न क्षतिः विशेषणीयं च तादृशविशिष्टांतराघटितत्वेन तेन प्रमेयत्वादि
विशिष्टे स व्यभिचारादौ नातिप्रसंगः एवं च पक्षतावच्छेदकादिविरहविशिष्टः पक्षः पक्षनिष्ठस्तद्विरहो वा साध्याभाववद्
वृत्तिसाधनं साधनवद्वृत्तिसाध्याभावो वा हेतुदोषो येन केनापि संबंधेन तद्वान् अप्रकृतहेतुर्दुष्टः यादृशो धर्मिणि यादृशधर्म
वत्ताज्ञानमनुमितिप्रतिबंधकं तस्य धर्मिणः तादृशधर्मवत्त्वं हेतुदोष इत्यपि कश्चित् अपर्वतत्वेन पक्षत्वे वन्हित्वे
न साध्यत्वे विशिष्टधूमत्वेन च हेतुत्वे पर्वतादेः कांचनमयत्वविरहो ह्रदस्य वन्हिधूमशून्यत्वं पर्वतस्य महानसीयवन्हिधू
मविरहित्वं प्रमेयत्वस्य केवलधूमस्य वा वन्हिव्यभिचारे विशिष्टधूमस्य वा पर्वतीयवन्हिव्यभिचारे न दोषः न वा तत्सं ८४
बंधेन तत्र तस्य हेतोर्दुष्टत्वं अतस्तद्धर्मावच्छिन्नतत्पक्षकतद्धर्मावच्छिन्नतत्साध्यकतद्धर्मावच्छिन्नतद्धेतुकानुमितिप्रति

वंधकं वाच्यं तथा च निर्वह्निः पर्वतो वह्निमान् पर्वतावृत्तिवह्निमान् वा तत्र व्यभिचारिणः पर्वतावृत्तेर्वा धूमादित्यादौ न कोपि
हेत्वाभासः स्यात् तादृशानुमितेरप्रसिद्धत्वादिति अत्र वदंति यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तो नदुत्तरमनु
मितावनाहार्यमानसज्ञाने या पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यताव
च्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकः तत्त्वं हेतुदोषत्वं
पक्षतावच्छेदकवैशिष्ट्यं च वैज्ञानिकं न तु वास्तवं शाब्दं व्याप्तिश्चान्वयतो व्यतिरेकतश्च वाच्या तादृशावगाहित्व प्रसिद्धिश
हार्यज्ञान एवाभ्युपेतव्या अनन्यगतिकत्वात् एवं च वस्तुमात्रनिश्चयानंतरं निर्वह्नित्वविशिष्टे वह्नेरग्रहेप्यनक्षतिः तस्य विरो
धिविषयत्वात् एवं साध्यनिश्चयोत्तरं तस्यानुमितावपि मानसज्ञानाविरोधित्वाच्च तादृशपक्षे तादृशसाध्यवैशिष्ट्यस्य तादृ
शसाध्यनिरूपितव्याप्तिविशिष्टतादृशहेतुवैशिष्ट्यस्य चावगाहिनो ज्ञानस्य यद्विषयकं ज्ञानं विरोधिविषयकं तत्त्वं तादृशज्ञान
विरोधित्वं वा हेत्वाभासत्वं ज्ञानविरोधित्वं च तद्विषयविषयकग्रहविरोधिग्रहविषयत्वं एवंविधे वरीनिरुक्तरत्रसव्यभिचारत्व
क्षणादावनुसर्तव्येति कश्चित् केचित्तु यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावंतो दोषाः संभवंति तावदन्यान्यत्वं
एकमात्रदोषस्थले च तत्त्वमेव हेत्वाभासत्वं स चातिरिक्त एवान्योन्याभावस्तेन वैधर्म्यं पंचविधभेदोक्तिस्तु तत्संभवस्थलाभि

सि॰ दव्याषि
८५

प्रायेण व्यभिचारादेः साध्यादिभेदनियंत्रितत्वात् शब्दाभेदमात्रस्य अकिंचित्करत्वादित्याहुः यथैतत् शब्दोऽनित्यः शब्दत्वा मू॰ २४
दित्यत्रासाधारणोऽव्याप्तिः सर्वसाध्यव्यावृत्तेस्तत्रासत्वात् एवं शब्दोऽनित्यः कृतकत्वादित्यत्र सत्प्रतिपक्षे नित्यत्वव्याप्यादृश्य
द्रव्यत्वादावपि पक्षसत्वादावित्यादिहारिहत्वाशंका तयोर्लक्ष्यत्वेन निराकृतं दशाविशेष इति हेत्वोः सद्धेत्वोः असाधारणः पक्षमा
त्रवृत्तिः सत्प्रतिपक्षो विरोधिपरामर्शोपस्थस्तथा तयोर्दशाविशेषे हेतौ सर्वसाध्यव्यावृत्तत्वस्य पक्षे साध्याभावव्याप्यत्वस्य
च भ्रमदशायां आभासत्वात् अनुमित्यजनकत्वात् तद्धेत्वादौ साध्यव्यावृत्तत्वादिबुद्धेः प्रतिबंधकत्वपरमायात्तिं न तु त
द्विषयस्य दोषत्वं असत्वात् अन्यथा बाधभ्रमेणानुमित्युदयात् तस्यापि दोषत्वापत्तिः कोहि साध्याभाववत्त्वव्याप्यवत्ताभ्र न
मयोरनुमितिविरोधित्वे विशेषः निर्युक्तिकवस्तुप्रवादो न भ्रमेऽपि इत्यभावः यत्तु ज्ञानस्य यद्वदनुमितिप्रतिबंधकतावच्छेदकं
तद्रूपं तत्प्रकारकप्रमाविशेष्यत्वं लक्षणार्थः तच्च द्विविधं विषयरूपं साधारण्यादि बाधभ्रमप्रमितसाध्याभाववान् पक्षः त
द्विषयत्वेन ज्ञानस्यानुमितिप्रतिबंधकत्वात् अविषयरूपं च विरोधिसामग्रीकालीनत्वादि तद्रूपं च ज्ञानस्यैव तद्विषयस्य हे
तोरपीति तन्न व्यर्थं हि हेतोर्नाभेदेन बाधे तदभावात् अत एव नाश्रयतया वह्निव्यभिचारिद्रव्यत्वादिमति धूमेऽतिप्रसंगा ८५
च्च साध्याभाववत्पक्षस्येव साध्याभाववद्वृत्तिहेतोर्ज्ञानस्य प्रतिबंधकत्वात् साधारण्यादिविषयत्वस्य ज्ञाननिष्ठस्यैव प्रतिबं

वै

धकत्वावच्छेदकत्वात् सत्त्वादिसाध्यकेच ज्ञानेऽप्यतिप्रसंगाच्च यथाकथंचित्तत्तद्वत्त्वस्य चातिप्रसंजकत्वात् विरोधिसामग्रीसमवहितोपि च लिंगपरामर्शो न स्वसाध्यकानुमितेः प्रतिबंधको मणिसमवहितो वह्निरिव दाहस्य अथ यद्रूपविशिष्टज्ञाने सत्येव यस्यानुमितिप्रतिबंधः तदेवात्र प्रतिबंधकतावच्छेदकं भवति च प्रतिबंधकीभूतविरोधिसामग्रीकालीनत्वादिविशिष्टपरामर्शे तथैवेति चेन्न कालादिसाधारणकारणघटितसामग्र्या अपि प्रतिबंधिका विशेषणत्वेन तत्सत्त्वे कार्योत्पादस्य दुर्वारत्वात् किंतु विरोधिपरामर्शस्तथा यश्च तत्सत्त्वेपि तत्साध्यबाधावगाहनानुमितिप्रतिबंधः प्रामाणिकः तद्ग्राहकाप्रामाण्यग्रहाभावस्येव तत्तदभावस्यापि वैशिष्ट्यं तत्र निवेश्यतां भ्रमप्रमासाधारणविरोधिपरामर्शसत्त्वे नानुमितिः तद्वत्तथाविधबाधादिग्रहेप्युत्पत्तिप्रसंगः न चातीतादौ लिंगे विरोधिपरामर्शकालीनत्वमिति यद्यपि यद्विषयत्वेन ज्ञानस्य प्रतिबंधकत्वं तद्वत्त्वमेव वाच्यं सत्प्रतिपक्षे च विरोधिव्याप्त्यादिकमेव न तथा तद्वत्त्वमपि हेतोस्तज्ज्ञानरूपसंबंधेन समूहालंबनतया हेतुद्वयविषयत्वादिति तदपि तुच्छं साध्याभाववत्त्वस्य विषयत्वेन साध्याभाववत्त्वस्य ज्ञानप्रमात्वे विषयत्वेन वा ज्ञानस्य प्रतिबंधकत्वं तस्य च साध्याभाववत्त्वस्यापि पक्षे संभवादिति व्याप्तिः विशिष्टविषयत्वेन प्रतिबंधकत्वे विशिष्टं च नत्राप्रसिद्धमिति चेन्न तत्किं सर्वत्र सत्प्रतिपक्षे साध्याभावव्याप्यवान्पक्षः प्रसिद्धः यथाकथंचित्संबंधेन तद्वत्त्वं चातिप्रसक्तं धूमादेरपि ज्ञानरूपेण तदाश्रयाश्रयत्वादिना वा संबंधेन व्यभिचारादिसत्त्वात्

८६ यादृशसंबंधावगाहि[illegible]त्वेन ज्ञान[illegible]स्य प्रतिबंधकत्वं तेन तद्वत्वं च न सर्वत्र प्रतिपक्षितेहेत्वाभासत्वे च घटकत्वेन तद्दुष्टत्वमिति कृतं पल्लवितेन
मयमिति स्यादेतत् साधावस्य तत्साध्यक [illegible] योस्थाणुत्वप्रत्यक्षशाब्दबोधयोरुदयात् नचैवं नरशिरःकपालं शुचि प्राण्यंगत्वादित्या
८ द्यागमविरोधः स्यात् तत्रानुकूलतर्काभावेन बलवत्त्वागमविरोधेन च व्याप्तिनिश्चयस्यानुमितेश्चानुत्पत्तेरितिभावः यद्वेत्याद्य
नुद्धयमात्रं प्रत्यक्षं प्रत्यानुमानिकबाधादिनिश्चयस्याप्रतिबंधकत्वेपि शाब्दं प्रति प्रतिबंधकत्वात् योग्यताज्ञानेनान्यथासिद्धत्वात्
तदभावो न तत्र हेतुरिति चेत् [illegible]मप्युपनीतभानविशेषं प्रति बलेन हेतुताया दुर्वारत्वात् यद्यपि लक्षणानां सामान्यप्रतीतिं विनावि न प्रतीतवतो
शेषजिज्ञासानुदयात् सामान्यलक्षणानंतरमेव विभागो युक्तः तथापि सव्यभिचारपदस्य साधारणमात्रे प्रसिद्धत्वात् तन्मात्रस्य
लक्ष्यभावं बुध्यमानैरन्यैर्वादिभिरसाधारणादिसाधारणलक्षणस्यातिव्याप्तिः तद्व्यावृत्तस्यैव साधुता प्रतीयेत अतस्तद्वारणा
य लक्ष्यांतरमपि दर्शयति सव्यभिचार इत्यादि केचित्तु सामान्यज्ञानाधीनो विभागो न तल्लक्षणप्रत्ययमपेक्षते अतः प्रथ
मं विभागकरणेपि न दोष इत्याहुः प्रसक्तिरनुमितिरापत्तिर्वा तदुपधानमव्यापकं अतिव्यापकं च तथाविधव्याप्तिभ्रमेणास
श्रा द्धेतावतस्तद्योग्यतावाच्या[illegible]ताद्रूप्यादिरूपा न च विरुद्धोभयव्यावृत्तत्वमेकस्य संभवतीत्याह एकस्येति साध्येति को
टिद्वयोपस्थापकं सत् साध्यसंदेहजनकं साध्यसंदेहजनककोटिद्वयोपस्थितिजनकमिति यावत् आश्रयतयाविषयित ८६

यथा नित्यत्वानित्यत्वयोः पक्षव्यापकस्य नित्यत्वे साध्ये ज्ञानस्यानुवृत्तत्वव्यावृत्तत्वाभ्यां वह्नितदभावोपव्यापकस्य वह्नौ साध्ये धूमस्य च
धारणाप्रयोजकत्वं [illegible]ः साध्यसंदेहजनकत्वात् धर्मितावच्छेदकपुरोवर्तित्वादिविशिष्टधर्मिज्ञानस्य संशयजनकत्वात् तथा त
द्धारणाप्रयोजकोटिद्वयोपव्यापकेति नचैतदसाधारणतया संग्राह्यमेवेति वाच्यं तथात्वेपि तदुत्तीर्णत्वादशायां विशेषदर्शनात् संशयानुप
धायकत्वेपि तज्जननयोग्यताया अनिवृत्तेः अन्यथा पक्षमात्रवृत्तेः पक्षादौ साध्यतदभावनिश्चयदशायां साधारणव्याप्तिप्रसंगात् [illegible]
ति[illegible]संकलनदशायां हेतुमत्ताज्ञानस्य साध्यसंदेहजनकत्वप्रसंगे हेतुवारणाय कोटीत्यादि [illegible]नासाध्यस्य प्रति हेतुनासाध्याभा
वस्योपव्यापनादुभयोपव्यापकत्वं न कस्यापीत्यपि कश्चित् इदं अणुकं नित्यमणुत्वादित्यादौ साधारणधर्मवद्धर्मिज्ञान
स्य कोट्युपस्थितिं संशयं च प्रति हेतुत्वात्तद्विषये धर्मिण्यसद्धेतौ अतिप्रसंगः स्यादतः पक्षधर्मत्वेति पक्षपदं धर्मिमात्रप
रं नचैवं नित्यो घटः शब्दत्वादित्यादौ बाधाद्यवतारे असाधारण्यापत्तिः इष्टत्वात् अन्यथा बाधासिद्ध्योरन्यतरावतारदशायां
साधारणासंग्रहापत्तेः असिद्धिसंकीर्णत्वेन सव्यभिचारमध्याप्रवेशे सव्यभिचारसंकीर्णतया सिद्धेऽप्यनंतर्भावापत्तौ तत्स्यात्ति
रिक्तहेत्वाभासतापत्तेः नच व्याप्यविरुद्धयोः साधारण्यभ्रमप्रमादाद्यतिप्रसंगः धर्मिणि यद्रूपवत्ताज्ञानं साध्यसंशयजनकं
तद्रूपवत्त्वस्योक्तत्वादिति तच्चाहृत्य साधारण्यादीति सिद्धान्ते स्फुटीभविष्यति इदं च विषयकभ्रमात्मवृत्तिज्ञानत्वादित्यादौ प्रा

शि
७७ मान्या प्रामाण्यसंशयस्य तद्घटकीभूतसाध्यतदभावविषयकतयाकोट्युपस्थितिरूपस्य तज्जनकीभूतज्ञानविषयज्ञानत्वेनातिप्र
संगशंकापि साधारणधर्मवत्ताज्ञानस्य तज्जन्यकोट्युपस्थितेर्वा संशयजनकतया तद्ज्ञानस्य तादृशसंशयाहेतुत्वात् प्रामाण्य
संशयस्य लैंगुज्ञानत्वलक्षणासमानधर्मदर्शनात् ज्ञाने प्रामाण्यस्य ज्ञानविषयात्मकसाधारणधर्मदर्शनाच्च विषयेतद्
त्वस्य संदेहः अप्रामाण्यसंशयाद्यनुधावनं तु भ्रमत्वज्ञानमूलविरोधिज्ञानस्य प्रतिबंधकतया तदपसारणप्रयुक्तमित्य
स्याकरे व्यक्तत्वात् व्याप्यवत्तासंशयस्य च पक्षव्यापकवत्तासंशयपरं हेतुत्वपक्षे ज्ञानपदं निश्चयपरं हेत्वभिमतत्वविशे
षणं तु तेन संबंधेन तद्वत्वज्ञानस्य संशयादिजनकतासूचनार्थं तेनात्मत्वकपालत्वादिसाध्यके समवायसंबंधेन हेतौ ज्ञानघटा
द्यौ विषयत्वसंयोगादिना तत्संदेहजनके नातिप्रसंग इति विप्रतिपत्तौ प्रत्येकं कोटिद्वयोपस्थापकत्वाभावात् लक्षणस्य द्व्यपदे
न तद्वारणात् मिलितस्य तदुपस्थापकत्वेपि न तद्वत्ताज्ञानं तथा न वा मिलितद्वयोर्जनकत्वं तथात्वेपि वाच्येन संबंधेन तद्वत्ता
ज्ञानमुभयकोट्युपस्थापकं तेन संबंधेन हेतुत्वे वश्यं स व्यभिचारित्वमिति अनुपसंहारिपक्षएवेति अनुपसंहारित्वाद
शायां साध्यतदभावसहचरितत्वनिर्णयाभावेपि उक्तक्रमेण वास्तवतत्सहचरितत्वमादायैव लक्षणसमन्वय इति भावः ८७
केचित्तु व्याप्यादिधर्मेपि साधारण्यज्ञानात् संशयस्योदयात् तद्ज्ञाने वस्तुतः साधारण्येप्यनुदयात् साधारण्यज्ञानं हेतुः तत्र नि

अयत्वमकिंचित्करं गौरवात् तथा च पक्षएवतत्संशयात्मकतदुभयसाहचर्यज्ञानं भवति तथात्वमितिभाव इति प्राहुः [illegible]चित्त्वं नतु केवला
न्वयित्वसाध्यकानुपसंहारित्वसाध्याभावाप्रसिध्यातत्संशयाद्यभावाद्व्याप्तिः एवं यत्र स्थितौ धरित्वा पूर्वं घटत्वं गृहीत्वं उत्तरदशायां न
धर्मे श्रैवदोषात्घटत्वाग्रहेतद्दृष्टमित्र्योयमिति ग्रहे च घटत्वनिश्चयविषयीभवतु भिन्नावृत्तत्वेन गृहमाणतया असाधारणे इदंत्वे
वस्तुतः तद्व्यावृत्तत्वाभावेन तत्र लक्षणायोगादित्यत्र तत्तयोर्लक्ष्यत्वाभावेन न परिहरन्तीति केवलान्वयीति अत एव यत्तएव पुरुष
दोषाधीनं तद्दोषत्वमत एव तस्यानित्यदोषत्वेऽस्वाभाविकदोषत्वे कादाचित्कत्वानुपपत्तिः एवं च यत्र दोषताप्रयोजकं वस्तुतो
भ्रमो हेतौ तत्रानित्यदोषत्वमपि यत्र तु पुरुषस्य तद्ग्रहो न तत्र तदपि भ्रममात्रादपि दुष्टत्वे अतिप्रसंग इत्याह अन्यथेति केचित् परे तु
अयं घटः एतत्वादित्यादाव व्याप्तिः साध्यसंदेहप्रयोजकं हि तस्य साध्यतदभाववद्व्यावृत्तत्वं न चैकस्य धर्मस्य तदुभयव्यावृत्त
त्वं संभवति असाधारण्यं तु तस्य पक्षमात्रवृत्तितया अतस्तस्य अलक्ष्यत्वयोरत्र यत्ति अयं घट इति एवं च अवृत्तिगगनादिक
मेवासाधारणं पक्षवृत्तिता भ्रमदशायां असाधारण्यस्यासंकरः न चोभयव्यावृत्तत्व[redacted]वृत्तिमत्त्वयोः स्वरूपतो विरोधः नि
श्चितसाध्यतदभाववद्व्यावृत्तत्वं च न संदेहप्रयोजकं तथा सति तुल्यन्यायतया निश्चितसाध्यतदभाववद्वृत्तित्वस्यापि तथा
त्वे सद्धेतावपि साध्याभाववत्त्वभ्रमविषयवृत्तित्वग्रहदशायामतिप्रसंगात् न च तादृशनिश्चयविषयस्य धर्मिणो वास्तवं

शि

८८ साध्याभावादिमत्त्वमपितत्र मानाभावात् किंच संदेहजनकतावच्छेदकरूपस्य विशेषणत्वे व्यभिचारिणि साधारणे महानसादिवृत्ति
तादशायामव्याप्तिः उपलक्षणत्वे असाधारणोत्तीर्णतादशायामतिव्याप्तिः असाधारणप्रकरणसमयोः तत्वेनभ्रमविषययोः
अनित्यदोषत्वं विशेषादर्शनदशायां अनुमित्यनुत्पादप्रयोजकत्वं न तु वास्तवहेतुदोषत्वं अन्यथा अनुमित्यनुत्पादप्रयोजकत्वा
न विषयतामात्रेण वास्तवहेतुदोषत्वे इत्याहुः अनवगतसाध्यसहचारत्वेसति अवगतसाध्याभावसहचारत्वं तथा विरुद्धत्व
मेवतयोरिति इदं चाभ्युपगमवादेन वस्तुतो वर्णितलक्षणस्य न तत्राव्याप्तिरिति ध्येयं यद्रूपज्ञानमनुमितिप्रतिबंधकं तदेव वि
भाजकं अन्यथा अतिप्रसंग इत्यभिप्रेत्य दूषयन्ति नैतदिति वस्तुतस्तूपस्थापकत्वादिज्ञानमनुमितेः तज्जनकस्य वा न प्रतिबंध
कं विरोधिविषयत्वाभावात् एवमुत्तरत्रापि पक्षवृत्तित्वेसतीति विरोधिविषयत्वं विरोधिज्ञानविषयत्वं अव्यावृत्तिपदमत्यंतायो
गव्यवच्छेदार्थकं तेन संयोगसंबंधेन व्यभिचारिणि द्रव्ये हेतौ व्यभिचाराभावदशायां नाप्रसंगः साध्यवृत्तिस्तु नासाधारणवृत्ति
त्वदर्थं अपि पक्षधर्मधूमादिवारणाय सत्यंतं पक्षः संदिग्धसाध्यो धर्मी विशिष्टहेतौ तद्वत्तित्वग्रहाविरोधित्वं तु तदर्थः तथा च
पक्षतावच्छेदकरूपेण पक्षे साध्यतावच्छेदकरूपेण साध्यस्य हेतुतावच्छेदकरूपेण हेतोर्वा यत्ज्ञानं तदविरोधित्वस्य लाभात् पक्ष ८८
साध्यसाधनाप्रसिद्धिस्वरूपासिद्धिबाधप्रतिरोधानां निरासो सिद्धिसंकीर्णसंग्रहस्य विरोधोपि फलतः प्रतिरोध एव तदन्यत्वे

न वा विरोधिविशेषणीयं वक्ष्यति च सिद्धांते विरुद्धान्येति हेतुसाध्यसामानाधिकरण्यग्रहाविरोध्यर्थकसंबंधपदत्वेन प्रकृतहेतुसंबं
धित्तया विरोधित्वेनास्यार्थोपवर्णनेन प्रायशो बाधादिवारणेऽपि घटत्वमनित्यं घटत्वादित्यादिबाधादिवारणं प्रयत्नसाध्यमिति तन्मतिभा
ति [redacted]स्तु अनुमितिपदं तत्तत्कारणताज्ञानपरं आश्रयासिध्यादिवारणाय सत्यंतं [redacted]पक्षकवादेशाहेतुग्रहाविरोध्यर्थकं [redacted]
याच्च वाचोभंग्या व्याप्तिग्रहविरोधित्वमेवाभिप्रेतत्तं तेन वन्हिमान् वन्हिमान् द्रव्यत्वादित्यादौ हेतोः साध्यवदवृत्तित्वादेः नासंग्रहः वि
वेचयिष्यते चेदमुपरिष्टात् [redacted]त्तिसंपातायातं अत एव चानुपदं विरुद्धेपीत्यादि वक्ष्यति व्यर्थेति विशेषणं पक्षवृत्तित्वं साध्या
व्याप्यत्वइति हेत्वाभासत्वं हेतुवदवभासमानत्वं वस्यर्थश्च वृत्तिमत्त्वं एवं च साध्यतदभावव्याप्यत्वग्रहविरोधिवृत्तिमत्त्वग्रहावि
रोधिरूपवत्त्वमित्यर्थः साध्यतदभाववदवृत्तित्वं साधारण्यं निश्चितसाध्यतदभाववद्व्यावृत्तत्वमसाधारण्यं तच्च व्याप्तिद्वयग्रह
विरोधीति हृदयं असिद्धिविशेषस्त्ववृत्तित्वं वृत्तिमत्त्वग्रहविरोधि साध्यतदभाववद्व्यावृत्तत्वमपि पक्षीदृशं तदा असिद्धिरेव
नो चेदिदमेवासाधारण्यं बोध्यं साध्याप्रसिध्यादिवारणाय विशिष्टसाध्यसाधनग्रहाविरोधित्वं वाच्यं व्यापकसामानाधिकर
ण्यमिह व्याप्यत्वं तेन द्वितीयस्य भेदः रीतिस्तुल्यैव केचित्तु असाधारण्याभावकालावच्छिन्नसाध्यतदभावव्याप्तिशून्यत्वं विव
क्षितं विशेषणाभावाद्वस्तुतो व्याप्यत्वस्य विरुद्धस्य चासाधारण्ये च संग्रह इत्याहुः तच्चिंत्यं व्यर्थेति विरोधादेर्वारकं साध्या
भावेत्यादि व्यर्थं तस्य पार्थक्ये प्रमाणाभावादिति भावः प्रथममित्यादि गगनमित्यादि च दूषणं यथाश्रुते नापीत्यादि सपक्ष

शि
८१

विपक्षसत्त्ववृत्तित्वव्यावृत्तत्वं सर्वतोव्यावृत्तत्वं चेति सपक्षगतत्वविपक्षव्यावृत्तत्वयोर्दूषकतायामनुपयोगादिति भावः पक्षा
तिरिक्तेत्यादि साध्यविरुद्धयोरसाधारण्यसंग्रहाय पक्षातिरिक्तपदं पक्षत्वं संदिग्धसाध्यधर्मत्वं धूमेत्यादि दूषणं यथाश्रुते
न तु सप्तमीसमासात्पक्षातिरिक्ते पर्वते यत्साध्यवन्मात्रवृत्तिसाध्याभाववन्मात्रवृत्ति च तद्भिन्नत्वमर्थ इति ध्येयं पक्षवृत्तीत्यादि वि
रोधः सामानाधिकरण्यं पक्षवृत्तित्वसाध्यसामानाधिकरण्यग्रहाविरोधी यो अनुमितेरौपयिकस्य जनकज्ञानविषयस्य संबंधस्य स
पक्षसत्त्वादेरभावस्तद्वत्त्वमित्यर्थः सपक्षविपक्षव्यावृत्तत्वं स्यासाधारण्यस्य निश्चये पक्षे साध्यसामानाधिकरण्यसंदेहात्तस्य तु ज्ञा स्य
न विरोधित्वं पक्षवृत्तौ विरुद्धभिन्ने च वर्त्तते यस्मात्तादृशो अभावस्तद्वत्त्वमित्यर्थ इत्यपि कश्चित् पूर्वोक्तलक्षणानां यथोक्तरीत्या
यथाश्रुतनाव्याप्त्यादिसंभावना परं तु ज्ञानस्यानुमितिप्रतिबंधकतया तेषां हेत्वाभासतावच्छेदकत्वं न घटते न घटतां किं तेन
तेषां हेत्वाभासविभागमात्रोपयोगित्वादित्याशयवानाह उच्यत इति संदेहं प्रत्येव साधारण्यादिविशिष्टधर्मवद्धर्मिज्ञानत्वेन
हेतुतावच्छेदकजनककोटिद्वयोपस्थितिं प्रति तु तादृशधर्मज्ञानत्वमात्रेणेत्यभिप्रेत्याह उभयेति साध्यसंदेहजनकेति प्रकृतं यथा
कथंचित्कोटिद्वयोपस्थितिः स्मृत्यनुभवसाधारणी संदेहजननी नियामकं तु साधारण्यविशिष्टधर्मवत्ताज्ञानं अत एव धारा
वाहिकः संदेह इति मते तु धर्मितावच्छेदकविशिष्टे धर्मिणि यद्रूपविशिष्टधर्मज्ञानं साध्यसंदेहजनकं तद्रूपवत्त्वमेव वक्तव्यं को ८१
टिद्वयस्मरणं च विनत्यादिना ज्ञानस्योर्ध्वत्वादिना धर्मिणि ज्ञानमेव संदेहजनकं न तु तद्धानी साहचर्यादिज्ञानमपेक्ष्यत इति न येन तु यद्रू

पविशिष्टत्वेन गृहीतस्य धर्मस्याधर्मिवृत्तिताज्ञानं तथा च हेतुत्वमेव वाच्यं रूपेत्यादि नन्वसाधारण्यं न साध्यतदभाववदवृत्तित्वं वृत्तिमत्त
त्तपासाधारणस्य भयात् एककोटिव्याप्यस्यैव एककोटिमदावृत्तस्यापि धर्मस्य कुत्रचिद् विशेषदर्शनतया संशयविरोधित्वाच्च सत्प्रतिपक्षे च परा
मर्शप्रामाण्यसंशयोत्तरमेव साध्यसंदेहात् नापि निश्चितसाध्यतदभाववदावृत्तत्वं तद्धि यत्र यत्र साध्यादिमत्तानिश्चयः न त्वावृत्तत्वं
येन येन रूपेण यत्र तन्निश्चयः तेन तेन रूपेणावृत्तत्वं तथा आद्ये सर्वोपि साध्यव्याप्यवत्ति सर्वोपि वा साध्यवत्ति प्रमेयाणीत्यादि
निश्चये सामान्यतः पक्षेपि साध्यादिनिश्चयादतथात्वप्रसंगः द्वितीये तु विशिष्य पक्षे साध्यनिश्चयं विना पक्षवृत्तिनासाध्यव्या
प्यत्वनिश्चयेपि तथात्वापत्तेः नैष दोषो यादृशव्याप्तिग्रहे सति नासाधारण्यं तद्ग्रहाभावेन विशेषलक्षणस्य साधारणाभा
वविशिष्टस्य तद्ग्रहस्य चाभावेन सामान्यलक्षणस्य विशेषणाद् इति व्याप्तिनिरासात् विशिष्टाभावादेव च साधारणे व्याप्तिभ्रम
दशायां नाव्याप्तिरिति चेत् एवं सत्येकेन व्याप्तौ गृहीतायामसाधारणस्य न किंचित्प्रतिसव्यभिचारित्वं स्यात् स्याद्वा तदपि तत्तत्पुरु
षघटितमसाधारण्यं च तत् साध्यादिव्याप्यवत्त्वेन रूपेण साध्यादिमत्त्वनिश्चयेऽव्याप्तिप्रसंगाच्च नहि घटोऽनित्यो घटावृत्तित्वं
शब्दत्वमिति वदनित्यत्वव्याप्यवत्तो व्याप्तं [illegible] शब्दत्वमिति तदानीं निश्चयोऽस्ति हि तं च निश्चितसाध्यतदभाववदावृत्तत्वं न सं

शि
शयप्रयोजकमिति किंतु साध्यतद्भावाभ्यां सहचरितत्वमिव तत्सहचरिताभावप्रतियोगित्वं व्याप्यविरुद्धयोस्तुल्यत्वेन निश्चितयोर्दर्शने विशेष
१० वत्रा दर्शनादिव न संशयद्वितिविशाप्यलक्षणांतरमाह विरुद्धमन्येति विशिष्टसाध्यहेतुसामानाधिकरण्यग्रहाविरोधित्वार्थतो विरोधिवि
शेषणं तेन साध्यसाधनयोरप्रसिद्धिर्वृत्तित्वस्यपरस्परासामानाधिकरण्यादीनां च व्युदासः पक्षपदं च धर्मिमात्रपरं तथा च य
यद्धर्मिवृत्तित्वं हेतोर्ज्ञायते तत्र तत्रैवानुमितिविरोधियद्रूपं तद्वत्त्वमर्थः साध्यव्यापकीभूताभावप्रतियोगित्वं च तथा बाधप्रति
रोधौ तु धर्मिविशेषितत्वान्न तादृशौ सर्वसाध्याभाववत्त्वं तु व्याप्यवह्नेत्यादिकं तु साध्यवत्त्वग्रहविरोधित्वेन सामानाधिकरण्य
ग्रहविरोधि साध्यानुमितिसामान्यविरोधित्वं वा विशेषणं तेनैवेति तेनानुमितिविरोधिना विपक्षवृत्तित्वादिना एवकारेणानुगम
करूपं व्यवच्छिद्यते तस्य हेत्वाभासवावच्छेदकत्वं निरस्यति हेत्वाभासस्य लक्षणानुरोधेनेति तेनानुमितिविरोधि: घटितलक्षणाकर
णेनासाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षेनाव्याप्तिरन्यथा पुनरव्याप्तिरेव साध्याभावव्याप्यकत्वेन साक्षात्साध्यव
त्तानुमितिप्रतिबंधकत्वे सर्वमनित्यमित्यादि संग्रहायमनुरुध्यवेदं अतएव तावद्ग्रेऽजं न भो यथ्यिष्यति नापीति निश्चितसाध्यवति
साध्यवद्भिन्ने वर्तमानत्वमित्यर्थः अनुपसंहार्यद्वृत्ति साध्यवदन्यवृत्तित्वांशस्य तत्रापि सत्त्वादिति भावः नापीति दुरूहसपक्षत्वेन १०

निश्चयगर्भे अतो नाभेदः घटइत्यादौ सत्त्वविरुद्धस्य अनुपसंहार्यस्य प्रसिद्धस्य विरुद्धांतरस्य च व्यवच्छेद्यत्वात् अन्वयव्यतिरेकतश्च स
हचाराग्रहदशायामीदृशं द्वित्वमनुपसंहारीति मतेनेदमित्यपि कश्चित् विपक्षेति अत्र विपक्षत्वं साध्याभाववत्त्वं अनुपदमेव वस्तु
गत्या साध्याभाववद्वृत्तित्वेन साधारणो इति ग्रंथ एव स्फुटतरमभिधानात् न तु निश्चयगर्भेण ज्ञानस्याप्रतिबंधकत्वात् न च वस्तुतो
यत्र निश्चयः तद्वृत्तित्वज्ञानं प्रतिबंधकं रूपांतरेण साध्याभाववत्तया निश्चिते रूपांतरेण हेतुज्ञानेऽप्यप्रतिबंधात् न चैकेन रूपेण तत्त
था गौरवात् हेतुसाध्याभाववतोः सामानाधिकरण्यास्फुरणेनाविरोधात् साध्याभाववद्वृत्तिर्हेतुरित्यादिज्ञानानामप्रतिबंध
कत्वापत्तेश्च यत्तु साध्याभाववत्त्वांशे निश्चयरूपं शेषांशे संशयसाधारणं साध्याभाववद्वृत्तित्वज्ञानं प्रतिबंधकं अन्यथा पक्षस्यै
व साध्याभाववत्त्वसंदेहेन संदिग्धानैकांतिकत्वापत्तेः यदाहुर्न हि पक्षे पक्षसमे च व्यभिचार इति तन्न व्याप्तिनिश्चये हेतौ व्यभिचारे
संशयायोगात् तदनिश्चयदशायां तु अनुकूलतर्कास्फूर्तौ संदिग्धानैकांतिकत्वस्येष्टत्वात् हेतुसाध्याभावसामानाधिकरण्यावगा
हितया एव ज्ञानस्य व्याप्तिग्रहप्रतिबंधकत्वात् अत एव पक्षः साध्यातिरिक्तपक्षधर्मातिरिक्तधर्मवान् मेयत्वाद्धित्वादयो अनुकूलत
र्कविरहिणो बाधप्रतिरोधयोरनवतारेऽपि पक्ष एव संदिग्धानैकांतिकतया अप्रयोजका गीयंते एवं च निर्दोषानुकूले स्याद्यः

शि
९१

शक्तिसाधकाअपि अन्वयापवाल्तिरिक्ते सर्वत्र साध्यवत्तानिश्चयात् व्याप्तिग्रहस्य दुर्वारत्वात् पक्षविपक्षान्यतरत्वादिना सर्वत्र स
त्वेऽपि पक्षसंभवाच्च अपसाध्यवत्तद्वदन्यत्वान्योन्याभावगर्भव्यभिचारयोरेकोपादानेनैव व्याप्तिः साध्यवत्ताज्ञानसाध्यप्रतिबंधकसा
नविषयत्वेनाभावत्तद्व्यानुगमेऽपि हेतुमत्तितादृशाभाववत्त्वस्य तादृशाभाववत्ति हेतुसत्वस्य तादृशाभावे हेतुसामानाधिकरण्य
स्य साध्यवत्तद्वृत्ती हेतुसमानाधिकरणतादृशाभावप्रतियोगित्वादेश्चासंग्रह इति चेदत्र वदंति प्रकृतसाध्यसामानाधिकरण्य साधन
ग्रहाविरोधिनो ज्ञानस्य विषयतया अन्वयव्याप्तिग्रहविरोधिताव्छेदकत्वेन विभजनान्नासंग्रहः अविरोधिन इत्यनेन साध्याप्रसिध्या
दीनां निरासः यद्वि पुनरन्यत्वान्योन्याभावयोरेकतरगर्भव्यभिचारज्ञानस्य नान्यतरगर्भव्याप्तिग्रहविरोधित्वमित्यादिकं विभाव्य
ते तदा साध्यसामानाधिकरण्यघटितत्वेनान्वयव्याप्तयोऽननुगमनीयाः प्रातिस्विकरूपेणोपादाय वा नावच्छाप्यवगाहित्वं ग्रह
स्य वक्तव्यं साध्याव्यभिचसामानाधिकरण्यस्य व्याप्यप्रसिद्धस्य हेतौ विरहोऽप्येतद्विशेष एव विशिष्टसाधनवत्वग्रहाविरोधित्वे
सति व्यापकत्वग्रहविरोधिताव्छेदकरूपवत्वं वा विभाजकं शेषं पूर्ववत् साध्यवत्तद्वतोरन्यत्वाभावान्योन्याभावौ साध्या
भावव्यादिव्यावृत्तेन साधनवत्ताज्ञानविरोधित्वेनाननुगमयत्यत्र हेतुसामानाधिकरण्यग्रहाभावग्रहविरोधित्वं साध्यवत्ता ९१

ज्ञानविरोधिनिवारणाद् यथाभावग्रहविरोधि हेत्वाभासतावच्छेदकरूपवत्त्वात् तथा वक्तव्यं साध्याभावव्याप्यादौ हेतुसामानाधि-
करण्यादिकमेव विरोधित्वान्नाभासः विरोधित्वं पूर्वोक्तदिशावसेयं उपदर्शितविशिष्टव्याप्तिविरहो व्याप्यत्वासिद्धिरेवेति व्या-
प्तिग्रहकारणसहकारग्रहसहकार्यभावप्रतियोगिज्ञानविषयत्वेनानुगमइत्यपि कश्चित् प्रा[illegible]येनान्तरयत्नीसर्वैस्यादि स-
र्वेतिविपक्षेप्यन्वेति तेन साध्याभावन्यूनवृत्तिर्युक्तः विपक्षत्वस्य निश्चयगर्भत्वात् भूरनित्या गन्धवत्त्वात् शब्दो नित्यः शब्दत्वा-
दित्यादौ नाव्याप्तिः पृथिवी रूपवती रसादित्यादौ जलादेर्नीरसत्वादिभ्रमे पुनरसाधारण्यभ्रम एवेति मन्तव्यं तथापीति पक्षत्वसंदि-
ग्धसाध्यकत्वं प्राचीनमतं दूषयति अपेत्यादि व्याप्तीत्यादि तथा च स्वमते दूषणाक्षमत्वात् नाभासत्वमुपाधिवदिति भावः एकधर्मि-
वृत्तित्वं च न सामानाधिकरण्यग्रहविरोधिधर्मान्तरे तत्संभवात् अन्यथा सतोऽपि साध्यसाधनयोर्व्यतिरेकित्वं दोषाय स्यात्
पञ्च अथायं शंकितुरपि प्रायः पक्षे साध्याभावस्य संशयो निश्चयो[illegible]अनुमितिविरोधिविरोधिविषयत्वात् तत्सामग्रीत्व विरोधिसा-
मग्रीत्वेन तत्रादिमस्य सामग्रीपक्षे सव्यभिचारस्य हेतोर्ग्रहो द्वितीयस्य तु प्रतिहेतोः परामर्शोऽत एव तयोराभासत्वं अत एव स-
व्यभिचारलक्षणे पक्षवृत्तित्वविशेषणं साध्याभाववद्वृत्तित्वमात्रे पुनरसिद्धिरेव विरोधान्यस्य परामर्शविरोधिनो रूपस्य

सि
१२ तत्त्वादिति मैवं बाधसंशयस्य प्रतिबंधकत्वानंगीकारात्‌ साधारणधर्मवत्ताज्ञानस्य संशयसामग्रीत्वाभावात्‌ सामग्रीत्वेन प्रतिबं
धकत्वे हेत्वाभासत्वायोगात्‌ अन्यथा पक्षस्य साध्यतदभाववद्वृत्तिमेयत्वादिमत्त्वं सर्वत्र हेत्वाभासी भवेत्‌ तथा कामिनीजिज्ञासादि
प्रयोजकत्वं स्वनेष्टसाधनतादिकमपि एवं विशिष्टस्यानुमित्यौपयिकत्वं कुत्रापि केवलस्यापि सपक्षव्यावृत्तत्वस्य तथात्वं कुत्राप्य
त्ति किंचेति वाक्योपदर्शितदृष्टांतस्य साधर्म्यवैकल्योद्भावनं तु नासाधारण्यं सपक्षांतरदृष्टित्वेपि तत्संभवात्‌ उद्भावनं तु तस्य निग्रहस्था
नत्वात्‌ तद्विभाजकसूत्रस्य अनुक्तसमुच्चायकचकारेण तस्य समुच्चितत्वात्‌ उदाहरणाभासताप्रदर्शनायैव वाचावश्यकत्वाच्चादृ
ष्टांतप्रयोग इति भावः अनुमाभूत्परार्थे अनुमाने असाधारण्यं दोषः स्वार्थे तु स्यादत आह स्वार्थेपीति स्वमते समाधानमुक्त्वा मतेउ
च्यत इति अर्थादिति व्यतिरेकमुद्रया अर्थादुभयं साधयेत्‌ अर्थवशात्संपन्नमेवमुभयसाधकत्वमुभयसिद्ध्यनुकूलव्याप्त्यादि
ग्राहित्वमित्यर्थः व्यतिरेकितया चेति पाठे अर्थात्‌ अर्थापत्तिविधयेति परमतेन एवं च पक्षधर्मतया ज्ञायमानो हेतुः साध्याभाव
व्यापकीभूताभावप्रतियोगित्वज्ञानात्‌ साध्यस्य व्यापकीभूताभावप्रतियोगित्वज्ञानाच्च साध्याभावस्य साधनायोग्यत्वेपि यो वि
रोधे नैकमपि साधयतीति न च शब्दे नित्यत्वानित्यत्वसंदेहे तदुभयव्यापकत्वेन शब्दवृत्त्यभावस्य गृहीतुमशक्यं व्यापकत्वाभिमतशा १२
वृत्त्यभावाभावयवच्छवृत्तित्वस्य नित्यत्वानित्यत्वयोः संदिह्यमानत्वादिति वाच्यं तथापि तादृशशब्दकाभावदर्शनात्‌ तथात्वनिश्च

येतदुभयव्यापकीभूताभावप्रतियोगित्वादृत्तवत्त्वस्य शाब्दे प्रतिसंधातुं शक्यत्वात् आश्रयमप्रतीत्यैव प्रतीतेः [illegible]
[redacted] [illegible] तस्य चंदनादेः परामर्शे पृथिवीत्वादौ साध्ये तदसाधा
रण्यस्य सुलभत्वादिति नन्वयं सत्प्रतिपक्ष एव व्याप्तेरन्वयनिरूप्यत्वस्याव्यापकत्वेनाप्रयोजकत्वात् अत आह सत्प्रतिपक्ष इति
न चैवंविधभेदेन पृथगभिधानेऽतिप्रसंगः स्वतंत्रेच्छया उत्पादेः ग्रंथकृतैवाभिधानात् तदभावसाधकेन तत्साधकत्वभ्रमरूपा
शक्तिविशेषस्य च नार्पत्वाच्च सव्यभिचारसत्प्रतिपक्षोभयलक्षणाक्रांततया उभयांतर्भावस्याविरुद्धत्वादित्यपि कश्चित् सर्व
सपक्षेति सपक्षः साध्यवान् पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वमित्यर्थः इदं च साक्षादनुमितिविरोधि विरो
धश्च साध्यासामानाधिकरण्यरूपो अन्वयव्याप्तिविरोधीति न सांकर्यशंकापीति साध्यसमानाधिकरणं तु नासाधारणं दशा
विशेषे तद्रूपत्वं तु पुरुषदोषो व्याप्यत्ववदसाधारण्यभ्रमः नवीनाः पुनरेवं वर्णयंति सामग्रीद्वयविरोधेन हेत्वभावस्य साध्यतद
भावव्यापकताग्रहविरोधो असाधारण्यदूषकताबीजं तथा हि वृत्तिमता हेतुना क्वचिदपि वर्तितव्यं तत्र चावश्यं साध्यतदभा
वयोरन्यतरेणाभवितव्यं न च तत्र हेत्वभावः संभवति अतो वश्यमन्यतराव्यापकत्वं तस्य एवं विरोधद्वयो वे साध्येन तदभावेन च

शि
१३
हेत्वभावस्य सहचारज्ञानेन एकतरनिरूपितामपि व्यापकतां ग्राहयति मिथो विरोधिपरामर्शद्वयमिव साध्यतदभावौ एवं च वृ
त्तिमत्त्वविशेषितहेतोर्यावत्सपक्षविपक्षव्यावृत्तत्वं वृत्तिमत्प्रतियोगित्वविशेषितं वा हेत्वभावस्य यावत्सपक्षविपक्षवृत्तित्वमसाधा
रण्यमिति योजयन्ति च ग्रंथमिमं संशयत्वं यदि साध्यतदभावाभ्यां व्याप्यत्वेन तदुभयव्यापकीभूताभावप्रतियोगित्वेन ज्ञातं ज्ञानयो
ग्यं स्यात् तद्वत्त्वादिति यावत्तद्व्यतिरेकेतया तादृशप्रतियोगित्वेनापर्यात् पक्षेत्तदुभयं तावत्येतत्तदुभयसहचरितं भवेत् व्यापका
भाववत्ति व्याप्याभावावश्यंभावात् अन्यथाभावे वा पक्षधर्मताया व्याप्तेर्वा अनुपपत्तिः न च तथाभावः संभवति न वा पक्षवृत्तित्वे
बाधितं अतः साध्यतदभावो व्यापकतया तदुभयसिध्यनुकूलविरोधिव्याप्तिद्वयग्राहकव्यतिरेकसहचारद्वयग्रहविषयतया अ
साधारणे दोषो व्याप्तिग्रहप्रतिबंधः ननु यदि विरोधिव्याप्तिद्वयं न गृह्यते तदा सत्प्रतिपक्षोच्छेदः गृहीतविरोधिव्याप्तिद्वयहेतु
समुच्चयात्तस्येत्यत आह सत्प्रतिपक्ष इति तत्र हेतोर्भिन्नतया अधिकरणभेदेन तथाग्रहः संभवति अत्र पुनरेकस्मिन् हेतौ
तदुभयग्रहे विरुद्ध इत्यर्थः अत्रेदं चिंत्यं एवं तर्हि सपक्षाद्येर्यावत्त्वं विशेषणं व्यर्थं दूषकतायामनुपयोगित्वात् व्यभिचारग्र
हमात्रोपक्षीणत्वात् वृत्तिमत्त्वविशेषितस्यापि च साधारण्यस्य ज्ञानं न व्याप्तिज्ञानविरोधि विरोधिविषयत्वाभावात् उपदर्शि
तविरोधस्य तच्छरीरे अनंतर्भावाच्च व्यापकयोरपि न स्वतो विरोधः दर्शितरीत्या च तदवधारणे आवश्यकव्यभिचारज्ञानमेव १३

प्रतिबंधकं अत एवासत्यप्यसाधारण्यज्ञाने एकत्र तदनुकूलतर्कावतारे भवति व्याप्तिधीरिति एतेन तादृशसहचारज्ञानं तुल्यबलवि
रोधिव्याप्तिग्रहसामग्रीत्वेन प्रतिबंधकं तर्कावतारे तुल्यबलत्वेनास्तीति परास्तं तस्य व्यभिचारशंकानिवर्तकत्वेनैवोपयोगित्वात्
सामग्रीत्वेन प्रतिबंधकत्वे हेत्वाभासत्वायोगात् सत्प्रतिपक्षे च विरोधिव्याप्यवत्तानिर्णयत्वेन प्रतिबंधकत्वं न तु विरोधिसामग्रीत्वे
न बाधावतारे त्वापाततः प्रतिपक्षितत्वेपि बाधेन प्रतिहेतोरव्याप्यत्वाद्विज्ञाने एवासाध्यानुमितिस्तु स्यादिति दृढतरं पल्लवितेन केवला
न्वयीत्यादि सद्धेतुत्वं साधारणत्वं च केवलान्वयिनः साधनस्य व्यतिरेकिणस्तु भागासिद्धत्वं साधारणत्वं विरुद्धत्वं चेत्यसंभवं
बोध्यं नापीति केवलान्वयिसाध्यकस्थले तु वारणाय सत्यंतं व्यतिरेकिसाध्यकसद्धेतुवारणाय केवलान्वयीत्यादि पक्षत्वं
साधकबाधकमानशून्यत्वं केवलान्वयिसाध्यकेपि बाधकमानप्रसिद्धिरुक्तेति न सत्यंतवैयर्थ्यं निश्चितसाध्याभाववद्वृ
त्तित्वे साधारण्यविरुद्धत्वे इति साधारण्याग्रहदशायामस्यासांकर्यमिति वा हृदयं अव्यापकत्वादिति सद्धेतुत्वं च व्याप्तेर्निश्चयद
शायामेवेति भावः अपेत्यादि पक्षातिरिक्तेन प्रतीतेन निश्चितो व्याप्तिग्रहानुकूलो अन्वयेन व्यतिरेकेण वा सहचारो यस्य स तथा
सद्धेतुरेवेति तथा च लक्षणे पक्षातिरिक्तपदं सहचारग्रहस्थलमात्रोपलक्षकं न विशेषकमिति भावः विशेषकत्वाभिप्रायेण दूष
णाद्दूषणमाह तत्रैवेत्यादि असाधारणो सपक्षव्यावृत्ते पक्षतादशायां शब्दोऽभिधेयः शब्दत्वादित्यादौ जलत्वे नित्यत्वे ह शीतस्पर्शवत्त्वा

त्रि
१४

दित्यादौ च सद्धेतुत्वं द्रव्यभिन्नं गुणत्वत्वात् गुणकर्मावृत्तिजातिमत्त्वाद् इत्यादौ विरुद्धे चातिव्याप्तिरित्यर्थः दूषकतायामिति सहचाराभा
वज्ञाने विरोधिनि तु तत्सत्त्वे यांशे व्याप्तीत्यर्थः अपर्यगस्येति अनैकान्तिकशब्दार्थविवेचने प्रातिस्विकरूपेणोद्भावप्रतिबंधकत्वमवस्थिते
रित्यर्थः केचित्तु दूषकतायां असाधकतासाधकतायां चार्थेति अनैकान्तिकशब्दार्थे उभयकोट्युपस्थापस्थापकत्वाद्धे साध्योपस्था
पकतावंशे पर्यवसानादित्याहुः विप्रतिपत्तिः पक्षे साध्यतदभावत्वप्रतिपत्तिः साध्ये पक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तिर्वा आद्ये
केवलान्वयीति साध्याभावाप्रसिद्ध्या व्याप्तिरित्यर्थः उभयत्र सर्वस्येति अतिव्याप्तेरिति पाठे तन्मात्रवृत्तित्वं तत्त्वं व्याप्यवृत्तित्वं
वा आद्ये केवलेति इदं कथंचित् व्याप्तिग्रहदशायां द्वितीये सर्वस्येति व्याप्तीत्यादि पत्रयस्येत्यर्थः तथा च हेतोरपि मतभेदोपसं
दानात्तदुक्तत्र कृते साध्यसिद्ध्योपैकव्याप्तिग्रहानुकूलोपसंहाराभावः तस्यानुपसंहारित्वमित्यर्थः नाभावात् व्यतिरेकिणानाति
व्याप्तिः ननूपसंहारः सहचारस्तन्निश्चयो वा आद्ये तादृशसाध्याभावे निखिलप्रसिद्धानुपसंहार्यव्यापकः अतिव्याप्यकत्वरू
पं द्रव्यभिन्नं गुणत्वत्वात् गुणकर्मावृत्तिजातिमत्त्वादेः द्वितीये पुनरज्ञानरूपासिद्धिपर्यवसायी कारणाभावतया स्वरूपसन्नेव
दोषो न हेत्वाभास इत्यत आह केवलान्वयीति पक्षसाध्यनिश्चयविरोधिनः साध्यवान्नवेत्यादिसंदेहस्य विषयः अवच्छेदकत्वे
वस्यान्यूनवृत्तित्वं तत्स्वरूपतोऽविरुद्धं तेन प्रातिस्विकद्रव्यत्वादिरूपेण सर्वत्र साध्यसंदेह दशायां न व्याप्तिः एवं १४
च सर्वत्रैव हेत्वादिमत्तिसाध्यतदभावसंदे हात् व्याप्त्यग्रहेणाभासत्वं पदार्थस्थले वह्निभावं व्युत्पादयति एवमित्यादिना ॥

असिद्धिरनिश्चयः ज्ञाने ज्ञापने स्वार्थस्थले अंतर्भावं एतेनेत्यादिना शंकां निरस्यति उपजीव्यत्वादिति अत्रेदं चिंत्यं हेतुमति सा
ध्याभावसंदेहो नाभासः सत्त्वेपि च विरोधित्वात् तद्विषयस्तु हेतोः साध्याभावसामानाधिकरण्यं साध्यस्य वा हेतुमन्निष्ठाभावप्रतियो ति
गित्वं नास्त्येव केवलान्वयिसाध्यके व्यतिरेकिसाध्यके तु साधारण्यतया संदिग्धानैकान्तिकत्वेऽप्येवं पर्यवसितं विश्वविषयकसा
ध्यतदभाववत्संदेहस्य कारणीभूतान्वयव्यतिरेकसहचारग्रहविरहात् संशयसामग्र्यां साध्यतदभाववत्वनिश्चयप्रतिबंधाद्व्या
प्तिग्रहे अज्ञानरूपासिद्धिरेव उपजीव्योपि च साध्याभावसंदेहादिर्नाभासः तथैव विरोधित्वादिति यत्तु व्याप्तीति व्याप्तिग्रहानुकू
लसहचारनिश्चयत्वावच्छिन्नविरोधिरूपवत्त्वमर्थः विरोधस्तु संशयसाधारणमन्वयमात्रसहचारग्रहं विहाय द्वि असाधार
णो व्यतिरेकिणि च न व्यतिरेकसहचारग्रहप्रतिरोधः तादृशरूपमंतरेण लक्षणस्यासंभवितया तदेवरूपं लक्षणमाह के
वलेति तादृशावच्छिन्नः पक्षः संदिग्धसाध्यकोयस्याश्रयः सत्तया तथा च केवलान्वयिधर्मावच्छिन्नसाध्यसंदेहविषयवृत्तित्वम
नुपसंहारित्वं व्यतिरेक्यादौ केवलान्वयीन संदेहविषयविषयतावच्छेदकः साध्यवत्तानिश्चयसामान्यविरोधिसंशयविषयवृ
त्तित्वं वा तत्वं धर्मिविशेषनियंत्रितस्तु संदेहो नान्यधर्मिकनिश्चयविरोधी साध्यसंदेहविषयताव्याप्यसाध्यसिध्यनुकूलव्याप्ति

शि

१५ ग्रहोप्येकसत्तावत्त्वं वा तादृशी च सत्ता अन्वये हेतौ व्यतिरेके च तदभावस्येति न कश्चिद्दोषः स्वरूपसत्तादृशसंशयविषये च हेतुमत्ताज्ञानं
हेतौ च साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन तन्निश्चयप्रतिबंधकत्वं सर्वत्र संशयसामग्र्याः निश्चयप्रतिबंधकत्वकल्पनात्
हेतुमत्ति साध्यतदभावसंशये हेतौ साध्यसामानाधिकरण्याभावसंशयस्यौचित्यावर्जितत्वात् साध्याभावेन स्ववृत्तिसाध्यसामाना
धिकरण्याभावोपस्थापनाद्विति तन्न सर्वत्र साध्यसंदेहदशायां क्वचिदपि साध्यसामानाधिकरण्यस्याग्रहीतत्वेन तदभावस्य
ग्रहीतुमशक्यत्वात् प्रतियोगितावच्छेदकप्रतियोगिनिश्चयस्याभावधीहेतुतायास्सम्प्रदावेदितत्वात् अस्तु वा सव्यथा कथंचि
त्साध्ये हेतुसामानाधिकरण्याभावसंशयहेतुत्वेन वा तथात्वं न तथापि सामग्रीत्वेन प्रतिबंधकतया हेत्वाभासत्वं अन्यथा व्यभिचा
रिताव्यभिचरितसमानाधिकरणासमानाधिकरणव्याप्याव्याप्यपक्षधर्मापक्षधर्मादिसाधनवत्तिः साधनादिसाधारणाद्यु
व्यत्वाद्विमत्वं हेतोः पक्षस्य चाभासांतरं स्यात् तदुपदर्शितस्येव एतस्यापि ज्ञानस्येतरसाचियेन तन्निश्चयविरोधिसंशय
सामग्रीत्वात् एवमसिद्ध्यादिनिश्चायकप्रत्यक्षसामग्र्यपि अपि च हेतोः साध्याभावसंदेहविषयमात्रवृत्तित्वं दूषणमिति
प्राप्तं तच्च व्यतिरेकिणि हेतौ निश्चितविषयेणापि संदेहे संपद्यते दूषकताबीजसत्त्वे चासाधारण्यादिसाधारण्यं न दोषाय ॥ १५

न चात्रैव निर्भरः कर्तव्यो हेत्वाभासत्वानुपपत्तेरुक्तत्वादिति कृतं पल्लवितेनेति ॥ ॥व्याप्तिग्रहप्रतिबंधकलक्षणप्रयोजकप्रयोजनक
त्वेन साधारण्यादीनामेव हेत्वाभासत्वं साधारणेन व्यापकत्वस्य अव्यभिचरितत्वस्य वा असाधारणेन सामानाधिकरण्यस्य अनुप
संहारिणा च व्यतिरेकव्याप्तेर्ग्रहस्य प्रतिरोधात् लक्षणं तु विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्याप्तिग्रहवि
रोधितावच्छेदकं रूपं व्याप्तिश्चान्वयतो व्यतिरेकतश्च नानारूपाः प्रातिस्विकरूपेणोपादाय तदवगाहिग्रहो ग्राह्यः साध्यसाधनयोर
प्रसिद्धेरसिद्धिविशेषः वारणाय विरोधिन इत्यंतं साध्यसाधनभेदेन सव्यभिचारभेदाय यत्र विशिष्टं साध्यं साधनं वा प्रसिद्धं तत्र तद्ग्रहा
विरोधिनो पादेयं एवमन्यत्रापि शेषं हेत्वाभासलक्षणोक्तरीत्यावसेयं अर्थविशेषणत्वं तु न व्याप्तिग्रहविरोधीति वक्ष्यते साध्याव्यभि
चरितसामानाधिकरण्यविरहस्य बहिर्भावनीयत्वे पुनरन्वयव्याप्तौ व्यापकत्वमव्यभिचरितत्वं वा सामानाधिकरण्यं च विशकलितं
युगपदुपादेयं तत्र साधारणत्वं च वर्णितं असाधारणत्वं तु सपक्षव्यावृत्तत्वं सपक्षः साध्यवान् तद्व्यावृत्तत्वं तद्वृत्तित्वग्रहविरोधि
त्वं प्रकृतसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयसामानाधिकरण्यग्रहविरोधितावच्छेदकं रूपमिति निष्कर्षः संग्रह
त्वे चेत्थं साध्यस्य साधनवद्वृत्तित्वादिकं चाक्षुषस्पर्शवान् स्पार्शनशब्दवत्त्वादित्यादौ विशेष्ययोः सामानाधिकरण्यं च बाधासिद्धिभे
दस्य साध्यसाधनयोर्वृत्तित्वस्य एतत्सांकर्येण न क्षतिः इदमेव च मणिकृतां विरुद्धत्वं इदं च तदीयमसाधारणत्वमेवास्तु विरुद्धत्वमि

शि
९८ ति यत्र धर्मिप्रतियोगिधर्मी यादृशो हेत्वाभासः तद्व्याप्यमपि तद्विशेषांतरेणाप्रकारणप्रसंगं तद्व्याप्यं च प्रत्यक्षगुणदेशादविरोधित्वाच्च अनुप
संहारित्वं च विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्यतिरेकव्याप्तिग्रहविरोधितावच्छेदकं रूपं तादृशरूपं साध्या
देरत्यंताभावप्रतियोगित्वादिकं वह्न्यभावाभावत्वेन वह्नेर्धूमाभाववद्वृत्तित्वज्ञानं कदाचिद्विरुध्या.. द्रपि न तु वह्नित्वेनेति नाति
प्रसंगः केवलान्वयिनि तत्संभवेपि अन्वयव्याप्त्युपादानेनानुमितिप्रतिरोध इति दिक् साध्यविरोधित्वं साध्यप्रतियोगित्वं ए
कदेशिमतमाह अभावेत्यादि न च भावस्य स्वाभावविरहात्मत्वरूपप्रतियोगित्वग्राहिधर्मिग्राहमानबाधः प्रतियोगित्वस्य
संबंधांतरत्वात् स्वस्याभावस्येत्यत्र षष्ठ्यर्थस्य तस्याभ्युपेयत्वात् विरहत्वं च नाभावत्वं बाधात् नापि तद्ग्रहप्रतिबंधकग्रह
विषयत्वं अविरोधात् प्रत्यक्षेणादुर्ग्रहत्वाच्च न वा अनवस्था अभावस्य स्वाभावाभावत्वे बाधकाभावात् भावस्य तथा
त्वे बाधकमाह बाधकं विनेति अभावप्रतीतेरभावत्वविशिष्टप्रतीतेरभावत्वं च न भावभिन्नत्वं प्रपंचदुर्ग्रहत्वात् किंत्व
यमभावो न भाव इति प्रतीतिसाक्षिकं पदार्थांतरं तच्चानुपस्थितं निर्विकल्पकोपस्थितं वा प्रकारः अभाववच्चाप्रसभवेन्ना
नज्ञप्तिः अन्यथेति अनतिप्रसक्तेरधिकरणोत्तरतद्धर्मेण वा अभावव्यवहारोपपत्तेरिति भावः लाघवाद्बाधिताभाव ९८

त्वविशिष्टप्रत्ययबलादतिरिक्तैवाभावसिद्धिस्तुल्यैव एतेनाभावत्वस्य प्रतियोगिकत्वं तच्चाननुगतानामप्यावश्यकानां प्रति
योगिनां कल्प्यन्त इति परास्तं संयोगादिसाधारण्याच्च गमकत्वभ्रमेति व्यभिचारिणि अव्यभिचारमात्रे विरुद्धे तु साध्यासामाना
धिकरण्यांशेऽपि भ्रमस्त्वसाधारणो विशेष इति दूषकतायामविशेषेऽपि निग्रहस्थानत्वे विशेषात् भेदेनोपन्यासः अत एवानैकान्
तिकसामान्यलक्षणे साधारणलक्षणे च विरोधवाचकं विशेषणं छलजात्योर्निग्रहस्थानविशेषनिरनुयोज्यानुयोज्यानुयो
गविशेषत्वादेतस्यानैकान्तिकविशेषसाधारणाविशेषणत्वेऽप्यदोषो वेति पुनराकरानुयायी पन्थाः नापीत्यादि व्यापकत्वं व्याप्य
व्यापकसामानाधिकरण्यघटितं न वा आद्ये साध्याभावस्येति द्वितीये तु नाभासत्वं अविरोधात् साध्येत्यादि हेत्वभावस्य साध्य
वन्निष्ठाभावप्रतियोगित्वस्थाने वस्तुतः तत्प्रतियोगिकाभावस्य हेतोः साध्यसामानाधिकरण्यग्रहं विरुणद्धीत्यभिप्रायेणेदं
यद्विच तदभावाभावत्वेनासामानाधिकरण्यग्रहेऽपि तद्रूपेण सामानाधिकरण्यग्रहो न विरुध्यत इति विभाव्यते तद्धा हयद्वेत्या
दि वृत्तिमत इति चभैतिच पक्षधर्मत्वाविरोधित्वप्रदर्शकं न तु विशेषकं दूषकतायामनुपयोगित्वात् अव्याप्तिकरत्वाच्च
वृत्तिविशेषसूचनाय वा तत् तेन समव्याप्येन हेतुतापि धूमेनाव्याप्तिः आद्ययोः साध्यवद्वृत्तित्वतदधिकरणत्वाभावयोश्चरम

शि

९७ योः साध्यतद्वृत्तितत्साधिकरणभेदार्प्यावित्तिभेदः ज्ञानातिप्रसक्तिं निरस्यति नचेति तेनेत्यादि साध्याभाववत्त्वज्ञानेन विना वृत्तिम
त्वविशिष्टसाध्यवदवृत्तित्वज्ञानापर्यवसानादित्यर्थः असहचारेति सहचारः सामानाधिकरण्यं व्यभिचारेति व्यभिचारेण ज्ञाय
तेयस्मात्तद्व्यभिचारज्ञानमव्यभिचारज्ञानं तदयमर्थः अव्यभिचरितसामानाधिकरण्यरूपाया व्याप्तेर्व्यभिचारांशग्रहेवि
रोधिग्रहविषयतयायथा व्यभिचारो हेत्वाभासः तथा सामानाधिकरण्यांशग्रहविरोधिग्रहविषयतया विरोधोपीति सचा
यं विरुद्धो हेतुः साध्याभावेति तदभाववत्त्वं तद्वृत्ताग्रहविरोध्य[illegible]भावत्व तेन साध्यवदन्यत्व व्याप्यत्वोपसंग्रहः एवमुत्तरत्रापि
साध्यव्यापकेति व्याप्यपदं स्वरूपपरं साध्येति साध्यव्यापकसामानाधिकरण्यग्रहविरोधिरूपत्वादित्यर्थः तेन साध्यव्याप
कवदवृत्तित्वाद्युपसंग्रहः सर्वत्र चोपलंभपदं स्वरूपसिद्धिमात्रफलकं साध्याभावेति व्याप्यपदव्यासेन साध्याभाव
व्याप्यत्वेन साध्यव्यापकाभावत्वेन चेत्यर्थः स्वसमानेति तथा च साध्याभावसाध्यव्यापकाभावयोर्निरूक्तसाध्यव्यापकाभाव
त्वेनानुगमान्नाधिकमित्यर्थः प्रतियोग्युपलंभात् स्वरूपतः साध्यवत्त्वग्रहविरोधितात्रैव निरंगिकान्यत्वादिसंग्रहः साध्य
व्यापकेति अत्र व्यापकत्वं भेदाभेदसाधारणं तेन साध्याभावव्याप्यत्वपरिग्रः धूमवत्त्वादिति धूमाभावस्य वन्ह्यभावव्या
पकत्वग्रहदशायां अस्य मध्यमेतदभावो वन्ह्यभावव्यापकवन्हिसामग्र्यभावाभावव्याप्यत्वग्रहे च च[illegible]रमे इदं पुनरव ९७

चेयं कथितरूप्याणि किंस्वरूपतो ज्ञानान्येव सामानाधिकरण्यग्रहविरोधीनि असामानाधिकरण्यव्याप्यत्वेन वाना द्यो व्यापकाभाव
व्याप्यत्वादेः तदसंभवात् न द्वितीयः साध्याभावत्वसाध्याभावव्याप्यत्वयोः स्वरूपेणैव ज्ञातयोः तथात्वात् तथात्वेपि तत्वमवि
रुद्धमिति चेत् हंतैवं असमानाधिकरणस्य समानाधिकरणवृत्तिधर्माणां तत्त्वात्ताहाधिक्यं नचैतानि धर्मिविभाजकान्येव स
र्वैषामेव साध्याभावव्याप्यत्वेन एकविधत्वादिति विरोधो नायकप्रकारत्रैविध्ये न धर्मिगणोपि त्रैविध्याभिधानमित्यपि वदंति
अयं चेत्यादि बाधस्वरूपासिद्धि अन्यतरसंकर आवश्यको अन्यसंकरस्तु क्वाचित्कः ज्ञानासंकरं चपार्थक्यं एकत्रेति व्याप्ये
पक्षधर्मतायाः पक्षधर्मे च व्याप्यत्वस्यारोपः प्रत्येकमव्यापको अतो विशि गुरुणा पोवाच्यः स चैकधर्मिगणि विरोधि व्याप्यद्व
यविरहात् विशिष्टस्याप्रसिध्यान संभवतीत्यर्थः विरुद्धो हौ साधनेस्वव्यापकसामानाधिकरण्यरूपव्याप्तेरप्रसिद्धेश्चेत्यपि
द्रष्टव्यं एकत्रभंगेति तथान्यतरत्वेन तदभावधारणमस्तीति भावः सत्प्रतिपक्षितव्यवहारो हि सत्यसत्यिवा साधनेनापरामृश्य
मानेनाप्यविद्यमाने न विरोधिपरामर्शे अत एव सत्प्रतिपक्षो विरोधिव्याप्यादिमत्तया परामृश्यमाणो हेतुः विरोधिपरामर्श
वा पक्षस्य परामृश्यमाणस्य हेतोरसौ सत्प्रतिपक्ष इति विग्रहमपि वर्णयंति अतस्तदनुसारेणैव व्यवहारोपि केवलक्षणमाह साध्ये
ति बाधास्वरूपासिद्धि निर्णयवारणाय समर्पितं नचासौ न व्याप्तिपक्षधर्मतात्मकवलोपस्थितिरिति वाच्यं व्याप्तिपक्षधर्मता

ग्रि
१८ तावीरहस्यसाध्यत्वे पक्षतावच्छेदकत्वेयावत्त्वसंभवात् पक्षः साध्याभावव्याप्यवान् साध्यं पक्षवृत्तित्वाभाववद्व्याप्यवदिति पक्षस्य
व्यापकस्यचभेदेनाघयव्यतिरेकभेदेनचव्याप्तेश्चभिन्नत्वात् एकोपादानेऽन्यस्यासंग्रहेणा वलस्याविवक्षितत्वाच्चसाध्यधीविरो
धिअनुमितिजनकज्ञानविषयत्वेनतदुपादानयतदुपस्थित्यभिधानं चशिरोवेष्टनेननासिकास्पर्शनमनुधावति साध्यस्यसाध्य
सिद्धेर्विरोधित्वात् पक्षोनसाध्यवानितितदुपस्थितेः साध्यविरोधिसाध्यवत्ताज्ञानप्रतिबंधकज्ञानविषयो वाधः साध्याभावादिमत्त्व
ख्यातिः तदुपस्थितेर्वाजननयोग्यतासमानयावलोपस्थित्यात्तथाविधव्याप्तिबुध्याप्रतिरुद्धकार्यस्यतादृशं लिंगत्वमित्यर्थः
विरोधिव्याप्त्यादिविषयत्वयोग्यताशालित्यात्अनुपस्थितेरप्रामाण्यग्रहेसत्यत्तिपक्षत्वसंपादकत्वात् कार्यप्रतिरोधानुधाव
नं समानत्वंचागृहीताप्रामाण्यकसाध्यसिध्यौपैकपरामर्शकालीनत्वेअगृहीताप्रामाण्यकेपरामर्शेसत्यत्तिपक्षितव्यवहार
विरहात् यत्तुप्रामाण्यनिश्चयेनाधिकवलत्वात्वाधकस्यविरोधिपरामर्श स्यवारणायसमानेति तदसत् व्यभिचारेणाप्रा
माण्यग्रहस्यावलत्वात् अन्यथाऽप्रामाण्यग्रहानुकूलत्वेनैवक्वचित्तदुपयोगात् वलपदोपादानाच्चोक्तरूपलाभात्तत्त
द्रूपवत्त्वं लिंगपदोपादानाच्चस्वियलिंगत्वेष्टैकपरामर्शलाभात्तस्मादेवुदासः विरोधपरामर्शप्रतिरुद्धकार्यकविशिष्टपरा १८
मर्शविषयत्वंतुफलितार्थः अगृहीताप्रामाण्यकत्वसंवलितयोग्यतोपादानेतु वाधोपस्थितिसमर्थपरामर्शकालीनसाध्य

सिद्धिसमर्थपरामर्शविषयत्वं तत्वं वाच्यं यद्विचार्यं वह्निव्याप्यवान् वन्ह्यभाववद्व्या – . प्यवांश्चेत्यनुमितिः प्रामाणिकी न तु सत्प्र
तिपक्षत्वं तदा कार्यप्रतिरोधोऽवश्यमुपादेयोऽजनितविरोधिबोधत्वेन च विरोधिपरामर्शो विशेषणीयः अत एवाग्रिमलक्षणे
विरोधिबोधकान्येति फलतो ज्ञानविशेषणं एकस्याप्रामाण्यग्रहेऽपरेणानुमितिजननात् द्वारणाभावात्प्रतिरुद्धकार्यत्वं च प्रतिरुद्धका
र्यकपरामर्शविषयत्वं एकदेत्यादि न च द्वितीयपरामर्शस्योत्पादसमये पूर्वेणानुमितिजननात्कथं नैरंतर्यमिति वाच्यं साधकमानादि
दर्शनक्षणेऽनुमित्यनुत्पादसंभवात् स्वपरेति अयं भावः न खलु संभवतः सर्वे एव हेत्वाभासाः समुद्भाव्याः आधिक्यप्रसंगात् किंतु यथा
कामम् एकः तथा च प्रतिपक्षोद्भावनेऽपि नाप्रतिषेधमात्रेण व्याप्या वश्युपगम इति प्रतिरुद्धत्वेति प्रतिरोधप्रयोजकविरोधिव्याप्यादि
त्यर्थः उभयोरिति परस्पराभावव्याप्यत्वं हि हेत्वोर्विरोधः तदथ हेत्वोरेकत्र निर्णयो न विरुध्यत इति भावः दूषकत्वेति विरोधिपरा
मर्शसत्वे नियमेन परामर्शान्तरादनुमित्यनुत्पादः तस्यानुमितिविरोधित्वं कल्पयति न तु तेन ज्ञाप्यमानस्य व्याप्यादिविरहस्य सद्भावाव
पितस्यानुमितिविरोधित्वादित्यर्थः व्याप्यादिविरहद्वारा दूषकत्वमाह एकत्रेति वाकारोऽनास्थायां प्राथमिकावश्यकानुमितिप्रति
रोधेनैव चरितार्थत्वात् परमुखनिराकांक्षकत्वेन तद्विषयस्याभाससत्वायोगाच्चेति ननु विरोधिपरामर्शो यदि विपरीतनिर्णयविशेषधीकः कथं त
र्हि सतिविशेषदर्शने नयनादिजन्यापीत्यादिग्रन्थसङ्गत्याह चक्षुरादेश्चेति चस्त्वर्थे अप व्याप्तिपक्षधर्मते यदि वलं कथं त

शि
९९ र्हि प्रसक्तादेः प्रतिरोधकत्वात्कथयाप्युपन्यासः इत्य [redacted] इत्येतत्प्रसक्तादिरिति अत्र हेतुमाह कथायामिति प्रत्य
क्षस्य स्वरूपसत्तयैव बोधकत्वात् विरोधिवाक्यमात्रस्य तु मित्यर्थविरोधित्वात् बोध्याभावव्याप्यवत्तानिर्णयेनैव शाब्दादिबोधप्रतिरोधा
त्र एतत्कोशत्वामयमभिप्रायः एकधर्मिकविरुद्धानेकप्रकारकनानाधर्मिक एकविरुद्धाविरुद्धनानाप्रकारकज्ञानत्वादिवदेक
धर्मिकविरुद्धानेकप्रकारकज्ञानत्वरूपसंशयत्वं न जन्यतावच्छेदकं तत्तद्धर्मिकतत्तत्प्रकारकज्ञानत्वस्य प्रयोजकसमाजप्रयोज्य
त्वात् समाजस्य क्वचिद्विरोधभानस्यापि तत्प्रयोजकाधीनत्वात् नीलेतरघटत्वप्रकारकज्ञानत्वेन एकधर्मिकविरुद्धानेकप्रकारका
न्यज्ञाने तत्त्वादिवच्च संशयान्यज्ञानत्वरूपनिश्चयत्वमपि न जन्यतावच्छेदकं तत्प्रयोजकविरहादेव तद्विरहोपपत्तेः एवं च तुल्य
बलाभ्यां विरुद्धोभयाभ्यां जायमानं ज्ञानमर्थात् संशयरूपं भवति अत एवाहात्रैव विप्रतिपत्तिजन्यमानं संशयमामनन्ति फल
बलकल्पनीयश्च न्यूनाधिकसमबलभावः सत्यामपि पीतत्वस्फुरणस्य तौल्यविषयवल्लिनिशंखेसत्ति दोषविशेषपीतत्वस्यैव
अप्रतिस्फुरणस्यैव दूरस्थे च धर्मिणि असति विशेषदर्शने स्मृतयोरेव कोट्योः सत्तिचैकस्याएव नयनेनग्रहात् अथैवमु
द्बुद्धाभ्यां विरुद्धसंस्काराभ्यां स्मरणमपि संशयात्मकं स्यात् किं न स्यात् यद्दिनानुभवबाधः येन गुरुणापि निश्चयत्वेन संस्कारज
न्यकत्वमुपेयते भवतां अर्थविरोधिनो निर्णयो अनुमितिप्रतिबंधको विरो - धित्वं च सहानवस्थायित्वं साध्याभावस्यैव तत्त ९९

व्याप्यस्यापीति चेत् यदि वस्तुतो विरोधिनो निश्चयः तदा कथं तर्हि पक्षतावच्छेदकादेस्तादृशस्य निर्णये भ्रमानुमितिः अपविरोधि-
त्वेन तदा तद्ग्रहेणेह साध्यमितिनिर्णयेप्यनुमितिप्रसंगः अपविशेषदर्शनं विरोधिबुद्धिप्रतिबंधकं कथमन्यथा तदनंतरं न भ्रमसं-
शयाविति चेन्न सत्यपि शुक्लत्वादिव्याप्यदर्शने शंखादौ दुष्टनयनेन पीतत्वादेरदुष्टेन पीतत्वादिव्याप्यवत्ताभ्रमे सत्यपि शुक्लत्वादि-
र्ग्रहाच्च सति च विशेषदर्शने क्वचिदुपनीतभानानुदयात् दूरतः प्रमितस्यापि स्थाणुत्वादेः शाखादौ करादिभ्रमेणाग्रहात् तत्र स्थले वि-
द्य शेष एव तस्य प्रतिबंधकत्वमिति अत्राहुः अनुगतकार्यकारणभावाद्विरोधात् दोषविशेषजन्ये ज्ञाने कदाचिदनुभवे वा विशेषदर्श-
नं विरोधि कल्प्यते नच पक्ष एव तथा सामान्ये बाधकाभावात् बोध्याभावव्याप्यवत्तानिश्चयेन शाब्दादिबोधप्रतिरोधाच्च अपविशेषांतरदर्शन-
विरहविशिष्टमेव तत्तथा अन्यथा कोटिद्वयविशेषदर्शने संशयो न स्यादिति चेन्न भवत्येव तावद्यावदप्रामाण्यं न गृह्यते अगृहीताप्रामाण्यस्यै-
व विशेषदर्शनस्य विरोधित्वादिति विरुद्धस्येति साध्याभावव्याप्यस्येत्यर्थः बाध इति प्रकृते हेतौ अन्यत्र वा अपक्षधर्मे च पक्षधर्मतावा-
ध इति शेषो वा तथा च हेतौ व्याप्तिपक्षधर्मतान्यतरबाध इत्यर्थः प्रकृतेति प्रकृतसाध्ययोर्यौ हेतू तयोरित्यर्थः संशयादिति तज्जन्य-
दुःखोत्सारणरूपेष्टसाधनताज्ञानात् अन्यत्र चेष्टांतरसाधनताज्ञानात् ज्ञाने च्छेति भेदेन विकल्पोपन्यासः असतीत्यादि हेतुस-
मीचीनासमीचीनत्वसंशयजन्यदुःखाभावरूपेष्टसाधनताज्ञानद्वारेण जिज्ञासोपयोगित्वादित्यर्थः तदुत्पत्तिकाले उत्पत्तिपूर्वका

श्रि

१०० ले व्याप्तिपक्षधर्मताज्ञानयोरनुत्पादकमानियमादुभयोर्नाशकत्वाभिधानं उत्पत्तावेव वा तयोरन्वयः यत्र व्याप्तिपक्षधर्मतयोः समूहा
लंबनं तत्र द्वितीयपरामर्शोत्पत्तिकाल एव प्रथमपरामर्शनाशः अस्य निरुक्तसत्प्रतिपक्षितत्वस्य आत्मन्येति सत्ता कंबुग्रीवादिम
त्त्वाद्वौ एवं कस्याव्यभिचारात् विशिष्टोपादानं घटनिष्ठेति घटनिष्ठात्यंताभावत्वेन सामान्यतः पक्षत्वान्न बाधाश्रयासिद्धी नन्वायस्य
समवेतत्वाद्वौ द्वितीयस्य च पटत्वाभावाद्वौ व्यभिचार इत्यत आह विशेषादर्शनेति वस्तुतो घटो नाभिधेयः कंबुग्रीवादिमत्त्वादि
दित्ति व्यतिरेकिणा सत्प्रतिपक्षितः सम्भवत्येव व्यापकाभावेनाप्रसिद्धस्यापि व्याप्याभावस्य सिद्ध्युपगमात्प्रत्येकपदार्थप्रसिध्येव ता
दृशाप्रतिज्ञाद्युपपत्तेः विशिष्टस्य वाक्यार्थत्वात् सत्प्रतिपक्षस्तु साध्याभावव्याप्यवान्पक्षः साध्यवदन्यत्वव्याप्यवांश्च पक्षः पक्षनिष्ठो
साध्याभावसाध्यवद्भेदव्याप्यावत्त्वमादिः प्रत्येकमेव विभाजकत्वप्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वे सति प्रकृतपक्षसाध्यग्रहवि
रोधिप्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिरूपोन्नायकत्वं उन्नायकत्वं च यथादृष्टविशिष्टविषयत्वेन परामर्शस्यानुमितिजनकत्वं तत्त्वं
न च साध्याभावव्याप्यवत्पक्षादिकं असाधारणविरोधयोरन्यतरस्य प्रतिपक्षविधया दोषत्वे पक्षे प्रकृतसाधने प्रकृतसाध्यव्यापका
भावप्रतियोगित्वावच्छेदकविधया हि परामर्शो ग्राह्यः अत्र च सत्यं तेन प्रतिपक्षोन्नायकस्य विरोध्यं तेनाश्रयासिध्युन्नायकस्य विरोध्यं तेन व १००

न्हि व्याप्याभावे साध्ये वह्निव्याप्यवत्त्वक्षात्मकस्य बाधस्योद्धारः संगच्छते चानेन कांचनमयवह्निमानित्यादौ वन्ह्याद्यभावव्याप्यवत्त्वादि
मान् पक्ष इति सत्प्रतिपक्षेनयथासिद्धं तं पंचावयवादिप्रयोगमिच्छंति अयं हेतुः साध्यव्या[illegible]भिचारवानित्यादिवदयं पक्षः साध्याभावव्याप्य
वानित्यादिकमप्युद्भावनं पुनरनुचितं प्रतिभाति वस्तुतस्तु विसाधर्म्युच्चयमात्रे विशिष्टपरामर्शविरोधित्वेन विशिष्टाभावस्य दोषत्वाया दुर्वा
रत्वात् प्रसेकाभावमन्नसापिशबादिनाशकाद्ग्रहात् व्यर्थविशेषणत्वस्य चासाधकतासाधन एव संभाव्यत्वात् न वा [illegible]त्तदपि तादृशा
भावस्य व्याप्तेर्धर्मांतरेणावच्छेत्तुमशक्यत्वात् विशेष्यादिप्रतियोगिकत्वमात्रस्य व्यभिचारिसाधारणत्वादिति व्यभिचारादेरिति
सद्धेतौ सद्धेतुत्वेन ज्ञायमाने तदानींसिद्धेरप्रतिबंधेपि कालांतरगृहीतेन व्यभिचारादिना तदानींतनाभासत्वमनुग्रहमित्तिध्येयं तेन रू
पेण तत्साधारणरूपेण वन्ह्यभावेनेति वन्ह्यभावत्त्वेन प्रतिबंधकः कारणीभूतो योगिन एव तथात्वात् यदभावेन कारणत्वं तदेवत्त
र्थेप्यपि कश्चित् परामर्शेत्यादि ननु परामर्शविषयाभावत्वमनाभासे आभासत्वविशेषणं तदपि बाधविशेषे परामर्शविरोधित्वविशेषितं च हेतोः
साध्यासामानाधिकरण्ये अतिप्रसक्तं अप्रसक्तं च साधनाद्यभावव्याप्यवत्त्वादौ पक्षादेः साधनवदन्यत्वादौ साधनादेः पक्षादिवृत्त्यन्यत्वं
प्रसक्तनिष्ठाभावप्रतियोगित्वादौ अत एव यस्य यद्धर्मवत्त्वं परामर्शविषयः तस्य तदभाववत्त्वं तदित्ति शब्दमात्रानुगतं प्रत्युक्तं परामर्शवि
रोधित्वमात्रं च स व्यभिचारे अतिप्रसक्तं न च तदन्यत्वेन विशेषणीयं नित्यो घटो द्रव्यं प्रमेयो वा जलत्वादित्यादौ तदर्थाप्रसिद्धेः अथ

वि १०१ पक्षतावच्छेदकरूपेण पक्षे हेतुतावच्छेदकरूपेण हेतोर्यद्विशिष्टत्वानंसाध्यतावच्छेदकविशिष्टसाध्यावगाहित्तद्विरोधित्वं तदित्तिचे
न्न पक्षवृत्तित्वविशिष्टसाध्यव्यभिचरित्तसामानाधिकरण्याभावाद्व्याप्तेः नच विशिष्टपक्षविशिष्टसाधनवैशिष्ट्यविशिष्टसाध्यग्र
हाविरोधियद्व्याप्तिग्रहविरोधितदन्यत्वे सत्ति परामर्शविरोधित्वं तद्विशिष्टपक्षवैशिष्ट्योपादानात् वन्हिमान् जलह्रदत्वादित्यादौ व्याप्ति
ग्रहविरोधिन्याअपि स्वरूपासिद्धेर्नासंग्रह इति वाच्यं जलह्रदो वन्हिमान् कांचनमयवन्हिमान्वा धूमात् कांचनमयधूमाद्वेत्यादौ व्याप्ति
ग्रहविरोधित्तस्तादृशग्रहाविरोधिनो रूपस्याप्रसिद्धेः उच्यते साधारण्यनिरुक्तौ साधारण्यानुपसंहारित्वभिन्नं ज्ञानस्य विषयतया
परामर्शविषयतावच्छेदकं रूपमसिद्धिः यत्र साधारण्यादिकमप्रसिद्धं यत्र वन्ह्यव्यभिचारिमेयत्ववान् वन्हिसमानाधिकरणह्रद
त्ववान् वन्ह्यभावव्यापकीभूताभावप्रतियोगिह्रदत्ववान्वा पर्वतो वन्हिमान्मेयत्वात् ह्रदत्वाद्वेत्यादौ यत्साधारण्यादिकमसिद्धिः नत्र
तदन्यत्वं नोपादेयं शङ्कानुगमस्याकिंचित्करत्वात् परामर्शे च व्याप्तिर्व्यत्तिरेकतोप्युपादेया नातोव्यत्तिरेकव्याप्तिविशिष्टपक्षधर्म
त्वाभावादावव्याप्तिः साधारण्याद्यनिरूपितविषयतया परामर्शविरोधितावच्छेदकरूपं चासिद्धिः अत एव द्रव्यत्वाव्यभिचारिगुण
द्रव्योभयसमवेतत्ववान् द्रव्यत्वसमानाधिकरणगुणासमवेतकर्मासमवेतत्ववान् घटो द्रव्यं सत्वात् द्रव्यकर्मासमवेताद्वेत्यादौ गुणद्रव्योभय १०१
समवेतादिनिष्ठद्रव्यत्वव्यभिचारित्वादेः सत्तादिनिष्ठद्रव्यत्वव्यभिचारात्यात्मकसाधारण्यादित्वोनत्तिरिक्तत्वेपि न क्षतिः पर्व

तान्यः पर्वतो ह्रदवान् ह्रदत्ववान् धूमान् धूमादित्यादावसिद्धिसंग्रहाय हेत्वाभाससामान्यलक्षणे ऽर्थोक्तीति रिहावुत्सर्गे ब्येति नत्र
ज्ञानस्य विषयतया पक्षतावच्छेदकविशिष्टपक्षज्ञानविरोधितावच्छेदकरूपमाश्रयासिद्धिः विशिष्टपक्षविशिष्टसाधनग्रहाविरो
धिनो ज्ञानस्य विषयतया तदुभयवैशिष्ट्यग्रहविरोधितावच्छेदकं रूपं स्वरूपासिद्धिः पर्वतो वह्निमान् पर्वतवृत्तिह्रदत्वादित्यादौ
स्वरूपासिद्धिविरहे ऽपि न क्षतिः असिद्धित्रयस्यासार्वत्रिकत्वात् अविरोधिन इत्यंतेन आश्रयासिद्धि... हेत्वसिद्ध्योर्निरासः सं
गृहीते चानेन अनित्यं गगनं रूपवच्चाक्षुषस्पर्शवत्त्वादित्यादौ गगनादेर्निःस्पर्शत्वादिकं एवं घटो द्रव्यं गुणान्यत्वे सति सत्त्वात्
गुणान्यत्वविशिष्टसत्त्वं द्रव्यत्वव्यभिचारिगुणवृत्तित्वादित्यादौ व्यापिना व्याप्तिः तदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः पक्षादिभेदेना
सिद्धेर्भेदात् यत्राश्रयासिद्ध्यादिकं न प्रसिद्धं तत्र तदन्यत्वेन वक्तुं सविषयवृत्तिप्रकृतसाध्यसाधनग्रहविरोधितानवच्छेदक
प्रकृतपक्षप्रकृतसाधनवैशिष्ट्यग्रहविरोधितावच्छेदकरूपशून्यस्य ज्ञानस्य विषयो ऽसिद्धिर्व्याप्यत्वासिद्धिः साध्यपदोपा
दानात् पर्वतः पर्वतवृत्तिह्रदत्ववान् ह्रदत्वादित्यादेः साध्याप्रसिद्ध्यादेर्नासंग्रहः स्वरूपासिद्धौ निवेशात् अनुपादेयमे
व साध्यमित्यपि केचित् साध्यहेत्वप्रसिद्धिव्याप्ति... विशिष्टपक्षधर्मतादिविरहाश्चैतद्... दाः यत्तु हेतुतावच्छेदकस्यया

श्रि
१०२ व्याप्यतानवच्छेदकत्वं व्याप्यत्वासिद्धिः नीलधूमत्वादेश्च तथात्वं समानाधिकरणं संभवदवच्छेदकांतरमपेक्ष्य गुरुत्वादिति न
न्वय यदवच्छेदकत्वं तदनतिरिक्तवृत्तित्वं तद्धर्मस्य व्याप्यत्वमस्ति अथ तादृशेन समानाधिकरणेन तादृशेन धर्मांतरेणाघटितत्वे
सति तत्त्वं तत्र सत्यंतस्य गौरवेणानुपादेयत्वात् नाप्यन्यूनवृत्तित्वं आलोकाद्यवृत्तेर्धूमत्वादेस्तथात्वापातात् अथ स्वरूप
संबंधविशेषः तर्हि द्रव्यं रूपादिमत्त्वादौ रूपत्वादेरपि तथात्वं न स्यात् रूपादिषु चतुर्विंशतौ संभवदवच्छेदकं गुणत्वमपेक्ष्य रूप
त्वादीनां चतुर्विंशतेः षड्विंशतेर्वा गुरुत्वात् एवं पशुमान् सास्नादिमत्त्वादित्यादौ सास्नादेरपि गोत्वादिकं जातिमपेक्ष्य उपाधेर्गु
रुत्वात् हेतुतावच्छेदकविशिष्टहेतुव्यापकसाध्यसमानाधिकरणतादृशहेतोः साध्यव्यभिचरितसंबंधितादृशहेतोर्वाज्ञा
नस्यानुमितिकारणस्याविरोधिनो निरुक्तानवच्छेदकत्वस्य दोषत्वायोगाच्चेति परार्थस्थले दृष्टांतस्य साधनवैकल्यवत् हेतो
व्यर्थविशेषणत्वमपि निग्रहस्थानविभाजकसूत्रस्थानुक्तसमुच्चयार्थचकारेण समुच्चितं पृथगेव निग्रहस्थानं अतिरिक्त
विषयतावादिमतेनाह पक्षेति पक्षः साध्याभाववानिति ज्ञाने पक्षनिष्ठविषयत्वस्य प्रकारः साध्याभाव इति लक्षणसम
न्वयः विपक्षेति हेत्वादिविषयत्वेनाप्रतिबंधकत्वादिति भावः साध्याभावप्रमात्वग्रहे साध्याभावग्रहस्यावश्यकत्वाभिप्रा १०२
ं ते

येणासाध्याभावस्य बाधत्वादिमतेन वाशंकते अथेति [illegible] इति व्याप्तौ निश्चितायां पक्षतत्समययोः साध्याभावसंशयेन दोषायेत्य
र्थः अनुमित्युत्पादेनेति फलतोपि विरोधित्वप्रदर्शनाय अतएव व्याप्यः स्वरूपतो विरोधित्वं द्रष्टव्यमिति अन्यथेति हेत्वाभासाधीन
मिति न च हेत्वाभासस्य अनुमित्याभावप्रयोजकत्वे साध्यवति पक्षे लिंगाभासजाया अनुमितेराभासत्वापत्तिः लिंगोपधानेत
था त्वस्येष्टत्वात् पक्षासिद्धिरित्यस्य बाधकमाननिबंधनेत्यादिः लिंगस्येत्यभ्युच्चयमात्रं वन्हेः पक्षत्वात् कांचनमयत्वस्यासाध्य
त्वाच्च न च साध्याभाववदित्यनुमितेः पूर्वं विशिष्टस्याप्रसिद्ध्या तदभावस्याज्ञानादिति भवेत्तेकत्वादिति भावः तथा चेत्यादि अधिक
बलत्वेन अधिकबलत्वप्रत्वेन अपेक्षणीयेव्यभिचारो व्यभिचारनिश्चयः साध्याभावो निश्चितयेन प्रामाण्यनिश्चयेन तदधीनेत्य
र्थः अवेदनत्वं साध्याभाववान् साध्यवदन्यो या पक्षः पक्षावृत्तिसाध्यं पक्षे साध्याभावः यत्तस्य साध्याभाववत्वादिकं साध्यादेः
पक्षावृत्तित्वादिकं साध्यवत्सामान्यादेः पक्षान्यत्वादिकं विशिष्टे साध्ये पक्षादेर्विशेष्याभाववत्वादिकं यथामतं पक्षे साध्यवत्व
ज्ञानस्य साक्षाद्विरोधि प्रत्येकमिव बाधः तन्निश्चयस्य विरोधिनिश्चयत्वेन दोषविशेषाद्यजन्ये ज्ञानमात्र एव विरोधि अतएवान्व
यनिश्चयविरहो योग्यतेत्याचार्याः विभाजकं तु प्रकृतपक्षप्रकृतसाध्यवैशिष्ट्यग्रहविरोध्यनुमापकत्वे प्रकृतपक्षप्रकृतसाध्य
ग्रहाविरोधित्वे च सति प्रकृतपक्षप्रकृतसाध्यवैशिष्ट्यग्रहविरोधित्वं साध्याभाववत्पक्षादिज्ञानप्रमात्वं तु न बाधः न त्वज्ञानस्य प

स्यादौ साध्याभावादेरनवगाहित्वे विरोधिविषयत्वाभावात् अनवगाहित्वे तु तद्विषयत्वेनैव प्रतिबंधकत्वात् अप्रामाण्यनिश्चयस्यान्यत्र प्र
तिबंधकत्वाकल्पनाच्च सर्वत्र निश्चयस्य हेतुत्वे प्रतिबंधकत्वे च भ्रमत्वाग्रहः संशयसाधारणज्ञानस्य तथात्वे तु भ्रमत्वानिश्चयः प्र
योजको अन्यथा कांक्षाकृतिसाध्यत्वादिनिश्चयहेतुप्रतिहेतुपरामर्शादीनां प्रमात्वनिश्चयो योग्यता व्यभिचारज्ञानादीनां च प्र
मात्वज्ञानं प्रयोजकीभवेत् संख्यादौ स्तुकृत्वाद्यभावभ्रमे च स्तुकृत्वाद्यनुमितिः नवीनानां तदप्रामाण्यग्रहं न हि स्वरूपसत्यपि वा
धनिश्चये शाब्दमानसादिज्ञानमुत्पद्यते अथ लाघवेन संशयसाधारणसंस्कृष्टत्वज्ञानमेव शाब्दानुमित्योः कारणमास्तां चैत
स्यैव विरोधितया प्रकारसमो बाधश्च हेत्वाभासो असिद्धिरिव परामर्शस्य विलीयतां चाप्रसिद्धसाध्यकमनुमानमिति चेन्न संशया
त्मकसमये परामर्शोत्पादे सिद्धिसिसाधयिषाविरहे अनुमित्यनुत्पादप्रसंगात् सति विशेषदर्शने संशयायोगादिति एतेन लाघ
वात् प्रमात्वेन निश्चीयमानं प्रतिबंधकमिति निरस्तं विपरीतमेव चैतल्लाघवं स्फुटतरं चैतत् तद्वत्साध्यके तत्र हि गोत्वाद्यप्रका
रकं गोत्वाभावादिप्रकारकं ज्ञानं बाधनिर्णयः तस्य च गोत्वादिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वज्ञानाभावो भ्रमत्वग्रहविरहः
बाधग्रहश्च पक्षे गोत्वाद्यभावप्रकारकः तस्य च गोत्वादिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वाद्यप्रकारकं गोत्वाद्यभाववद्वि १०३

शेष्यकगोत्वाद्यभावप्रकारकत्वज्ञानं प्रमात्वनिश्चयवृत्ति उक्तप्रायं च तत्तत्कार्यप्रतिबंधकानां कारणानां च निश्चयानां प्रमात्वेन नि
श्चीयमानत्वात् तथात्वापत्तिरिति न च सति विशेषदर्शने विषयपरित्तनिश्चयो ऽकिंचित्करः तत्सत्वेपि विशेषदर्शनेन प्रत्यक्षोत्पादाहि
तिवाच्यं विशेषदर्शनेन तन्नाशानंतरमेव प्रत्यक्षोदयात् परैरपि क्वचित् प्रत्यक्षविशेषएव विपरीतनिश्चयस्य तथात्वोपगमाच्च नहि
शाब्दादिबोधेपि विशेषादर्शनविशिष्टत्वेन स विरोधि गौरवात् मानाभावाच्च न च चाक्षुषादिप्रत्यक्षे मानसादि विपरीतनिश्चयो विरो
धि उपयुज्यते च क्वचिद्विशेषदर्शनमप्रामाण्यग्राहकत्वेन बाधबुद्धेः न चैवं बाधावतारदशायां पक्षे हेतोरग्रहे ऽनुमानलक्षणासिद्धिः
ग्रहे च व्यभिचारधीरेवेति वाच्यं बाधग्रहपरामर्शयोर्भेदात् अभेदेपि पक्षसाध्यव्याप्यहेतुमान् साध्याभाववांश्चेति ग्रहस्यारोपरागा
नवगाहिनो व्यभिचाराविषयत्वात् एकत्र व्यभिचाराव्यभिचारयोरेकनिश्चयागोचरत्वात् पूर्वोक्तकारणे साक्षादनुमित्यविरोधिनो व्य
भिचारज्ञानादेरकिंचित्करत्वात् उक्तञ्च साध्यादेः पक्षावृत्तित्वादिकमिति बाधः न च तद्ग्रहे व्यभिचारधीरावश्यकी यत्तन्निश्चित
प्रामाण्यस्य ज्ञानस्यापि निश्चयत्वसंपत्तये प्रामाण्यग्रहवैयर्थ्ये ऽतिप्रसंगः तथा च पक्षे साध्याभावज्ञानस्य निश्चयत्वसंपत्तये ऽपेक्ष
णीयः तत्प्रमात्वनिश्चय एव प्रतिबंधकः प्राथमिकत्वादुपजीव्यत्वाच्च न तु चरमभावि तदधीनं व्यभिचारज्ञानमिति यत्तूक्तं तस्य

प्रतिबंधकत्वेनाकुशलात् अगृहीताप्रामाण्यकत्वेन वह्निव्याप्यस्य स्वकार्यकारित्वात् अन्यथानवस्थानात् अप्रामाण्यशंकानिवर्तकत्वेन क-
चित्प्रमात्वग्रहस्योपयोगित्वात् संशयसाधारणव्यभिचारज्ञानस्य विरोधित्वाच्च यत्तूपनीतकांचनमयत्वविशिष्टवह्न्यनुमितिविरोधि
व्यधिकरणकांचनमयत्वावच्छिन्नप्रतियोगिताको वह्न्यभावो बाधः नच विशिष्टसाध्याप्रसिद्ध्या कथं तद्विशिष्टानुमितिः विशेष्ये विशे-
षणमितिरीत्या तत्संभवात् शुद्धसाध्यव्याप्तिग्रहादेश्चोपनयसहकारेण प्रसिद्धविशिष्टसाध्यानुमितिसंभवात् तदभावो बाधोऽस्त्विति
न रूपेण व्याप्तेरनुपाहनाच्च तथा व्यभिचारो न दोषाय उपनीतसकलभाने चाप्रामाण्यं प्रत्यक्षेपि तुल्यं अनुद्देश्यांशे चानुमितेरप्रा-
माण्यं न बाधिविजयप्रयोजकमिति तन्न प्रत्यक्षेहि विनासंनिकर्षमभानात् उपनीतभानस्य च प्रत्यभिज्ञादावनुभविकत्वात् उपनयो-
पि संनिकर्षः अनुमितौ फलासिध्यानत्वानन्तरकल्पना नखलु वह्निव्याप्यधूमपरामर्शादनुपनीतरसभानुमितिरानुभविकी क-
स्यापि अन्यथा पर्वतादौ वह्निसंदेहवतो निश्चयवह्निव्यभिचारादभिधेयत्वप्रमेयत्वादिकमनुमिन्वतः वक्ष्यधीनेः स्मृतवन्त्वादिमत्त्व
निश्चयानिष्कंपप्रवृत्त्यापत्तिरिति पक्षधर्मतावलेनेत्यादि ननु विशेषतो व्याप्यग्रहणं न तथा सिद्धिसंभावना सामान्यतः सिद्धौ च न
विशेषतो बाधो विरोधी भिन्नप्रकारकज्ञानत्वात् नच समानविषयत्वमेव विरोधित्वे तंत्रं पृथिव्यादिरूप्यबाधग्रहेपि वायूरूपका १०४

त्र वेत्ति संशयात् रूपवानित्यनुमितेश्च न बाह्यरूपमेव रूपत्वेन शंकितमारोपितं वा तद्विषयः तादृशशंकाविरहेपि तद्योग्यानु
भविकत्वात् दोषवशान्नैरूप्येतं द्रव्यमिति धर्मेपी हशंख इति दर्शनात् घटपटौ न स्तः इदं चैत्रो नास्तीति प्रहेपि घटोस्ति चैत्रोस्तीति प्र
त्ययात् सल्लिंगकपरामर्शात् बाधितविशेषमानप्रसंगश्च विशेषबाधावताराननवतारयोः समानः समाधानः अत्र वदंति व्यापकता
नवच्छेदकमपि रूपलाघवज्ञानादिसहकारिवशात् अनुमितौ प्रकारीभवति यथा जीवनमरणान्यतरप्रतियोगि प्राणित्वादित्यत्र
जीवनप्रतियोगित्वमात्रं अन्यथा जीवितेसति गृहासत्त्वस्य हेतोरसिध्या वहिःसत्त्वानुमानायोगात् एवं क्षित्यादेः कर्तुरेकत्वं अन्य
थाऽनेकेनैकेन वा क्षित्यादिकर्त्तेति संदेहप्रसंगात् अनुमितिश्च ताद्रूप्येण लघुधर्मविषयकत्वेन तथाविधानुव्यवसायविरहात् सतिलाघ
व प्रतिसंधाने लघुधर्मपरिच्छेदकस्यानुमानस्यैव सपि न सिध्येत् इत्थं च विशेषतो जायमानानुमितिविरहाद् बाधभ्रमेति बाधः प
पक्षसल्लिंगपरामर्शात्कथं भ्रांतानुमितिर्जायतां न जायेत वा कथं यथार्थेति चेत् बाधावतारे बाधितार्थलाघवज्ञानात् दोषादे
व तथा सामान्यतो दृष्टान्तादितरप्रसिद्धशेषविशेषबाधसहकृताभिध्यमाणप्रसिद्धप्रकारिकानुमितिर्जायते यथा भोजन
साधकपीनत्वादिवासंध्याभोजनबाधे रात्रिभोजनप्रकारिका एवं द्रव्यवृत्तित्वसाधकगुणत्वादिहेत्वादिगंतं द्रव्यवृत्तित्व बाधे

ष्टि
१०५ प्रसिद्धमनोवृत्तित्वानुमितिर्जायमानामनोवृत्तित्वाभावप्रमया बाध्यत इति विशेषबाधो दोषः किंतु साध्ये स्वादिकमायातत्तः
वस्तुतस्तु प्रतियोग्यसमानाधिकरणसंबंधविशेषावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्यसंसर्गाभाववद्वृत्ति
त्वे व्यभिचारः स्वप्रागभावे सादिकं स्पष्टत्वेवोक्तं तत्र तदानींतदत्यंताभावस्यापि ध्रुसादित्वात् अत एवोत्पत्तिकालावच्छिन्न
घटे पृथिवीत्वादिना रूपादिसाधने बाधो निराबाधं पदमादधाति एवं साध्यवत्तानवच्छेदकदेशावच्छिन्नस्य पक्षत्वेपि बाधो
बोध्यः अथ पक्षतावच्छेदकावच्छेदेन साध्यसिद्धौ तदवच्छेदेन हेतुमत्ताज्ञानं प्रयोजकं अन्यथा गृहीतभागासिद्धेः घटत्वादे
रपि पृथिवीत्वाद्यवच्छेदेन रूपादिसिद्धिप्रसंगात् न च शिखराद्यवच्छेदेन धूमादिमत्वमिति चेन्न अवच्छेदकत्वयोर्वस्तुनो
भेदात् शब्दसाम्यस्याकिंचित्करत्वात् अवच्छिन्नावृत्तेरपि हेतोस्तत्वेन गृहीतस्यायमानानुमितिं विरुणद्धि बाधप्रमा
णाकारेपि वस्तुनोर्नानासंकरोस्तु सुखाद्यवच्छेदकशरीरावच्छिन्नात्मादौ सुखादिसाधकदुःखादेर्वर्त्तमानत्वात् कपिसं
योगाद्यनवच्छेदकमूलावच्छिन्ने वृक्षविशेषत्वादेर्वर्त्तमानत्वाच्च अत्र च एतत्कालावच्छिन्नपर्वतोवह्निमानिति शा १०५

वृत्तित्वेन द्रव्यविशिष्टसत्त्वादिस्यादावव्याप्तिः तादृशस्य गुणो विशिष्टनिरूपिताधारता या विरहे पि तत्संबंधितायाः सत्त्वादित्यपि नि
रस्तं। विशिष्टनिरूपिताधारतावत् विशिष्टनिरूपिता या धर्मितापरनाम्न्याः संबंधिताया अपि विलक्षणत्वेन या गुणादावसत्त्वात्·
सत्ताभावान् द्रव्यत्वादिस्यादौ द्रव्यत्वाद्यधिकरणे महाकालादौ कालिकविशेषणतादिना वर्त्तमानस्य सत्तादिसामान्याभावस्य प्रतियो
गितावच्छेदकमेव सत्त्वात्वादिकमित्यव्याप्तिः· कपिसंयोगी एतत्वादिस्यादौ अव्याप्यवृत्तिसाध्यकेऽव्याप्तिश्च· साध्यसामान्याभा
वस्यापि निरुक्तहेतुसमानाधिकरणत्वात् इतः प्रतियोग्यसमानाधिकरणेति यत्पदार्थस्य हि विशेषणं· स्वप्रतियोग्यसमाना ता
धिकरण स्यहेतुतावच्छेदकावच्छिन्नस्य हेतौ हेतुतावच्छेदकसंबंधेन संबंधिनि येन केनापि संबंधेन वर्त्तमानो योऽभावः तत्प्रतियोगि
तानवच्छेदकं यद्रूपमित्यर्थः· रूपमभावपरं· साध्यसाधनभेदेन व्याप्तिभेदात् व्याप्यवृत्तिसाध्यकस्थले नेदं विशेषणं सफलं·
अभावीयविशेषणताविशेषसंबंधेन साध्याभाववृत्तिसाध्यीयप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छेदकसंबंधेन वा हेत्वधिकरणा
वृत्तित्वविवक्षणाद् व साध्याभावस्य यथाकथंचित्संबंधेन हेत्वधिकरणवृत्तितामादाय व्यतिरेकसाध्यकमात्रेऽव्याप्तेर्वारणासं णा

व्याप्तपत्रं
चिंताटी
४१

अवादित्विका· तत्राप्येतद्विशेषणानुपादाने साध्याभावस्याव्याप्यवृत्तित्वभ्रमेण हेतुसामानाधिकरण्यभ्रमेऽनुमित्यनुदयापत्तेः हेतुसमानाधिकरणाभावप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वग्रहे तादृशप्रतियोगितासामान्ये साध्यतावच्छेदकावच्छिन्नत्वाभावग्रहासंभवात्· प्रकृतलक्षणे वक्ष्यमाणयुक्त्या तथैव विवक्षणीयत्वादिति भावः प्रतियोग्यसमानाधिकरणत्वं च न स्वप्रतियोग्यधिकरणे केनापि संबंधेन वर्त्तते यत्तदन्यत्वं· संयोगी सत्त्वादित्यादावतिव्याप्तेः सत्तायां द्रव्ये संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वात्· तु स्वप्रतियोग्यधिकरणे केनापि संबंधेन वर्त्तमानत्वसामान्याभावः च सामानाधिकरण्यस्याव्याप्यवृत्तितया सत्तायां गुणादावेव संयोगसामानाधिकरण्यसत्ताभाववत्त्वमतो नातिव्याप्तिः· एतेनेदं वाच्यं ज्ञेयत्वादित्यादौ तादृशाभावस्यैवाप्रसिद्धेः यदभावप्रतियोग्यसमानाधिकरणत्वं ज्ञेयत्वमित्यपि निरस्तं· सामानाधिकरण्यस्याव्याप्यवृत्तितया सामान्यत्वाद्यभावस्यैव तादृशस्य अप्रसिद्धत्वात्· एवं वह्नेरपि अव्याप्यवृत्तितया वह्निमान् धूमादित्यादावव्याप्तिः हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यापि धूमावयवावच्छेदेन प्रतियोगिसमाना ×

शि
१०६ ह्रदि चैतत्कालावच्छिन्नपर्वतपक्षकधूमादेरप्येतत्कालावच्छेदेन वह्निमत्त्वबुद्धिरनुभवसिद्धा नापह्नवमर्हतीत्यभिप्रायः॥
॥ ॥इति श्रीमहामहोपाध्यायश्रीभट्टाचार्यशिरोमणिकृताऽनुमानमणिदीधितिः समाप्ता॥ ॥श्रीरस्तु॥ ॥श्रीश्री
॥ ॥श्रीगुरुचरणारविंदार्पणमस्तु॥ ॥छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ श्रीश्रीश्री॥